॥ श्रीः ॥

॥श्रीमतेरामानुजाय नमः ॥

॥श्रीनिधयेवात्स्य श्रीनिवासराघवाचार्यमहादेशिकाय नमः ॥

॥ करुणात्रिवेणी ॥

(श्रीमदाशुकविसार्वभौमश्रीनिधिस्वामिनां तनयस्य शास्त्रसाहितीवल्लभादिबिरुदततिभृतः करुणाकराचार्यस्य संस्कृत-द्राविड-आङ्गल-वाङ्मयानामावलिः)

तत्र संस्कृतवाङ्मयभूतम्

॥ गङ्गास्रोतः ॥

प्रकाशनम्दिनम्

ग्रन्थकर्तुः षष्ट्यब्दपूर्तिं अधिकृत्य


प्रकाशकम्

श्रीनडादूरम्मालास्थानम् (रेजि)

Published by

Sri Nadadoor Ammal Trust (Reg)

House No. 10, Bharathiar Street, Sivakami Nagar,
Gowrivakkam, Chennai-601302
Phone-044 2278 1158 & 044 2278 0854



॥ श्रीः ॥
॥श्रीमतेरामानुजाय नमः ॥
॥श्रीनिधयेवात्स्य श्रीनिवासराघवाचार्यमहादेशिकाय नमः ॥

॥ करुणात्रिवेणी ॥

(श्रीमदाशुकविसार्वभौमश्रीनिधिस्वामिनां तनयस्य
शास्त्रसाहितीवल्लभादिबिरुदततिभृतः करुणाकराचार्यस्य
संस्कृत-द्राविड-आङ्गल-वाङ्मयानामावलिः)
तत्र संस्कृतवाङ्मयभूतम्

॥ गङ्गास्रोतः ॥

प्रकाशनम्दिनम्
ग्रन्थकर्तुः षष्ट्यब्दपूर्तिं अधिकृत्य

प्रकाशकम्
श्रीनडादूरम्मालास्थानम् (रेजि)

Published by
Sri Nadadoor Ammal Trust (Reg)
House No. 10, Bharathiar Street, Sivakami Nagar,
Gowrivakkam, Chennai-601302
Phone-044 2278 1158 & 044 2278 0854

First Edition : March 2009

Price : Rs.150/-
US $ 8.00

Price : Rs.150/-
US $ 8.00

DTP & Printed by:

Versatile Prints & Packs
No.14, IInd Street, Judge Colony,
Chennai - 600 047.
Phone: 044 - 2223 1862
Mobile : 94448 12655

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥श्रीनिधये वात्स्य श्रीनिवासराघवाचार्यमहादेशिकाय नमः ॥

॥ करुणात्रिवेणी ॥

तत्र संस्कृतवाङ्मयभूतम्

॥ गङ्गास्रोतः ॥

विषयसूचिका

आमुखादि...

॥अथ ग्रन्थाः॥

तत्र

प्रथमः स्तोत्रावलीविभागः

स्तोत्राणि

***



This book is Printed with financial assistance from
T.T.D., Thirumala

॥ अथ द्वितीयो वेदान्तविभागः ॥

॥ अधिकरणमाधवी ॥

(तत्र तत्र श्रीभाष्याधिकरणेषु श्लोकवार्तिकभूता)

***

॥ अथ तृतीयः इतिहासपुराणपरप्रबन्धविभागः ॥

१. श्रीरामायणयथावस्थिततात्पर्यसङ्ग्रहः ॥

२. नाथगुणादर्शः ॥

अथ चतुर्थः व्याख्यानप्रबन्धविभागः

॥ शताभिषेकपञ्चकव्याख्यानम् ॥

॥ अथ पञ्चमः प्रकीर्णप्रबन्धविभागः ॥

॥ कथानकम् - खट्वाकलहः ॥

***

॥श्रीः॥

महामहोपाध्यायैः भारतीयराष्ट्रपतिसंमानितैः,
नावल्पाकं सोमयाजि- नारायणाचार्यस्वामितनूजैः विद्वद्वरिष्ठैः
श्रीवरदताताचार्यैः अनुगृहीतं

॥आमुखम्॥

॥श्रीमते रामानुजाय नमः॥

उन्निद्रपद्माद्यारामात् मकरन्दं मधुव्रताः।
संभरन्ति ततः पश्चात् पिबन्ति रमयन्ति च ॥१॥

श्रीनिधेः करुणाकान्तकरुणाकरषट्पदः।
त्रिवेद्यारामतो नित्यं वकुलामोदवासितात् ॥२॥

संभरत्यकृतग्लानि तदासवरसायनम्।
त्रिवेण्याख्यं वितरति भद्रारामो विराजते ॥३॥

प्रस्थानत्रयसारात्मा त्रिवेणी तम आन्तरम्।
बालानां ज्ञानदीपेन शमयत्यनिशं भृशम् ॥४॥

भूयोभावयुतं युक्तिकान्तं ललितमेव च।
काव्यमाराध्यते सद्भिरत्र सन्ति त्रयो गुणाः ॥५॥

निराबाधा सुबोधा च सद्भावसुभगा सती।
अविशेषेण सर्वेषां त्रिवेणी स्वदत्ते चिरम् ॥६॥

चित्रमत्या ज्ञानचित्रं चित्ते विलिखति प्रभुः।
चित्रमेकं वितन्वानः सुशिल्पीव विराजते ॥७॥

यतीन्द्रोक्तित्रिपथगा वकुलामोदवासिता।
यामुनेयैरुपचिता त्रिवेण्यां सङ्गतिं ययौ।८॥

सुकोकिलकुलास्वाद्ये चूतपल्लवतल्लजे।
निम्बवृत्तिभिरुद्गीर्णे का हानिस्तस्य संभवेत्॥९॥

नावल्पाकाभिजातेन दृष्ट्वा सामान्यतोऽधुना।
त्रिवेणीं वरदार्येण स्वाभिप्रायो निवेदितः।
विशेषतो विमर्शस्तु प्राप्तकाले भविष्यति॥१०॥

***

॥ श्रीः ॥

महामहोपाध्यायैः, तिरुपतिराष्ट्रीयविद्यापीठस्य (भूतपूर्व) कुलपतिभिः
भारतीयराष्ट्रपतिसंमानितैः, श्रीरामकृष्णडाल्मियाश्रीवाणी-
अलङ्कारपुरस्कारपुरस्कृतैः विद्वच्चक्रवर्तिभिः
श्रीमदुभयवे. N.S. रामानुजतातार्यमहाशयैरनुगृहीता

॥ प्रस्तुतिः ॥

॥श्रीमते रामानुजाय नमः ॥

श्रीमद्वेदमार्गप्रतिष्ठापनाचार्योभयवेदान्ताचार्याणां आशुकविसार्वभौमानां श्रीनिधिस्वामिनां सुतनयेन संस्कृत-द्राविड-आङ्ग्लादि- नानाभाषाप्रवीणेन कवि-कोकिलेन करुणाकराचार्येण विरचितायां करुणात्रिवेण्यामन्तर्गतस्य संस्कृतपद्यगद्य-गुम्फितस्य गङ्गास्त्रोतसः संक्षिप्तं स्वरूपं प्रस्तूयते। अस्मिन् स्रोतसि पञ्च विभागाः वर्तन्ते। तत्र प्रथमे सप्तदश स्तोत्राणि सन्ति। कारुकुरुचिनाथश्रीदेवराजविषयाणि सुप्रभात-अष्टक-प्रपत्तिरूपाणि त्रीणि स्तोत्राणि, श्रीकरुणाञ्जनेयनवकं एकं, स्वाचार्यप्रपत्तिस्तुतिरूपमेकं, श्रीहयग्रीवविषयाणि सुप्रभात-प्रपत्ति-तोटक-मङ्गल-रूपाणि चत्वारि, भक्तिदृष्टान्तमाला, श्रीपराङ्कुशदशोत्तरशतनामस्तोत्रं, श्रीपिल्लैपाक्कं कल्याणजगन्नाथस्वामिमङ्गलं, लक्ष्म्यष्टोत्तरशतनाम-निरुक्तिस्तुतिः नवनीत-हनुमच्छतकं, श्रीपुण्यपुरीकल्याणवेङ्कटेशदशकं, श्रीलक्ष्मीसहस्रनामनिरुक्तिस्तोत्रस्य प्रथमः पादः, श्रीचेम्बूरहोबिलमठलक्ष्मीध्यानश्लोका इति ॥

द्वितीये वेदान्तविभागे - तत्र तत्र प्रचलितासु विद्वत्सभासु उपन्यस्तानां श्रीभाष्याधिकरणार्थविचाररूपाणां अनेन आचार्येण विरचितानां श्लोकानां सङ्कलनमस्ति। तत् विदुषां सन्तोषमावहति। प्रायः पञ्चशताधिकानि नानावृत्तबद्धानि अत्र पद्यानि विलसन्ति।

तृतीये इतिहासपुराणविभागे श्रीमद्रामायणयथावस्थिततत्पर्यसङ्ग्रहः भागवतपुराणे प्रदर्शितानां भगवतः कल्याणगुणानां आदर्शभूतः प्रबन्धः इति ॥

तुरीये व्याख्यानविभागे अस्मदाचार्यपादानां शताभिषेकसमये एतेषां आचार्याणां आचार्यपादैः विरचितस्य शताभिषेकपञ्चकस्य व्याख्यानमस्ति।

पञ्चमे विभागे कथानकमेकं लघुरूपं वर्तते ॥

केषाञ्चित् शास्त्रपाण्डित्यं भवेत्, परं तु कवनशक्तिर्न स्यात्। केषाञ्चित् कवन-सामर्थ्यं स्यात् शास्त्रपाण्डित्यं तु न भवेत्। उभयोर्मेलनं क्वचिदेव व्यक्तिविशेषे भवेत्। श्रीकरुणाकराचार्ये उभयोर्मेलनं भवतीति प्रशंसनीयो विषयः ॥

अपि च स्तोत्रप्रबन्धेषु एतदीयं स्तुत्यनिष्ठगुणादीनां अनुभवपूर्वकं स्तवनं पठितृणां भक्तिवर्धकं भवति। श्रीलक्ष्मीस्तोत्रयोः एकैकस्य नाम्नः निर्वचनपूर्वं तल्लभ्यगुणकीर्तनं प्रमोदाय कल्पते। नवनीतहनुमच्छतके अकारादिहकारान्ता-क्षरमालिकारूपेण ग्रथितानि पद्यानि हृदयङ्गमानि चकासति ॥

काव्यप्रकाशे

शक्तिर्निपुणता लोककाव्यशास्त्राद्यवेक्षणात्।
काव्यज्ञशिक्षयाऽभ्यासः इति हेतुस्तदुद्भवे ॥

इति कारिकया शक्ति-निपुणता-ऽभ्यासानां त्रयाणां समुदितानां काव्योत्पत्ति-हेतुत्वं कथितम्। तत्र शक्तिर्नाम कवित्वबीजरूपः प्रतिभापरनामकः संस्कारविशेषः। लोककाव्यशास्त्राद्यवेक्षणजन्या निपुणता व्युत्पत्तिविशेषः। काव्यज्ञानां शिक्षया जायमानः अभ्यासः काव्यकरणे पदानां योजने च पुनः पुनः प्रवृत्तिः। एतत्त्रि-तयस्यान्तमे विकलेऽपि काव्यं न निष्पद्येतेति मम्मटाशयः। श्रीकरुणाकराचार्ये उक्तं त्रितयमपि वर्तते। अत एव तदीयपद्यानि हृद्यानि भवन्ति। तत्रापि काव्यज्ञानां

पितृचरणानां भ्रातृवर्याणां च शिक्षा बाल्ये कृता सफला अभूदिति वस्तुस्थितिः। साहित्यदर्पणे अग्निपुराणस्थतया उदाहृतः

नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा॥

इति श्लोकः, विष्णुपुराणस्थतया उदाहृतः

शास्त्रालापाश्च ये केचित् गीतकान्यखिलानि च।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः॥

इति श्लोकश्च श्रीमति करुणाकराचार्ये सुसङ्गतः। अलं बहुना। अयमाचार्यवर्यः ईदृशानि स्तोत्रकाव्यशास्त्रादिग्रन्थरचनानि कुर्वन् विद्वज्जनाभिनन्दनपात्रभूतः चिरं जीव्यात् इत्यभ्यर्थये रमानिवासम्॥

शास्त्रेषु काव्येषु च यस्य बुद्धिः
समानरूपा प्रसरत्यजस्रम्।
स जीवतात् श्रीकरुणाकरार्यः
शतं समाः पण्डितलोकमान्यः॥

बङ्गलूरु **इति एन्.एस्. रामानुजताताचार्यः॥**

१७.०७.०७.

***

महामहोपाध्यायैः व्याकरणार्णवैः परापरविद्याभास्करैः मद्रास्
संस्कृतकलाशालायाः (भूतपूर्वं) प्रधानाध्यक्षैः
भारतराष्ट्रपतिपुरस्कृतैः विद्वद्वरिष्ठैः पैयम्बाडि, चेट्लूर
श्रीमदुभयवे वासुदेव श्रीवत्साङ्काचार्यमहाशयैः
अनुगृहीता

॥ प्रस्तुतिः ॥

॥श्रीः॥

॥श्रीमते रामानुजाय नमः॥

महदिदं प्रमोदस्थानं यदद्य पारंपरिकविदुषः प्रस्फुटवाचः कवेः शास्त्रेषु निष्णातस्य श्रीमतो वात्स्यस्य कुलानुरूपाचारशालिनः श्रीकरुणाकराचार्यस्य करुणात्रिवेणीग्रन्थानां आन्तं परिशीलनं जातमिति। यद्द्रष्टव्यं तदस्माभिःदृष्टम्॥

बहुषु लौकिकव्यापारेषु सत्स्वपि प्रतिदिनं

अध्यात्मग्रन्थनिर्माणं अन्येषां चावबोधनम्।
अर्चावतारसेवेति त्रयमेतन्न वर्जयेत्॥

इति श्रीयामुनाचार्यसूक्तिपरिपालनमेभिः क्रियते।

सत्सन्तानप्रसूतिः सदाचार्यसंबन्धः वेदविदाचार्योपनीतत्वम् - इति श्रीभाष्यकारैः प्रदर्शिता सर्वेऽप्यंशा अत्र फलेग्रहिणः। ईदृशविपश्चितः कृतीनां प्रचारो लोकोपकाराय कल्पते॥

—

अत्र करुणात्रिवेणीग्रन्थे गङ्गास्रोते इति भागे बहूनि स्तोत्राणि सन्ति। तत्र अधुना "कारुकुरिच्ची" इति प्रसिद्धस्य सत्यव्रतपुरीक्षेत्रस्य अधीशान् श्रीदेवराजनाम्नो भगवतोऽधिकृत्य सुप्रभातादिकं प्रणीतम्। सुप्रभातवर्णनव्याजेन कविरयमत्र

ताम्रपर्ण्याः भगवद्रामानुजार्याणां, श्रीवात्स्यवरदगुरूणां, श्रीमन्निगमान्तगुरूणां- इति सुबहु वर्णनमपि करोति।

माधवशब्दनिर्वचनं पूर्वः बहुधा कृतम्। तदत्र

मायाधवेति मधुपर्वतदारणेति
कायाधावाय धृतसिंहशरीरकेति।

इति श्लोके निरूपितम्॥

काञ्चीदेवराजविषयकं देवराजाष्टकमिति काञ्चीपूर्णमहाशयैरारचितं वर्वर्ति। तदनुकुर्वन् सत्यव्रतपुरीशविषयं देवराजाष्टकमातनोति। अत्र

जलेषु च दया यस्य

इति श्लोकः। व्याख्यागम्योऽपि विद्वन्मनोहरः। "दुदूत" "सुसूत" इत्याद्याश-शब्दाः यद्यपप्यद्यत्वेऽप्रयुक्ताः कविभिः तथाऽपि भट्टिकाव्यादिषु व्युत्पित्सूनां प्रयोगसिद्धये इवात्रापि प्रयुक्तः दुर्ज्ञानत्वात् स्वयमेव व्याख्यातश्च व्याकरणवार्तिकं "अप्रयुक्ते दीर्घसत्रवत्" इति वचनमत्र स्मृतिपथमारोहति। सत्यव्रतेशविषये कवेरस्य भूयसीं भक्तिः। प्रपत्तिः इत्यपि स्तुतिस्तद्विषये। अयमत्र विशेषः श्रीरङ्गं श्रीमदाण्डवन् स्थाने मूर्धाभिषिक्तानां जगद्विख्यातानां परमहंसेत्यादि- श्रीमद्वेदान्तरामानुजमहा-देशिकानां नियमनत एतानि स्तोत्राणि १९७०-तमे विदेशीयवर्षे आरचय्य प्रकाशि-तानि- इति। एतदेकमेवालमत्र विषये।

हैदराबाद-नगरस्य समीपे भुवः परिशोधनावसरे अन्तरत्याश्चर्यमयी काचन आञ्जनेयस्वामिमूर्तिरुपलब्धा मूर्तिनामकेन अधिकारिणा। हनूमद्भक्तरसः सपदि तत्र आञ्जनेयस्यालयं निर्माय प्रतिष्ठापितवान्। तं श्रीरामभक्तमुद्दिश्य **श्रीकरुणाञ्जनेयन-वकं** इति स्तुतिर्निर्मिता। सर्वत्र स्तुतिषु खण्डकाव्यत्वात् कवि-काव्य-

नामादिकयोजनं पूर्वाचार एव। एकैकस्मिन्नपि श्लोके नियमेन स्वनामाऽऽयोज्य पद्यानि निर्मितवान् तोय इति नामकः कविः। तं परिक्षितुं राजसभायां समस्यारूपेण कवय एवमूचुः।

"इक्षुखण्डं तथा चन्द्रं भारतञ्चाऽभिवर्णय"

इति। द्वात्रिंशदक्षरात्मिकायामनुष्टुभि एवं षोडशाक्षराणि गलितानि। तथाऽपि निर्विशङ्कं कविः प्रत्युत्तरमदात्।

"अत्र तोयकविर्ब्रूते रसं पर्वणि पर्वणि"

इति। पश्यत! कवेर्नैपुण्यम्। तद्वदत्राऽपि नाम्नि प्रसक्तिर्न दोषाय, श्रेयस एव॥

अनन्तरं स्वपितुरेव आचार्यस्य सप्ततिमहोत्सवसमये कृता **आचार्यप्रपत्तिस्तुतिः**। "श्रीविल्लूर-स्वामी, श्रीनिधिस्वामी" इति सुप्रसिद्धाः कविमणयः आचारशीलाभिमण्डिताः शान्तान्तरङ्गाः स्मितमुखास्सर्वभूतसहृदः एतत्पितरः। तानधिकृत्य सत्यानपायिनी स्तुतिरियम्॥

चेन्नैमहानगरसमीपे "नङ्गैनल्लूर" इति स्थानीयं किञ्चिद्वर्तते, यत्र महान्तो बहवो वसन्ति। तत्र बहूनि आलयानि सन्ति भगवतो नारायणस्य। तत्र श्रीमतो हयग्रीवस्य देवस्य प्रभावाविष्कारः **श्रीहयग्रीवसुप्रभातम्** इति स्तुतौ। हयग्रीवकृपां लब्धवन्तः महर्षयः पूर्वाचार्याश्च सर्वे भगवन्तं सेवितुं सिद्धास्सन्ति इति चारु वर्णितम्। परं तु तन्मध्ये तुरगवदनतेजोबृंहिताश्चर्यशक्तिर्निगमान्तगुरुः न प्रस्तुतः। परन्तु स्तोत्रारम्भ एव पार्थक्येन अपरहयवक्त्रस्सः तत्सन्निधौ दक्षिणपार्श्वे कृतालयः यादवाभ्युदय-सुप्रभातश्लोकं परिवर्त्य हयवदनसुप्रभातं पठतीति वर्णनेन चमत्कृतिं दर्शयन् निगमान्तगुरौ स्वकीयां भक्तिमन्यादृशीं च प्रकटीकरोति कविः। एवमत्रैव **हयग्रीवविषये प्रपत्तिरा**रचिता। वृत्तशास्त्रे **तोटकवृत्त**मित्येकम्। तद्वृत्तेन स्तुतिः काऽप्यत्र हयाननविषये। एवं **हयवदनमङ्गलमेकम्**।

"श्रीरङ्गस्थलवेङ्कटाद्रिकरिगिर्यादौ शताष्टोत्तर
स्थाने ग्रामनिकेतनेषु च सदा सान्निध्यमासेदुषे।"

इति श्रीवात्स्यवरदाचार्यैः (नडादूर् अम्माळ् इति प्रसिद्धैः कवेरस्य कूलकूटस्थैः) आचार्यैरुक्तरीत्या ग्रामनिकेतनस्य भगवतोऽपि श्रीरङ्गादिक्षेत्रस्थ भगवदालयवत् मान्यता सिद्धा।

"तदात्वे नूतनं सर्वं आयत्यां तु पुरातनम्।
न दोषायैतदुभयं न गुणाय च कल्पते ॥"

इति श्रीनिगमान्तगुरुभिः यादवाभ्युदये अनुसंहिता गाथाऽत्रानुसन्धेया।

अथ भक्तिदृष्टान्तमाला।

"श्रवणं कीर्तनं विष्णोः स्मरणं चिन्तनं तथा।"

इत्यादिना

"भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम्।"

इति भगवता भक्तिशब्दस्य विवरणं महाभारते श्रीमद्भागवते च दत्तम्। नात्र पातञ्जलभक्तियोगो विवक्षितो यत्राङ्गान्यष्टौ। तादृशस्य श्रवणादिकस्य प्रत्येकमेकश्लोकेन संपूर्णं विवरणमत्र स्रग्धराभिः क्रियते॥

श्रीपराङ्कुशदशोत्तरनामस्तोत्रम् इति काचित्। चेन्नैप्रान्ते अळगप्पनगरनामकं उपनगरमस्ति। अस्य **"सुन्दरतातनगरं"** इति स्तोत्रा नाम निर्दिष्टम्। अत्र विद्यमाने भगवदालये श्रीशठकोपसूरेः मूर्तिः कदाचित् प्रतिष्ठापिता। तस्मिन् प्रकरणे स्तुतिरियमारचिता। अत्र स्तुतौ पूर्वाचार्यास्सर्वेऽपि संप्रदायभेदं विना प्रस्तुताः। **"साक्षात् स्वामी"** इति विख्याताः ज्ञानवैराग्यानुष्ठानशेवधि-श्रीमद्वेदान्तरामानुज-महादेशिकाः श्रीतिरुक्कुडन्दैदेशिकानामाचार्याः अप्यत्र प्रस्तुताः॥

भगवद्भाष्यकाराणां अवतारक्षेत्रं श्रीभूतपूरी। तत्प्रान्ते शिष्टाग्रहारः पिल्लैपाक्कमिति यत्र **तोळप्पर्** इति प्रसिद्धाः वैदिकसार्वभौमाः वेङ्कटेशाः, तथा श्रीमदहोबिलमठे मूर्धाभिषिक्ताः **श्रीवीरराघवशठकोपयतीन्द्र महादेशिकाः** कृतनैककृतयः- इत्याद्याः जनिमलभन्त। तत्राग्रहारे प्रतिष्ठापितस्य **कल्याणजगन्नाथनाम्नो भगवतो मङ्गलमपि** आरचितं कविना।

एवं तुण्डीरमण्डलमारभ्य दक्षिणदेशपर्यन्तं विराजमानानां भगवन्मूर्तीनां स्तुतिः कृतेति नितान्तं सन्तुष्टान्तरङ्गा वयम्॥

श्रीलक्ष्म्या अष्टोत्तरशतनामस्तोत्रं पुराणेषु प्रसिद्धम्। आलयेषु भगवद्भक्तैः प्रतिदिनमनुसन्धीयते च। एकैकस्य नाम्नः निर्वचनं प्रायः आर्यया क्वचित् वृत्तान्तरेण च सुसुन्दरमत्र क्रियते। (प्रायः) प्रथमतः कस्मादेवं नाम? इति प्रथमपादेन प्रश्नः। अवशिष्टभागेन निर्वचनमिति नूतनः पन्था आश्रितोऽत्र। **भास्वरी** (७८) इत्येव पूर्वैरादृतः पाठः। अत्र भास्करी इत्याश्रित्य निरुक्तम्। कवेरत्र बहुग्रन्थदर्शित्वं प्रस्फुटम्। श्रीविषये नूतनेन मार्गेण रम्यं विवरणम्॥

नवदेहली (NEW DELHI) नगरे श्रीपरमहंसेत्यादिश्रीमदाण्डवन् स्वामिवर्यैः प्रतिष्ठापिते आलये विभ्राजमानस्य भगवतो रामदूतस्य स्तुतिरियं **नवनीतहनुमच्छतकम्**। नवनीताभिषिक्तं (लिप्तं) वायुसूनुमधिकृत्य सुसुन्दरैः पद्यैः निर्मितम्। उपक्रमे अकारमित्यारभ्य क्रमेण अचामारम्भवर्णत्वेन विन्यस्य श्लोकाः। तदनु हलां क्रमेणोपक्रमे संनिवेशः। सर्वत्र नूतनां पद्धतिं कविरयं प्रदर्शयति। **प्राभञ्जनिप्रासशतकं** इत्यस्य नामान्तरम्। कवेरस्य प्रास-यमक-श्लेषाः कुलक्रमायाताः। परं तु निरर्गलाः।

अनायासेन बोधोऽत्र भवेदिति कवेर्मतम्।
अनुस्यूतं वरीवर्ति हेतुरत्र गुरोः कृपा॥

श्रीपुण्य (पूना) पुरीकल्याणवेङ्कटेशदशकम् अपरम्। वश्यवाचाऽनेन झटिति श्लोका आरच्यन्ते। अथाऽपि नैवात्रापभ्रंशं पश्यामः। नैतत् प्रयत्नसाध्यम्, अपि तु नूनमस्य दैवानुग्रहः ॥

श्रीलक्ष्मीसहस्रनामनिरुक्तिस्तोत्रम् (प्रथमः पादः)।

"श्रीर्वासुदेवमहिषी पुंस्प्रधानेश्वरेश्वरी।"

इत्यारभ्य आदिमे ब्राह्मे पुराणे श्रीमहालक्ष्म्याः अष्टोत्तरशतनामस्तोत्रं पठितं शौनकेन। इदञ्च स्तोत्रं **भट्टपराशरपादैः** भगवद्गुणदर्पणे, श्रीसूक्तभाष्ये **पेरियजीयर्** इति प्रसिद्धैः **नञ्जीयर्** महाशयैः, स्तोत्र-गद्य-भाष्यादिषु **श्रीमन्निगमान्तगुरुभिश्च** बहुत्रोपात्तम् क्वचिद्व्याख्यातञ्च। तादृशे प्राचीने स्तोत्रे प्रतिनाम एकैकश्लोकेन निर्वचन-मनेन सभक्तिश्रद्धं क्रियते। तत्र २५२ नाम्नामत्र प्रथमे पादे मुद्रणं कृतम्। स्वेच्छया सर्वेषां नाम्नां व्याख्याकरणापेक्षया पूर्वाचार्यसूक्त्यनुसारेण निर्वचनमेव वरम्। तदत्रानुसंहितम्। परं तु "**श्रीर्वासुदेवमहिषी**" इति तत्राचार्यैरुदाहृतेषु वाक्येषु श्रीः इति पृथक्पदमादौ इति ज्ञातमस्माभिः व्याख्यातञ्च। अत्र तु कविना "**श्रीर्वासुदेव-महिषी**" इति एकमेव नामेति गृहीतम्। "**पुंस्प्रधानेश्वरेश्वरी**" इति रूपमेव व्याकरणानुकूलम्। सुडागमोऽनिवार्यः।

ल्युट्प्रत्ययान्तशब्दानां स्त्रियां टित्वात्तु ङीप् भवेत्।
कात्पूर्वकत्वं नास्त्येषां ततो नात्रेत् भवेद्ध्रुवम् ॥

करुणया आस्रं मुखं यस्या इति कृत्वा आचार्यैः व्याख्यातम्। अत्र तु **करुणाश्रुमुखी** इति नामेति गृहीतम्। नूनम्

"व्यसनेषु मनुष्याणां भृशं भवति दुःखितः"

इति भगवानिव इयमपि **नित्यं तद्धर्मधर्मिणी** इति स्थापनार्थमेवं रोदितीति व्याख्याता मन्यत इव। प्रज्ञायाःपारं इता-गता इत्यर्थे **प्रज्ञापारमिता** इति पाठः पूर्वैरादृतः।

मुम्बईनगरे चेम्बूर्प्रान्ते श्रीमदहोबिलमठे भगवतो नारायणस्यालये प्रतिष्ठितानां लक्ष्मीमूर्तीनां ध्यानश्लोकाः चाऽत्र प्रकाशिताः ॥

एवमवन्ध्ययन् कालं वाचो विहितविषये विनियोगेन सार्थयन् महानुभावोऽयं कविः विदुषां मार्गदर्शी इत्येव भावनीयः ॥

अथ द्वितीयो भागः। वेदान्तविषयाः कविना चारु पद्यरूपेणानुसंहिताः। स्वयमेवास्य श्लोकात्मकस्य भागस्य श्लोकवार्तिकरूपेण नाम प्रकाशितम्। श्रीभाष्यमार्गे वेदान्तविषयानधिकृत्य विशिष्टाद्वैतसिद्धान्तरीत्या छन्दोमयो ग्रन्थः प्रथमं **सेनेश्वराचार्यैः न्यायकलापसङ्ग्रह**नामक आरचितः मुद्रितश्च। **सङ्गतिमाला** पद्यमयी अपि काचिदासीदिति ज्ञायते। श्रीभाष्याधिकरणेषु तत्र तत्र विचार्य निर्धारणाय **श्रीवात्स्यवरदाचार्यैः (नडादूर् अम्माल्** इति विख्यातैः कवेरस्य कुलकूटस्थैः) कृतः **तत्त्वसारः** प्रसिद्धो बहुभिर्व्याख्यातश्च। तदनु प्रत्यधिकरणं श्लोकरूपेण विशेषविचारबहुलः **श्रीमन्निगमान्तगुरुभिः** कृतः **अधिकरणसारावली-**नामको ग्रन्थः स्रग्धरादुग्धराशिः सार्धपञ्चशतश्लोकाधिकः तत्कुमारैः **श्रीवरदाचार्यैरेव** व्याख्यातः प्रसिद्धः प्रौढश्चकास्ति। एवं स्थितेऽयं महानुभावः तत्र तत्र केषाञ्चिदधि-करणानां सारमत्र सङ्गृह्य पद्यानि निर्ममे। **संक्षेपशारीरक** नामकः अद्वैतिषु प्रसिद्धेन पण्डितेन श्रीभाष्यकारेभ्योऽपि पूर्वतनेन कृतो ग्रन्थः वरीवर्ति, यः अधिकरणसारवल्याः अपि मूलभूत इति प्रसिद्धः। पूर्वैरेवाऽत्रक्षुण्णः पन्था इत्यतोऽर्वाञ्चः न तूष्णीं तिष्ठन्ति। भिन्नरुचिर्हि लोकः। अस्मन्मतस्योपरि इतरैः आरोपितानां दूषणानां निरासाय नूतनग्रन्थारम्भः क्वचिद्दृष्टः। श्रुतप्रकाशिकायां **स्थेम**शब्दविचारो नाऽस्ति। किञ्चित् पश्चात्काले जातायां तत्त्वटीकायामत्र विचार्य निष्कर्षः प्रदर्शितः। तद्वत् वक्तव्यांशसद्भावेन व्याख्यान्तराणि प्रवृत्तानि। स्वानुभवार्थमत्र पद्यरूपेण श्रीभाष्यार्थाः संक्षिप्य दत्ताः। सर्वावर्जनाय विभिन्नवृत्तेषु कृतिरियमारचिता। श्लाघ्यः प्रयासः ॥

अत्र **जिज्ञासाधिकरणे** भूयान् विस्तरः कविना कृतः। जिज्ञासाधिकरणे उपोद्घातरूपेण श्रीभाष्ये अद्वैतपरामर्शो भाष्यकारैर्विस्तृतः। तस्य क्रमेण श्लोकरूपेण विवेचनमत्र। अस्मदाचार्यवर्यैः श्रीमद्भिः उत्तमूर-वात्स्य **श्रीवीरराघवमहादेशिकैः परमार्थभूषणे श्रीभाष्यार्थदर्पणे** चात्र विषये पराक्रान्तम्। कारिका अपि बह्व्यः तत्रस्था विद्वन्मनोरञ्जन्यः। तद्वदिदम्॥

एवं **ईक्षत्यधिकरणं आनन्दमयाधिकरणं** इत्यादीनि बहून्यधिकरणानि। तदा तदा समस्यारूपेण दत्तानां सदसि, स्वयमेव च स्वीकृत्य रचितानां च पद्यानां सङ्ग्रहोऽत्र॥

"**तत्त्वमसि**" इति छान्दोग्ये नववारं श्रूयमाणस्य नवविधं विवरणं अतीव भोग्यतमम्॥

प्रकृत्यधिकरणे निमित्तोपादानयोरेकाश्रितत्त्वविचारः शास्त्रार्थपूर्णः। द्वैत्यादिमताक्षेपसमाधानात्मकश्च।

पशुपत्यधिकरणमवश्यं विद्वद्भिः परिशीलनीयम्। पाशुपताधिकरणे अप्पैय्य-दीक्षितैः शिवार्कमणिदीपिकायां श्रुतप्रकाशिकादिखण्डनं कृतम्, तस्यात्र खण्डनं स्याच्चेद्वरम्। दीक्षितकृतिः **शिवार्कमणिदीपिका** व्याख्यात्राऽनेन दृष्टैव। परन्तु अत्र न प्रस्तावः। अस्माभिस्तु तदधिकरणं पृथक् परामृष्टम्॥

पुरुषार्थाधिकरणं तु स्रग्धरावृत्ते उपजातौ मालभारिणयाश्च इति द्विवारं बद्धम्। क्वचित् विस्तृत इव ग्रन्थो भायात्, परं तु वक्तव्यानां ज्ञातव्यानां अंशानां बाहुल्यात् सोढव्यो विस्तरः॥

पारिप्लवाधिकरणश्लोकानां बहूनां कर्त्रा एव विवरणं दत्तम्। नो चेत् न समेषां भावो ज्ञातस्स्यात्।

"व्याख्यागम्यमिदं काव्यं उत्सवस्सुधियामलम्।
हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया।"

इति भट्टिश्लोकानुसारेण तात्पर्यवर्णनं कृतम्।

करुणात्रिवेण्याः गङ्गास्रोतसः तृतीये विभागे अप्पैय्यदीक्षितकृतस्य श्रीमद्रामायणतात्पर्यग्रन्थस्य विमर्शः इतिहासपरः प्रबन्धः धिनोति विदुषः। एवमेव भागवते कृतभगवद्गुणानुभवपरः अपि लघुशरीरको ग्रन्थः॥

चतुर्थे विभागे स्वाचार्यपादग्रन्थस्य शताभिषेकपञ्चकाख्यस्य श्रीमदय्यास्वामीति प्रसिद्धानां महतां श्रीशताभिषेकमधिकृत्य कृतस्य व्याख्यानं अस्य ग्रन्थकर्तुः व्याख्यानचातुरीं प्रकटीकरोति।

पञ्चमे प्रकीर्णप्रबन्धभागे "**खट्वाकलहः**" इति कथानकं मुद्रितम्। कथानकमिदमधिकृत्य ग्रन्थकर्त्रैव एवं लिखितम्:- "**कुमुदं**" इति द्रमिडभाषामये साप्ताहिके विनोदपुस्तके इयं कथा "**कट्टिल सण्डै**" इति नाम्नी ०१.०३.७९ तमे दिने श्री.नीलकुमारनामकेन लिखिता प्रकाशिता। तस्याः संस्कृतीकरणमिदम्। मैसूर् नगरात् प्रकाश्यमानायां सुधर्मानाम्न्यां संस्कृतपत्रिकायां इदं संस्कृतीकरणं पूर्वं प्रकाशितम्।" कवेस्सर्वतोमुखपाण्डित्ये इदमेकं निदर्शनम्।

प्रसिद्धैः विद्वद्भिः सकलतन्त्रपारदृश्वभिः पण्डितराजैः श्रीमद्भिः D.T.ताताचार्यमहाशयैः तदात्वे तैः प्रवर्तितायां उद्यानपत्रिकानाम्न्यां मासिकसंस्कृतपत्रिकायां श्रीवडुवूर् दुरैस्वामि ऐयङ्गार् महाशयैः कृतायाः मेनकानाम्न्याः बृहत्कथायाः संस्कृतीकरणं स्वयं विधाय स्वेनैव स्वपत्रिकायां मुद्रणमपि कृतं क्रमशः। तद्वदेभिरपि सर्वतोमुखीयं स्वकीयं सामर्थ्यमेतेन प्रकटितमिति मुदितस्वान्ता भवेयुर्विद्वांसः॥

शास्त्रेषु वृत्तेषु कथानकेषु प्रागल्भ्यमाश्रित्य पुराणरीत्या।
सारान् बहून् सङ्ग्रहेणन दत्वा प्रमोदयन् नः करुणाकराख्यः॥

विस्पष्टवागाशुकविर्यशस्वी प्राज्ञाद्दतो लौकिकमार्गतोऽपि।
मान्यस्सतां वत्सकुलप्रदीपः स्वाचार्यभक्तस्सततं समिन्धाम्॥

सरलकविः चित्रकविः श्षलेकविः सर्वविषयविज्ञोऽसौ।
प्राचीनसदाचारैः वाग्विन्यासैश्च मण्डितो जयतात्॥

करुणात्रिवेणिकायाः परिशीलनलब्धतोषेण।
श्रीवत्सचिह्नकृतिना लिखितमिदं सद्गुणानिधये॥

चेन्नै चेट्टलूर्. वा. श्रीवत्साङ्काचार्यः

०२.०८.०७

***


||श्रीः ||

|| ब्रह्मश्री.विद्वत्तल्लज. बालकृष्णशास्त्रिणामाशासनम् ||

जगन्मातृ -जगत्प्राणसुतयोः करुणाबलात् ।
तत्कृपां लम्भयन् भक्तान् स्तुतितः करुणाकरः ||१ ||

अन्वर्थाख्यश्चिरयादमोघाशीर्बलात् सताम् ।
श्रेयोध्वकृतपन्न्यासो बर्धतामुत्तरोत्तरम् ||२ ||

***



ग्रन्थकर्तुः पितृपादास्तथाऽऽचार्यपादाः श्रीमदुभयवे. महाविद्वद्वरिष्ठ. विल्लूर् नडादूर्.
आशुकविसार्वभौम श्रीनिवासराघवाचार्यमहादेशिक (श्रीनिधि) स्वामिपादाः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ ग्रन्थकर्तुः विज्ञप्तिः ॥

आहूय यो मां ''करुणे''ति वर्णात् आरभ्य वेदान्तयुगान्तविद्याः !
अदात् कृपाढ्यं पितरं मदीयं अंबां च तद्भक्तिमयीं नतोऽस्मि ॥

किमिति कथयेयम्? । श्रीतातपादानां शिक्षया, मातुलपाद-मधुरान्तकं स्वामि- अन्ना दूर्वरदाचार्य स्वामि- शोक्कनावूर्नरसिंहाचार्यस्वामिमुखानां च तथा पूर्वजयोः भ्रात्रोः महतां अन्येषाञ्च बहूनामनुशिक्षया संस्कृत-द्रविड-आङ्गलभाषासु लेखने दासः मनागिव दाक्ष्यमाप्तवान् तदा तदा यद्यदलिखं ततः कांश्चन अंशान् ''भाषात्रयबद्धास्त इमे'' इति मनसि कृत्वा करुणात्रिवेणीति नाम प्रदाय दासजनषष्टिपूर्तिसमये प्रकाशमानेतुं दासजनान्वयभाजां प्रयत्नः सफलोऽद्य जातः । तत्र गङ्गास्रोतसो रूपं दधमानाः संस्कृतग्रन्थाः इमे ।

एतेषां नडादूरम्मालास्थानद्वारा प्रकाशनाय अनुमतिं दत्तवते तस्मै आस्थानाय, तत्र व्यापृतवतां करुणात्रिवेणीप्रकाशकसमिति-सदस्यानां, तथा आमुख-प्रस्तुति-आशासनादि दत्तवतां महतां, ग्रन्थमिममान्तमवेक्ष्य परिशोधनानि प्रदर्शितवतां श्रीबालकृष्णशास्त्रिणां तथा अस्माकं भ्रातृपादानां श्रीराष्ट्रपतिसंमानितकवीश्वराणां श्रीसुन्दरराजमहाशयानां च पदयोरधमर्णनमस्कारान् निवेद्य प्रणमन्, प्रकाशनाय धनप्रदानेन च उपकृतवतामपि वदान्यभावुकानां पदयोः प्रणम्य, समर्पयामीदम् ।

अनेन रचयिता, रसिको, वचनविषयः प्रीयतां श्रीपतिर्वासुदेवः ॥

इति

शास्त्रसाहितीवल्लभः करुणाकरदासः ।

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥श्रीनिधये वात्स्यश्रीनिवासराघवाचार्यमहादेशिकाय नमः ॥

॥ करुणात्रिवेणी ॥

तत्र संस्कृतवाङ्मयभूतम्

॥ गङ्गास्रोतः ॥

तत्र प्रथमः

॥१. स्तोत्रावलीविभागः ॥

तत्र

१. श्रीसत्यव्रतपुरी (कारुकुरुची) नाथश्रीदेवराजसुप्रभातम् ॥

सत्यव्रतमहाक्षेत्रात् सत्यव्रतपुरीमिमाम् ।
आगतो वरदस्साक्षात् भक्तानुग्रहकाम्यया ॥

कौसल्यासुप्रजा! राम! पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल! कर्तव्यं दैवमाह्निकम् ॥

उत्तिष्ठोत्तिष्ठ गोविन्द! उत्तिष्ठ गरुडध्वज! ।
उत्तिष्ठ कमलाकान्त! त्रैलोक्यं मङ्गलं कुरु ॥

लक्ष्मीकरैः निजवचोभिरनादिवेद-
लक्ष्यं जनार्दनमपीह जनानुकूलम् ।
कृत्वा नितान्तशुभमङ्गलदायिनी त्वं
ह्याचार्यपङ्क्तिकरुणे! तव सुप्रभातम् ॥१ ॥

नित्याभि-वांछित-परस्पर-नीच-भाव-
श्रीनित्यसूरिपृतनाधिपते! तवाऽस्तु।
कौशेयवस्त्रकलितैरनघेश्च घोषैः
श्रीसूत्रवत्यनुवदत्युरु सुप्रभातम्॥२॥

लक्ष्मीमहामनुशिरःपठितेन नाम्ना
लक्ष्मि! त्वमत्र जगतां प्रियभव्यदात्री।
सत्यव्रताख्यपुरि लोकहिताय भासि
श्रीदेवराजदयिते! तव सुप्रभातम्॥३॥

*भर्तुर्मुखे मुखसुनास (नसीह) कृतावतारं
या नो ददर्श पतिसङ्गमलज्जिता त्वाम्।
तस्यै प्रसादमिह दर्शयसीव देव!
जेगीयते वरद! सा तव सुप्रभातम्॥४॥

त्वद्भक्तितत्त्वमिह मूर्तियुतं गृणन्ति
यं त्वत्प्रियाः कविगणा अपि ताम्रपर्णीं।
तत्सूक्तितुल्यसुखदैर्ननु वीचिवातैः
सौस्वापिका वरद! तत्तव सुप्रभातम्॥५॥

रामानुजो यतिपतिः करुणाधनोऽसौ
काञ्चीपुरे व भवतोऽत्र च तीर्थसेवाम्।
श्रीमांश्चिकीर्षति वरप्रद! तस्य चाज्ञां
देहीश! सत्यपुरमण्डन! सुप्रभातम्॥६॥

---

*नासिकोत्तरवेदिः इति श्रुतिः।

अंबेति सर्वजगतां जनकेन देव!
सप्रेमभावमधुरेण पुरा स्तुतो यः।
सक्षीरटीक इह लालयितुं प्रभो! त्वां
सोऽप्यागतो गुरुमणिस्तव सुप्रभातम्॥७॥

वक्त्रारविन्द-विनिवेशित-वाजिवक्त्रः
वादाहवे विजितसर्वकुदृष्टिलोकः।
देव! त्वदीयकरुणापरिणाम एषः
त्वां द्रष्टुमिच्छति गुरुस्तव सुप्रभातम्॥८॥

दह्ले पुरे समभिशायिनमेव देवं
योगेन नक्तमनुभूय महानुभावाः।
प्रारम्भमुख्यगणिता हरिशब्दरम्याः
शय्यां त्यजन्ति वरदेश्वर! सुप्रभातम्॥९॥

माया धवेति मधुपर्वतदारणेति
कायाधवाय धृतसिंहशरीरकेति।
स्तौति स्वपत्तनविभुं यतिवर्ययुग्मं
सत्यव्रताख्यनगराधिप! सुप्रभातम्॥१०॥

पल्लीशशब्दमुपगीय विहन्ति शङ्कां
वल्लीशतारकलिहो भवतां पुरी तु।
पल्लीति नामधरणादपि मन्महे नः
सौलभ्यसद्गुणनिधे! तव सुप्रभातम्॥११॥

भूमौ स्थिरं वससि सूरिगणान् विहाय
देवाधिराज! दयसे जनतासु चेति।
यत्तच्छ्रुतं गुरुमुखात् कुरु सत्यमेतत्
सत्यव्रताख्यनगरेश्वर! सुप्रभातम् ॥१२॥

श्रीवासराघवकवीशकृपा स्थिरा ते
सूषाश्चकार करुणाकरबालके ताम्।
सत्यव्रतेश! करुणाजलधे! न शङ्का
सत्यं तनोषि पठतां सुखसंपदोघान् ॥१३॥

॥ इत्यदोहि श्रीसत्यव्रतपुरी (कारुकुरुची)
नाथश्रीदेवराजसुप्रभातम् ॥

***

॥ श्रीः ॥

२. श्रीसत्यव्रतपुरी (कारुकुरुची) नाथश्रीदेवराजाष्टकम् ॥

वेदानां मस्तके घुष्टं सत्यमित्येकमद्भुतम् ।
सत्यव्रतपुरे दृष्टं लुनीतां शोकसन्ततिम् ॥१ ॥

शेषभोगं परित्यज्य श्रिया सह महीतले ।
सत्यव्रतपुरे तिष्ठत् भातु मे वस्तु निस्तुलम् ॥२ ॥

जलजामण्डितं वक्षः जलजेनाङ्कितः करः ।
*जलेषु च दया यस्य भजे तं सत्यपूःप्रभुम् ॥३ ॥

भारतीवन्दितं देवं भावये वरदप्रभुम् ।
भारवोढिति यो गीतो भवभीतिमतां सताम् ॥४ ॥

स्वर्धुनीसूतिकामीशशिरोभूषणमाद्रिये ।
सत्यव्रतपुराधीशपदपद्मयुगं सदा ॥५ ॥

**दुदूत च सुसूतेति भक्तानां वशगस्स्वयम् ।
वर्ण्यते सत्यनाथोऽयं वन्दा इममतः प्रभुम् ॥६ ॥

अधमर्णधिया देव आहूतोऽपि भवेदसौ ।
इति गीतगुणं नाथं ईडे सत्यपुरप्रभुम् ॥७ ॥

---

* जलेषु - डलयोरभेदमाश्रित्य जडेषु इत्यर्थस्संपादनीयः ।

*दुदूत इति- दूतः इव आचरतीति दूदति- इति नामधातोः लिट् प्रथमपुरुषैकवचनम् । सुसूत इतीदं सूत इव आचरति- सूततीत्यस्य ।

श्रिया सह सदा जुष्टः भक्तानां क्लेशनाशनः ।
सत्यव्रतपुराधीशः सौतु मे क्षेमसंततिम् ॥८॥

धनुष्पुरीनाथकवीश्वरस्य सत्कृपालादेव कृपाकरश्शिशुः ।
चकार सत्यव्रतदिग्गजं सतां मुकुन्दपादाब्जतृषावतां मुदे ॥९॥

॥इत्यदोहि श्रीसत्यव्रतपुरी (कारुकुरुची)
नाथश्रीदेवराजाष्टकम् ॥

***

॥ श्रीः ॥

३. श्रीसत्यव्रतपुरी (कारुकुरुची) नाथ श्रीदेवराजप्रपत्तिः ॥

प्रपन्नरक्षामखदीक्षितस्य पत्नीं प्रपद्ये भृगुयज्ञजाताम्।
सत्यव्रते या स्थिरवासिनीह सत्यव्रतं कर्तुमिव प्रभुं तम्॥१॥

विन्देय नान्यं तु शरण्यमेषः विवेकहीनो विहगेश्वरस्य।
विन्यस्तपादं भुजमूलदेशे सत्यव्रतेशं शरणं प्रपद्ये॥२॥

पद्मेति गोदेति वसुन्धरेति पत्नीस्स्वयं लालयति स्म नाथः।
पापस्स्मृतिः तस्य कथं तदा स्यात् सत्यव्रतेशो गुडतीति सत्यम्॥३॥

सत्यव्रतेशस्य सरोजकल्पं तत्तादृशं चिन्तयतो मुखं मे।
विश्वासयुक्तं भवतीह चेतः तद्देवराजं तमहं प्रपद्ये॥४॥

ज्ञानस्य लेशोऽपि ममाऽत्र नास्ति कर्म स्वयं धावति दृष्टमात्रे।
भक्तिः कथं स्यान्मयि पापिनीह सत्यव्रतेशं तदहं प्रपद्ये॥५॥

साध्यैर्विहीनः खलु देवराज! सिद्धं प्रपद्ये करुणाकरं त्वाम्।
सेतुस्त्वमेवाऽसि मुनीन्द्रवाग्भिः संसारवारांनिधितारको नः॥६॥

त्वं कर्णधार इति संसृतिसागरे नः न्यासातरस्सकलवेदशिरः प्रतीतः।
सत्यव्रताख्यपुरनाथ! दयासुपोतः पद्येय ते पदयुगं सुनिमज्जितोऽहम्॥७॥

पङ्क्त्याननो भवतु वा स विभीषणो वा रक्षेयमित्युपसमुद्रमुदीरितां ते।
वाणीं निधाय मनसीह जगत्प्रभो! ते वाणीप्रसादकर! पादयुगं प्रपद्ये॥८॥

दायस्वभूतं तव दास्यसौख्यं कदाऽनुपद्येय करीन्द्रहूते!।
सत्यव्रतेशेति हि चिन्तयाऽलं न्यास्तात्मनो मे त्वयि देवराज! ॥९॥

न हन्यते न जीयते त्वदीयपादपद्मयोः
करोति सत्य! सत्यनाथ! भक्तिभावसद्धृतम्।
स्वकीयभारसद्धविः पुमांस्तमीक्षसे मन
स्ततः प्रपद्यते त्वदीयपादपङ्कजं मम ॥१०॥

वेदेषु गीतविभवौ विनतासुतेड्यौ विक्रान्तलोकसुभगौ विमलौ वरेण्यौ।
सत्यव्रताख्यपुरिविप्रसुपूजितौ तौ श्रीदेवराजचरणौ शरणं प्रपद्ये ॥११॥

आज्ञा ते श्रुतिरित्युदाहुरपि तद्वाक्यैश्शरण्यो भवान्
न्यासः कार्य इहैव पुष्यति फलं त्वित्यादि जेगीयते।
हे! सत्यव्रतनाथ! तत्कुरु दयां देवी प्रसन्ना यथा
पाप्मा मे बहुदूरगो भवतु ते पादौ प्रपद्ये प्रभो! ॥१२॥

ताम्रपर्णीतीरे वर्तमानोऽग्रहारविशेषः कारुकुरुच्चिनामकः। तदग्रहारकृतोदयौ द्वौ विद्वद्वरिष्ठौ श्रीमदहोबिलमठास्थाने ४०, ४१- तमपट्टौ क्रमशः अलङ्कृतवन्तौ। तयोरन्यतमस्य पौत्रभूतः श्रीरामभद्राचार्यनामा ग्रन्थकर्तुः श्रीतातपादेभ्यः श्रीमदाशुकविसार्वभौमेभ्यः तदग्रहारमन्दिरविराजमानदेवराजप्रभुविषयकं मङ्गलप्रबन्धमेकं प्राप्तवान्। (अयञ्च प्रबन्धः श्रीनिधिग्रन्थमालायां चतुर्थे कुसुमे प्रकाशितः।) श्रीरङ्गे कृतवसतिरसौ तदनन्तरं तान् श्रीमदाशुकविसार्वभौमान् देवराजविषयकं सुप्रभातस्तोत्रप्रपत्त्यादिकं अपि कल्पनीयमिति प्रार्थितवान्। तदात्वे श्रीरङ्गसमीपे डाल्मियापुरे कर्म कुर्वन् विरामावसरेषु श्रीरङ्गे श्रीमधुरान्तकंस्वामिसविधे न्यायसिद्धाञ्जनग्रन्थं सेवमान आसीत् ग्रन्थकर्ता। तद्द्वारा भवदभीष्टरचनाः भवेयुरिति श्रीमदाशुकविसार्वभौमेभ्यः सन्देशं प्राप्य

चतुराननसद्दयितावरदे शरणस्तवगोरसमात्महितम्।
करुणाकरतर्णकवाग्गलितं कविराट्कृपयाऽद्भुतमापिबत ॥१३॥

॥इत्यदोहि श्रीसत्यव्रतपुरी (कारुकुरुची)
नाथश्रीदेवराजप्रपत्तिः ॥

***

कारुकुरुचीयतीश्वरपौत्रः तदर्थं चोदयामास ग्रन्थकर्तारम्। आचार्याज्ञां शिरसा वहता त्रयोविंशद्वयस्केन ग्रन्थकर्त्रा इमानि त्रीणि स्तोत्राणि तदात्वे रचितानि। श्रीमधुरान्तकं स्वामिभिरपि कटाक्षितानि शोधितानि च। १९७० तम संवत्सरे एतानि मङ्गलप्रबन्धेन सह श्रीकारुकुरुचिस्वामिना श्रीरङ्गम् श्रीमदाण्डवन्-आश्रममलङ्कृतवतां- (तिरुक्क्कुडन्दै) श्रीवेदान्तरामानुजमहादेशिकानां नियमनतः प्रकाशितानि।

॥ श्रीः ॥

४. ॥श्रीकरुणाञ्जनेयनवकम्॥

नित्यापराधकलुषं करुणाञ्जनेय! नीरन्ध्रपापचरितं परहिंसयाऽर्द्रम्।
व्याघ्रं स्थितं कमपि तं मयि हन्तुमद्य व्याघ्रान्तकेश ! भगवन्! भज सुप्रभातम्॥१॥

आरादयं गिरिरसौ रघुवीर एव तस्योरसि व्रततिसन्ततिरेव सीता।
पन्थास्तमाप्तुमहमेव तवेति वक्ता संसारकानन इवासि दयाञ्जनेय! ॥२॥

सव्याधिरस्मि सततं करुणाञ्जनेय! को वाऽगदं मम भिषग् क्षममत्र दद्यात्।
इत्यातुरस्य पुरतो मम दर्शयन्स्त्वं हस्तस्थमोषधगिरिं किमु भासि देव! ॥३॥

भर्तुः प्रेममयात् स्वकीयदुरितान्नीता पुरा रक्षसा
त्वय्येव स्वयमाञ्जनेय! ''करुणां कुर्या'' इति प्रार्थनाम्।
कृत्वा लब्धवती स्वकीयदयितुः योगं पुरा जानकी
शार्दूलान्तकभूः प्रभो! चरणयोर्न्यस्तोऽस्मि तेऽहं ततः ॥४॥

भूजान्वेषक! काननाश्रय! महारत्नाकराराधित!
सूर्योद्भूतरत! प्रमाणित!बुधैः वृत्तान्तविद्यानयैः।
अद्वैतं भजता त्वयैवमनघ! व्याघ्रान्तकेशप्रभो!
नेत्रा नः करुणाकरेण कलिता नेत्रेऽस्तु मूर्तिस्तव॥५॥

पूर्वं वज्रमिहाऽपतन्मम शिशोरित्यञ्जनावेक्षितां
भासा च स्वगुरुं गिलेदिति पुनः प्रीत्येक्षितां छायया।
आपद्बन्धुरसौ बभूव च ममेत्यालोकितां सीतया
शार्दूलान्तकमार्गकोणदलिते मूर्तिं श्रये प्रस्तरे॥६॥

भवे दुरितदूषिते भयनिदानसंवर्धके मराविव मधूदकं मलयमारुतावीजितम्।
कपिं मनसि कुर्वतां कमपि पुण्डरीकान्तके कपित्वमतिदूषितं व्रजति दूरतो मानसात्॥७॥

धृतभूधर! हे! करुणाहनुमन्! पदयोरनिशं प्रणतोऽस्मि तव।
मतिमावह मानुषयोग्यगुणां मयि सर्वजनप्रणयेन शुभाम्॥८॥

श्रीरामदूत! प्रणतोऽभियाचे व्याघ्रान्तकेशश्रितवत्सल! त्वाम्।
कालेन देशेन सदाऽभिरामां तवेव वाचं च धियं ददेथाः।९॥

करुणाकरबुधकलिता मूर्तिः करुणाहनुमन्! तव भातु सदा।
करुणाकरशिशुकविता तव सत्करुणेव शुभा पठतां भवतात्॥१०॥

नवव्याकृति-मर्मज्ञ-व्याघ्रान्तक-कपीश्वरः।
स्वकीयनवकज्ञेषु करोति करुणां सदा॥११॥

॥इत्यदोहि *करुणाञ्जनेयनवकम्॥

***

* १९७२ तः १९७८ पर्यन्तं ग्रन्थकर्ता हैदराबाद् नगरे भारतीयभूवैज्ञानिक-सर्वेक्षणकार्यलयस्य दक्षिणप्रान्तविभागे कर्म कुर्वन्नासीत्। तदधिपतिः भूवैज्ञानिकवरः च नाम्ना करुणाकर एवासीत्। ततश्च सनामनि ग्रन्थकर्तरि तत्कर्मपाटवञ्च दृष्ट्वा सोऽन्यादृशीं प्रीतिमावहन्नासीत्। पदोन्नतिं प्राप्तवान् सः कोल्कत्तानगरे केन्द्रीयकार्यालये समस्तनियन्तृनायकतया स्थितिमभजत। हैदराबाद् नगरे तत्स्थाने Dr.M.V.N. मूर्तिनामा तत्पदमारूढवान्। तदात्वे ''पुलिमुडित्तान्'' इत्यभिधायुते प्रदेशे सर्वेक्षणाय गता भूविज्ञानिनः केचित् तत्र भुवि प्रस्तरे कस्मिश्चित् आञ्जनेयमूर्तिमतिमधुरामपश्यन्। श्रीमान्मूर्तिराञ्जनेयेऽप्यतिमात्रभक्तिमानासीत्। तस्याऽञ्जनेयस्य सन्निधिं प्रकल्प्य स्वयमेव करुणयाऽऽगत इति स्वनेतृकरुणाकरस्यापि उपकृतिं स्मरन् तं द्वेधा करुणाञ्जनेयं नामतो वन्दमानः त्रेधा च तं करुणाञ्जनेयं कर्तुं ग्रन्थकर्तारं तत्स्तुत्यै अचोदयत्। ततो जातमिदं करुणाञ्जनेय नवकम्। अत्र पञ्चमे श्लोके भूविज्ञानिनां आञ्जनेयस्य च श्लेषालङ्कृतिमुपयुज्य अद्वैतं सन्दर्शितम्॥

॥ श्रीः ॥

५. ॥ आचार्यप्रपत्तिस्तुतिः ॥

श्रीनाथयोगिभगिनीसुतवंशजातं श्रीसम्यमीन्दुसहजातनयस्य वंशम्।
संभूषयन्तमनघं कविसार्वभौमं श्रीवासराघवगुरुं शरणं प्रपद्ये।।१॥

अम्बेति हस्तिगिरिनाथगिरेडितस्य श्रीदेशिकाय कृतसत्यशुभाशिषश्च।
श्रीवात्स्यदेशिकमणेः कुलभूषणं तं श्रीवासराघवगुरुं शरणं प्रपद्ये ॥२॥

श्रीवत्सवंश्यवरदार्यसुधीन्द्रपौत्रं तादृक्प्रभावबुधवेङ्कटेशषपुत्रम्।
तस्मादवाप्तनिगमान्तयुगं कवीन्द्रं श्रीवासराघवगुरुं शरणं प्रपद्ये ॥३॥

श्रीब्रह्मचारिपुरराघवरम्यरूपे श्रीचापपत्तनविभोरपि दिव्यरूपे।
सक्तं सदा वनगिरिश्वरसुन्दरे च श्रीवासराघवगुरुं शरणं प्रपद्ये ॥४॥

नित्यं यदीयहृदये नवनीतकृष्णः नृत्तं तनोति रमया सह हेमया तम्।
सौहित्यदूरसुधया सह भाषमाणं श्रीवासराघवगुरुं शरणं प्रपद्ये ॥५॥

यत्पादतीर्थधयनादहमाप्तभाष्यः श्रीमच्छठारिवचसामपि भावलाभः।
प्राभून्ममाऽपि कवितल्लजपूजितं तं श्रीवासराघवगुरुं शरणं प्रपद्ये ॥६॥

यत्पुत्रताबलफलं करलब्ध एव वैकुण्ठवास इति संशयदूरगोऽहम्।
प्रत्यक्षसागरसुतापतिमेनमीड्यं श्रीवासराघवगुरुं शरणं प्रपद्ये ॥७॥

अम्मालसाविति? कृतधर्मपीठं अम्मालिवार्चितशुभाश्रयमग्र्यचितम्।
अम्मालसाविति बुधैरभिवर्ण्यमानं श्रीवासराघवगुरुं शरणं प्रपद्ये ॥८॥

गार्हस्थ्यधर्म इव कल्पितविग्रहो यः श्रीवेङ्कटार्यसुतया सहितो विभाति।
सद्भिस्स्तुतस्सुकविताकरुणानिवासः तं श्रीनिधिं मम गुरुं शरणं प्रपद्ये ॥९॥

श्रीनीलसूरिरिह संस्कृतपद्यपूजां कर्तुं हरेः पुनरसौ कलितावतारः।
नैजेऽवतारदिन इत्यपि वर्ण्यमानं श्रीवासराघवगुरुं शरणं प्रपद्ये ॥१०॥

मद्दैवतं मम गुरुं मम सर्वभूतं प्राप्यं मम स्वकविताविजितादिदेवम्।
श्रेयः प्रदं मम समाघनिवारकं मे श्रीवासराघवगुरुं शरणं प्रपद्ये ॥११॥

वसन्तान् सप्ततिं भूयो वसतान्मे गुरुर्भुवि।
वाञ्छयेति कृतं स्तोत्रं वसन्ततिलकाञ्चितम् ॥१२॥

॥इत्यदोहि *आचार्यप्रपत्तिस्तुतिः॥

***

---

* इयं स्तुतिः ग्रन्थकर्तुराचार्याणां सप्ततिमहोत्सवमधि (२०.११.८३ तम दिने) रचिता।



श्रीनङ्गैनल्लूर् लक्ष्मीहयवदनस्वामी ॥

॥ श्रीः ॥

६. ॥श्रीनङ्कैनल्लूर्-हयग्रीवसुप्रभातम्॥

''यामिन्यपैति हयवक्त्र! विमुञ्च निद्रामुन्मेषमृच्छतु तवोन्मिषितेन विश्वम्।
योषासुपत्तनमिदं ह्यवृणोर्निवासं कर्तुं जनस्य निखिलस्य हि सुप्रभातम्॥१॥

सुखाय सुप्रातरिदं तवास्तु जगत्पते जागृहि वाजिवक्त्र!।
अम्भोजमन्तश्शयमञ्जुतारलोलम्बमुन्मीलतु लोचनं ते॥२॥''

एवं स्वकीययदुनाथपरप्रभातसूक्तिं पठन् निगममौलिगुरुस्समिन्धे।
व्यावृत्य देव भवतोऽभिमुखीं च कृत्वा पार्श्वे तवाऽत्र वदने हय! सुप्रभातम्॥३॥

आश्रावयन्त्यभिनतस्वजनार्थवादान् अङ्कं श्रिताऽसि करुणामयविग्रहे! श्रीः!।
हंसस्य हेमधरणीधरपार्श्वभूमिं हंसीव काचन रमे! तव सुप्रभातम्॥४॥

योषासुपत्तनपुरालयनित्यवासिन्! दोषाकरे कृतनिवास! तथाऽपि शुद्ध!।
भाषाभिवन्दितपदाब्जयुगेश! वेदान् हेषामिषेण वितरन् भज सुप्रभातम्॥५॥

कर्णोद्भवौ जलशयस्य पुरा तवाऽऽस्तां दैत्यौ तु वेदमखिलं विधितो हरन्तौ।
सुप्ते त्वयीश बहवोऽद्य कलौ तदर्थान् तद्वाजिवक्त्र! सहसा भज सुप्रभातम्॥६॥

त्वत्पादपद्मयुगले प्रणतीर्विधाय सर्वस्य मूर्ध्नि लिपिलेखनमेष कर्तुम्।
सज्जो विधिः पुर इहास्ति सभक्ति नाथ! त्वां सेविता हय! मुखे तव सुप्रभातम्॥७॥

आचार्यदिव्यभवनेऽत्वतिमात्रभक्तिः चान्द्रीं कलां शिरसि धूर्जटिरादधानः।
सर्वज्ञ एष धृतदक्षिणरम्यमूर्तिः त्वां सेविता हय! मुखे तव सुप्रभातम्॥८॥

त्वामेव चित्तगतमेष सदा विधाय त्वद्रूप एव सविता हयवक्त्र! योऽदात्॥
शुक्लं यजुर्मुनिवरस्य निजैः करैस्स त्वन्मन्दिरं स्पृशति खात्तव सुप्रभातम्॥९॥

एषा कथा भुवि कृता वितता मयेति प्राप्य प्रमोदमयमेति पराशरोऽपि।
पारम्यवित् तव विभो! महतोः प्रसादात् त्वां सेविता हय! मुखे! तव सुप्रभातम्॥१०॥

श्रीवाजिमेधबलतो यदहं कवीशः त्वाद्यं तथा चरममप्यथ काण्डमिद्वम्।
श्रीवाजिमेधचरितेन कृतं मयेति वाल्मीकिरेति भगवन्! तव सुप्रभातम्॥११॥

देव! त्वदीयचरितं कतयन् क्वचित्तु कोणे महाकलहपुस्तक एष भेजे।
व्यासत्वमित्यथ कृतज्ञ इहैष भाति त्वां सेविता हय! मुखे तव सुप्रभातम्॥१२॥

मत्स्याश्वकच्छप इति प्रथितावतारान् संवर्णयन् तव गुणेषु सदा रतोऽसौ।
श्रीकीरयोगिवर एष विभाति नाथ! त्वां सेविता हय! मुखे तव सुप्रभातम्॥१३॥

क्वचिदहो फणितो मयाऽऽसीदर्चापरः परमसौ मम शिष्यभूतः॥
संयग्जगाद कलिवैरिरितीह तेन त्वां सेविता हय! मुखे तव सुप्रभातम्॥१४॥

तालेन वेदमनघं द्रमिडे सुरम्यं श्रीभागिनेयसहितो भवतेऽत्र गायन्।
श्रीरंगनाथमुनिरेष विभाति देव! त्वां सेविता हय! मुखे तव सुप्रभातम्॥१५॥

आदौ भवन्तमनघं मधुजित्पदेन स्पृष्ट्वा यदाह भगवान्! किल रत्नमेतत्।
स्तोत्रं मदीयमिति यामुन एष भक्त्या त्वां सेविता हय! मुखे तव सुप्रभातम्॥१६।

श्रीभाष्यमेतदिह मे किल भाष्यमाह या शारदा तव पदाम्बुजभक्तिपूर्णा।
सर्वं प्रभो! तव कृपेति वदन् यतीशः त्वां सेविता हय! मुखे तव सुप्रभातम्॥१७॥

श्रीतार्क्ष्यवाहनचरो विदुषां विधेश्च दातेष्टमित्यपि नमन् हयावक्त्र! तं त्वाम्।
भावं पराशरगिरां प्रपठन् स एति श्रीविष्णुचित्तगुरुराट् तव सुप्रभातम्॥१८॥

श्रीरङ्गनाथसविधे स पराशरार्यः देव्याः दृशोरसमतां तव यो जगाद।
योषित्सुपत्तनपुरे भवतः कटाक्षं तं सेविता हय! मुखे तव सुप्रभातम्॥१९॥

श्रीभाष्यगोरससुधे महिते च देव! श्रीवत्सवंश्यगुरुराडिह तेऽपि दातुम्।
काञ्चीपुरे व वरदस्य पुरोऽत्र भाति त्वां चिन्तयन् हय! मुखे तव सुप्रभातम्॥२०॥

गोष्ठी परा तव विभूतिरता समेता घोषश्च देव! तव कीर्तिपरोऽथ तस्या:।
प्राप्तप्रवालधरवैद्युतयानघोषैः मिश्रश्श्रुतौ हय! मुखे तव सुप्रभातम्॥२०॥

सन्ध्याकाले विशुद्धा द्विजवरपरिषत् वाजिनं संस्मरन्ती
केश्यश्वस्याथ जिष्णुं सुरभिमतिऋचा सौरभं नैजवक्त्रे।
वाच्छन्ती वेदमूर्ते! हयमुख! तव सा संमुखीनाऽधुनेयं
प्रत्यक्षं द्रष्टुमश्वं तमिव सपदि हे! तद्व्रजेस्सुप्रभातम्॥२१॥

भूराद्यास्सप्त सर्वे द्विजकुलजनिता व्याहृतीस्सञ्जपन्तः
प्राणायामे चतुर्थ्या मह इति भगवन्! व्याहृतेर्लक्ष्यभूतम्।
वागीशं त्वां भजन्तस्तदिह च पुरतो द्रष्टुकामास्समेताः
साक्षात् योषित्सुपुर्यां हयवदन! विभो! तद्व्रजेस्सुप्रभातम्।२२॥

योषित्सत्पुरवास! वाजिवदन! श्रीचन्द्रबिम्बे स्थित!
लक्ष्मीमङ्कगतां दधान! भगवन्! श्वेताद्रितुल्याकृते!
वेदार्थादिसुरक्षणाय कलितस्वीयावतार! प्रभो!
वेदार्थावनसत्सभाजनमुखात्सूषागिरस्स्वीकुरु॥२३॥

योषित्सत्पुरवासिनं द्विजपतेस्सन्मण्डलालङ्कृति
स्त्रीरत्नोदयभूमिजुष्टदयितं गन्धर्वदिव्याननम्।
तेन श्रीनिधिराघवार्यवपुषा संशिक्षितो बालकः।
तुष्टावेति मुखे दिनस्य पठतां स्यात् सुप्रभातं सदा॥२४॥

॥इत्यदोहि श्रीनङ्गैनल्लूर् - हयग्रीवसुप्रभातम्॥

***

॥ श्रीः ॥

७. ॥श्रीनङ्गैनल्लूर्-हयग्रीवप्रपत्तिः ॥

मातर्लक्ष्मि! तुरङ्गवक्त्रदयिते! तस्याङ्कभूमौ स्थिते!
प्रातस्त्वां शरणङ्गतोऽस्मि नितरां कृत्यैर्मदीयैस्समैः ।
भीतस्संप्रति हा! प्रसन्नमिह तं कुर्याः पतिं ते मयि
केतश्शरणं ममाऽद्य करुणामूर्तिं श्रियं त्वां बिना? ॥१ ॥

नानापराधनिवहानहमस्मि कृत्वा नाथ ! त्वदीय चरणौ शरणं प्रपन्नः ।
श्रीवाजिवक्त्र! वितथानि न ते प्रकुर्या वेलाधनञ्जयरथावनिघोषणानि ॥२ ॥

योऽजायमान इति सर्वविधोऽपि जातः त्वं वर्ण्यसे सकलचेतनरक्षणाय ।
योषित्सुपत्तनमितोऽसि मदर्थमेव तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥३ ।।

सत्याचलादिषु भवत्प्रतिकूलवृत्ति दैत्यद्वयं च भवतः पदमूल एव ।
भातीति धैर्यमवलम्ब्य कृतापराधः तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥४ ॥

तादृङ्ग्निहीनमपि कञ्चन धीवरं त्वं सौमित्रतुल्यमकरोर्भगवन् स रामः ।
भूत्वा पुरा तदवगत्य धृतिं दधानः तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥५ ॥

चापल्यभूमिमसुतोऽपि कपि च कंश्चित् संमानयन्नभव इत्यथ राघवत्वम् ॥
धृत्वा पुरा तदवगत्य धृतिं दधानः तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥६ ॥

दत्वा श्रुतीश्च महिता अथ तस्य तासु नष्टासु रक्षितवति त्वयि दिङ्मुखोऽसौ ।
वत्सापहारवृजिनोऽप्यभिरक्षितोऽभूत् तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥५ ॥

मातुश्च कुण्डलयुगं रिपुतोऽथ नीत्वा प्रत्तं त्वयाऽऽप्य भगवन्! तव पुष्पमेकम् ।
पत्न्या अह्नादपि न सोऽप्यथ रक्षितोऽभूत् तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥६ ॥

शुद्धान्तलक्ष्यमकरो रिपुशस्त्रमेकं आच्छिद्य पाण्डुतनयं च तदीयसूतः।
श्रुत्वा चरित्रमिदमस्मि धृतिं दधानस्तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥८॥

मिथ्यां त्वदर्थमभिगीय बभूव दध्नो भाण्डेन तेन सहितो भगवन्! स मुक्तः।
आभीरवृद्ध इह कृष्णतनोर्विहारे तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥९॥

तर्कर्षिदारकृतपापततिस्समस्ता त्वत्पादधूलिनिहतेति कथां निशम्य।
तत्पापजैत्रबहुपापकृतौ पटुस्सन् तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥१०॥

सूर्यात्मजाय कपये कपिराज्यदाता विस्रम्भणाय चपलस्य च ते परीक्षे।
स्वीकृत्य राघवतनुस्त्वमपालयस्तं तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥११

पादू प्रदाय भरतं ननु सान्त्वयंस्त्वं तद्देशवासिजनतामखिलाञ्च मुक्ताम्।
कृत्वा बभूविथ मुदा परयाऽथ युक्तः तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥१२॥

श्रीभाष्यकारविनुतो भगवन्! तदानीं मीनोत्तरोडुनि वरं ननु रङ्गधाम्नि।
तस्मा अदास्तु महितं तदवेत्य हृष्टः तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥१३॥

मादृक्जनस्य सततं दृढपापबुद्धेः वेदान्तदेशिकगुरुस्त्वगदं बभाषे।
न्यासं तवाङ्घ्रियुगयोरहमद्य देव! तद्वाजिवक्त्र! चरणौ शरणं प्रपद्ये ॥१४॥

विद्यानिधिस्स भगवन्! विधिसेव्यमानो विद्याभिरेष नहि ते भजनेऽस्मि शक्तः।
विद्याङ्गकर्मकरणेप्यथ बुद्धियोगे विद्यासुसंख्यवचनैः शरणक्रियाऽतः ॥१५॥

॥ इत्यदोहि श्रीनङ्गैनल्लूर् हयग्रीवप्रपत्तिः ॥

***

॥ श्रीः ॥

८. ॥श्रीनङ्गैनल्लूर्-हयग्रीवतोटकस्तुतिः ॥

मधुकैटभमर्दनदक्ष! विभो! हयवक्त्र! रमादयितेति जपन्।
सकलं किल कालमहं भविता विपदः कथमत्र भवेयुरहो ॥१ ॥

रमणीसुपुरे कृतवासमहं तुरगं वदने सततं कलये।
यमपत्तनवासकथा न हि मे विपदामपदं भविताऽस्मि दृढम् ॥२ ॥

रमणीसुपुराधिपवाजिमुखे कमलासहिते मम भारमहम्।
सकलं विनिवेश्य मुदामभवं ननु वासमहीतलमत्र सदा ॥३ ॥

जगतां परिपालनसद्व्रतवान् वदने तुरगो वरदो भगवान्।
तमहं सततं मनसा वचसा प्रणतो भयमत्र न मे भविता ॥४ ॥

भगवन्! मधुकैटभगर्वहरागमदोऽसि विधेरयि! पालय माम्।
इति ते सविधे कथयन् सततं करुणां तव सत्यमशीय विभो! ॥५ ॥

ध्रुवबालकपोलकृताब्ज हरे! कवने पटुतां त्वमदा झटिति।
मयि चाऽपि तथा करुणां कुरु हे! रमणीसुपुरे वदने तुरग! ॥६ ॥

अहिराजपुरे तपसा मुदितः कवितार्किककेसरितां प्रददौ।
स भवान् भगवन् ! तव साम्यमयं रमणीसुपुरे भजते गुरुराट् ॥७ ॥

स्पृहये नहि तादृशमत्र पदं त्वपि तस्य गिरामथ भावधियम् ॥
वितरेर्मम येन भवत्पदयोः भगवन्! भजनं सुलभं भवितृ ॥८ ॥

यतिराडभवत्तव भक्तवरो मतिदोऽस्य कथाहवसङ्गजये।
त्वमभूस्स च शारदयाऽभिनुतो वितरेर्मम भावमथास्य गिराम् ॥९ ॥

गुणिनां गणने बहुदूरगतः प्रथमस्तव दुस्सहपापकृताम्।
अपि मय्यथ ते करुणा प्रवहेदिति मे वदनेऽश्व! मतिस्सुदृढा ॥१०॥

करुणाकरकवितोकजन्नवनं त्वपि नीरसमस्ति मुदे तव यत्।
करुणाकर! तुङ्ग! तुरङ्ग! मुखे करुणां कुरु तन्मयि पापिनि हे! ॥११॥

॥ इन्यदोहि श्रीनङ्गैनल्लूर् - हयग्रीवतोटकस्तुतिः ॥

***

॥ श्रीः ॥

९. ॥श्री नङ्गैनल्लूर-हयग्रीवमङ्गलम्॥

रमणीसत्पुरे वासं तन्वते स्फटिकाद्रये।
चन्द्रबिम्बस्थितायास्तु हयग्रीवाय मङ्गलम्॥१॥

हेषामिषमहाघोष- वेदशास्त्रविहारिणे।
ओषधीशाधिवासाय हयग्रीवाय मङ्गलम्॥२॥

श्वेतद्वीपं परं व्योम त्यक्त्वा भूमौ विहारिणे।
मांसनेत्रैश्च सेव्याय हयग्रीवाय मङ्गलम्॥३॥

अङ्के लक्ष्मीं दधानाय तुङ्गमङ्गलमूर्तये।
नङ्गनल्लूरपुरीशाय हयग्रीवाय मङ्गलम्॥४॥

वेधसे चतुरो वेदान् योऽददात् करुणामयः।
आहृत्य चासुरेभ्यस्तान् हयग्रीवाय मङ्गलम्॥५॥

अस्मदाचार्यपर्यन्त -गुरूणां वदने स्थिते :।
वेदमार्गाभिगोप्त्रेऽस्तु हयग्रीवाय मङ्गलम्॥६॥

भाषासेवितपादाय व्यासादिऋषिभिस्सदा।
सन्नुताय सतां गोप्त्रे हयग्रीवाय मङ्गलम्॥७॥

हव्यकव्यभुजे नित्यं मधुकैटभमर्दिने।
कलानिधिनिवासाय हयग्रीवाय मङ्गलम्॥८॥

वेदान्तदेशिकं नाम्ना निजबिम्बं च दक्षिणे।
दधते पार्श्वतस्तस्मै हयग्रीवाय मङ्गलम् ॥९॥

वेदवेदान्तशास्त्राणां प्रसुवे जीवबुद्धये।
रमणीसत्पुरस्थाय हयग्रीवाय मङ्गलम् ॥१०॥

कविश्रीनिधिपुत्रेण करुणाकरसंज्ञया।
युतेन विनुतायास्तु हयग्रीवाय मङ्गलम् ॥११॥

॥ इत्यदोहि श्रीनङ्गैनल्लूर-हयग्रीवायमङ्गलम् ॥

***

* इमे श्रीनङ्गैनल्लूर्- हयग्रीव विषयाः प्रबन्धाः १९९२-तमसंवत्सरे श्रीनङ्गै-नल्लूर्देवालयनिर्वाहक-वेदार्थस्थापनसभाध्यक्षवरदाचार्यचोदितेन ग्रन्थकर्त्रा रचिताः।

॥ श्रीः ॥

१० ॥ भक्तिदृष्टान्तमाला ॥

॥ १. श्रवणम् ॥

दृष्टान्तो विष्णुभक्तेः श्रवणमयतनोः दैत्यराजस्य पुत्रः
प्रह्लादो नारदर्षेरधिगतभगवद्वैभवस्तात् सुखाय ।
सत्योक्तिं यं वितन्वन् नरहरिवपुषा स्तम्भडिम्भत्वमागात्
देवेशो दैत्यहन्ता दितिसुतशरणे संभ्रमाविष्टचेताः ॥१ ॥

॥ २.कीर्तनम् ॥

दृष्टान्तः कीर्तनाख्याधरजलधिसुताकान्तभक्तेः प्रसिद्धा
मीराख्या राजपुत्री व्रजपतिभजने निस्तुलं धाम यस्याः ।
यद्गाने सोऽपि देवः प्रविशति हृदयं मादृशानां च तूर्णं
पीते श्रोत्रैर्हरौ मे रतिमतिमहितां सा दिशन्ती विभातु ॥२ ॥

॥ ३. स्मरणम् ॥

दृष्टान्तो विष्णुभक्तेः स्मरणमयतनोः भूमिकर्णादुदीतः
वाल्मीकिस्सप्तयोगीश्वरवचनबलात् सत्पदव्यां प्रवृत्तः ।
कूजन् तं रामरामेत्यतिमधुरवचा रामकाव्यप्रणेता
भूत्यै स्तान्मे सदाऽयं भुवि मधुरगिरो मार्गदर्शी महर्षिः ॥३ ॥

॥ ४. अर्चनम् ॥

दृष्टान्तो विष्णुभक्तेस्सकुसुमतुलसीदामयुक्तार्चनायाः
गोदा देवी मम स्यात् हरिचरणरतिं वर्धयन्ती सदेयम् ।
यत्केशारोहधन्याः अनितरसुरभीस्सर्वगन्धोऽपि रङ्गी
मालास्संमानयन् ताः वहति नतशिरा ईश्वरेति ब्रुवाणः ॥४ ॥

॥ ५. वन्दनम् ॥

दृष्टान्तो विष्णुभक्तेः भुवि विततयशाः वन्दनाख्यायुतायाः
श्रीमान् मे त्यागराजः कलमधुरगिरा रामकीर्तिं प्रगायन्।
कावेरीं गानतीर्थां कलिमलकलुषं श्रोतुवर्गंश्च पूतं
कुर्वन् सङ्गीतमूर्तिर्दिशतु हरिरतिं सद्गुरुर्गायकानाम्॥५॥

॥ ६. पादसेवनम् ॥

दृष्टान्तो विष्णुभक्तेर्दशरथतनयः पादसेवापरायाः
कैकेयीसुप्रजाः यो भरत इति समैश्श्लोकितस्सार्थनाम्ना।
त्रय्यन्ताचार्यसूरेः भरतपरिषदि स्थायिनां प्रेक्ष्यता चेत्
आशास्या तत्प्रभावः कथमिव वचसा वर्णनीयो भवेन्मे? ॥६॥

॥ ७. सख्यम् ॥

दृष्टान्तो विष्णुभक्तेश्शतमखतनयस्सख्यमूर्तेश्च योऽसौ
भूयात् भूत्यै स पार्थो यमिह भगवान् व्याजवत्सं विधाय।
धेनूर्वेदान्तनाम्नीः सकलजनहितं गोरसं मान्यगीता
नाम्ना दुग्ध्वा ददौ नस्समरभुवि निजं विश्वरूपं प्रदर्श्य॥७॥

॥ ८. दास्यम् ॥

दृष्टान्तो विष्णुभक्तेर्विलसति महितो दास्यमूर्तेस्तु योऽसौ
भूयात् भूत्यै स विद्वान् पवनतनुभवो रामदूतः कपीशः।
हन्ताऽक्षाख्यस्य लङ्कादहनकृतिपटुः जानकीशोकवह्न्या
जीवातू रामरामानुजकपिपृतनाजानकीनां कृतीन्द्रः ॥८॥

॥ ९. आत्मसमर्पणम् ॥

दृष्टान्तो विष्णुभक्तेः जगति समुदितस्स्वात्मनामर्पणे सः
श्रेयो नस्संददातु प्रथितबहुगुणं घोषयोषित्समाजः ।
राधादी रासलीलारसपरवशचित् जीवशिष्टादिभक्तैः
नित्यं संस्तूयमानो द्रमिडनिगमगीः प्रार्थ्यभावाभिरामः ॥९॥

मालां माधवभक्तीनां दृष्टान्तैस्सुभगामिमाम् ।
*वेदविन्मित्रसन्तुष्ट्यै ग्रन्थाति स्म दयाकरः ॥१०॥

॥ इत्यदोहि भक्तिदृष्टान्तमाला ॥

***

---

*इयं माला श्रीमदुभयवे -घनपाठि- तिरुक्कण्णमङ्गैदेवनाथाचार्यैः आसप्तपूरुषमविच्छिन्नाध्ययनसंपदाढ्यकुले जातैः ग्रन्थ कर्तुः पितरि पितामहे च अन्यादृशां भक्तिं ग्रन्थकर्तरि च प्रेम दधानैः चोदितेन ग्रन्थकर्त्रा १९९२ तमवर्षे ग्रथिता । इदमत्र सूचितम् ।

॥ श्रीः ॥

१२. ॥श्रीपराङ्कुशदशोत्तरशतनामस्तोत्रम्॥

प्रपन्नजनसन्तानकूटस्थः परमाद्भुतम्।
पाण्ड्यदेशसमुद्भूतः कुरुकानगरीश्वरः ॥१॥

ताम्रपर्णीतटासक्तिः द्राविडाम्नायसूतिभूः।
कारिभूपतनूजातः स्वामिनीकुक्षिभूषणम्॥२॥

अतिसुन्दरदेहश्रीपरिपूर्णस्य भूमिका।
महावराहदीर्घाक्षिपातलब्धमहोदयः ॥३॥

जायमानकटाक्षाप्तविकासिमतिमण्डितः।
तिरस्कृतशठश्श्रीमान् शठारिर्ब्रह्मणो बृहत्॥४॥

अपीताम्बास्तनक्षीरः आकाश इव निर्मलः।
आदिनाथपुरः प्राप्तशिशुशय्याब्जषट्पदः ॥५॥

अस्वापतिन्त्रिणीवृक्षकोटरान्तरवस्थितः।
कृष्णतृष्णामयो मारः कृतिनामीश्वरो गुणी ॥६॥

यथार्थशठजित्संज्ञः जयादस्मन्मनस्ततेः।
पृतनापतिसंक्लृप्तपञ्चसंस्कारसंस्कृतिः ॥७॥

सरोयोगिवचः क्लृप्तदीपभासुरमानसः।
महसद्द्रमिडश्रीमद्भूतयोगिवचोरतः ॥८॥

महदाह्वयसन्दृष्टदंपती शरणं व्रजन्॥
भक्तिसारमहारत्ननिवासनगरीरतः ॥९॥

मधुराख्यकवीशश्रीमानसाम्बुजभास्करः ।
कुलशेखरराजेन्द्रशिरोभूषणपद्मपत् ॥१०॥

मङ्गलाशासनसक्तभक्तनाथसृतिप्रसूः ।
गोदास्वयंवराहूतसमस्तार्चादशाहरिः ॥११॥

भक्ताङ्घ्रिरेणुसङ्गीतजीवत्स्वलससन्ततिः ।
मुनिवाहनभोगार्यमार्गदर्शकवाक्कृतिः ॥१२॥

निजाम्नायषडङ्गानां प्रणेत्रा कविना स्तुतः ।
चतुर्वेदमयान् दिव्यान् प्रबन्धान् चतुरो दधत् ॥१३॥

उपकारस्मृतिपूर्वनिजवृत्तसुवर्णनः ।
संसारदुस्सहत्वोक्तिपरस्स्वादिमवाङ्मयः ॥१४॥

नाथस्वरूपभोगाढ्यद्वितीयग्रन्थभासुरः ।
हरितृष्णाभिवृद्धीड्यतृतीयग्रन्थगायकः ॥१५॥

यथेष्टफलसंप्राप्तिवर्णनान्तिमवाङ्मयः ।
मैत्रेयभूतनिजसत्प्रेमसश्चोदितरेणः ॥१६॥

दृप्तसङ्घकवीशानमक्षिकाविनतात्मजः ।
वीथिकापतदुच्छिष्टभुक्-श्चापवर्गदभूः प्रभूः ॥१७॥

संसारशमने स्पर्धां प्रभुणाऽपि दधत् प्रभुः ।
वकुलाभरणो वाग्मी पराङ्कुशमुनीश्वरः ॥१८॥

परवादिमदालापभञ्जनो विमलाशयः ।
तुरीयमुखपादेन तृणीकृतमृषामतः ॥१९।

प्रकटच्छन्नबौद्धाख्यमदवारणवारणः।
नाथसौशील्यचिन्ताप्तनिजषण्मासमूर्च्छनः ॥२०॥

नवनीतनटाहारनवनीतातिभोगदः।
नैच्यवाग्विरहाशङ्काभयकृद्भयनाशनः ॥२१॥

नायिकाभावनामूलं चतुर्थ्यर्थमतिं दधत्।
जननीभावनावाक्यैर्नमः पदमतिं दधत् ॥२२॥

वयस्याभावनावाक्यैः प्रणवार्थमतिं दधत्।
मूलमन्त्रार्थदो मूकः द्वयव्याख्यानतत्परः ॥२३॥

वेङ्कटाचलदेवेशचरणाम्बुजसन्निधिः।
तोताद्रीश्वरपादाब्जसाधनत्वकथारतः ॥२४॥

अपर्याप्तामृतसंबुद्धिप्रविद्धमुनिमानसः।
मणिवर्णसमाह्वानविलापितमहीरुहः ॥२५॥

मेघसुन्दररङ्गेशपादपङ्केरुहाश्रयः।
आरामाद्रिरमामुग्धभूमिकान्तरपेशलः ॥२६॥

निजदेहरतं देवं शपथेन निवारयन्।
देहत्यागं विना मुक्तिर्नेति शास्त्रस्य रक्षकः ॥२७॥

हरिसङ्कल्पविज्ञानजेतृतत्कामनायुतः।
सविभूतिकसर्वेशमहाभोगसुखान्वितः ॥२८॥

सामानाधिकरण्याङ्कवचसाऽद्वैतशिक्षकः।
अपर्याप्तामृतसंबुद्धिजीवितद्रामिडागमः ॥२९॥

रङ्गनाथमुनीशानमानसांबुजभास्करः ।
योगेऽपरोक्षतामेत्य द्रमिडागमसङ्ग्रदः ॥३० ॥

श्रीमद्यामुनयोगीशस्तोत्ररत्नगपत्स्तुतिः ।
पराशरादिवाग्भ्योऽपि परात्मरतिदायिवाक् ॥३१ ॥

धात्रीभूतयतीशानलालितस्ववचस्ततिः ।
पदत्राणपदारूढभाष्यकृद्विग्रहोज्ज्वलः ।३२ ॥

भविष्यत्गुरुतायुक्तभाष्यकृद्विग्रहप्रदः ।
कुरुकेशसुधीट्क्लृप्तटीकाभूषितवाङ्मयः ॥३३ ॥

श्रीवत्साङ्कितगोविन्दवर्णितार्थात्मवाक्ततिः ।
श्रीमद्वरदविष्णवार्यविष्णुचित्तादिसेवितः ॥३४ ॥

श्रीभट्टारकशिक्षाढ्ययोगिवर्णितभाववाक् ।
वरदार्यवचोजातमहाटीकाभिगुप्तगीः ॥३५ ॥

श्रीमत्कृष्णसुधीशानव्याकृतीडितवाक्ततिः ।
वादिकेसरिसंक्लृप्तपदयोजनयाऽढ्यगीः ।३६ ॥

श्रीमद्वेङ्कटनाथोक्तभावरस्यादिपद्यकः ।
तात्पर्यरत्नसङ्गाख्यभूषणोज्ज्वलवाङ्मयः ॥३७ ॥

वेदान्ताचार्यसञ्जातसारदर्शितसारवाक् ।
आचार्यहृदयव्याख्यासूक्तिभूषितवाङ्मयः ॥३८ ॥

श्रीजामातृमुनिप्रोक्तगाथाशतगसारवाक् ।
परकालयतीशानव्याख्ययाढ्यवचोगणः ॥३९ ॥

दशोपनिषदां भाष्यं दात्रा व्याकृतवाक्ततिः ।
साक्षात्स्वामिवचोगुप्तनिधिचारुवचश्चयः ॥४०॥

नानाटीकाभिसंसेव्यनवगम्भीरवाक्ततिः ।
श्रीमद्वेङ्कटशेषार्यसंस्कृतीकृतवाङ्मयः ॥४१॥

कलिकल्मषकालोऽस्मत्सूरिरित्यभिसन्नुतः ।
शठकोपमुनीद्-द्वारा हयसृष्ट्यादिनर्मकृत् ॥४२॥

अहंबुद्धिस्तुतिर्गीशः प्रह्लादसमताङ्गतः ।
स्वप्रबन्धारतेऽपीशपादुकात्वेन सङ्गदः ॥४३॥

स्वावासतिन्त्रिणीलम्बदिव्यदेशततीश्वरः ।
सुदुर्लभतया पार्थसूतवर्णितमातृका ॥४४॥

नायिकासुषमायुक्तकुरुकापूस्थविग्रहः ।
*सौन्दर्यताननगरे सदर्थं कृतसन्निधिः ॥४५॥

दशोत्तरशतं नाम्नां शठारेरित कल्पितम् ।
कविश्रीनिधिसूरीन्द्रतनयेन सतां मुदे ॥४६॥

---

*अलगप्पनगरे श्रीवेङ्कटेशालये ग्रन्थकर्तुः श्रीगीताभाष्यकालक्षेपगोष्ठिनिष्ठैः ''हाल्स्रोड् कण्णन्'' इति प्रसिद्धैः महाशयैः श्रीशठकोपदिव्यसूरेः मूर्तिः १९९२-तमवर्षे स्थापिता। तदात्वे तैश्चोदितेन ग्रन्थकर्त्रा श्रीशठकोपदिव्यसूरिः ११ गाथात्मकं एव दशकं रचयतीति पश्यता ११० नामानि इति नामावलिरियं ग्रथिता।

अयमेव इतिहासः सौन्दर्यताननगरे सदर्थं कृतसन्निधिः इत्यत्र ११० तम नामनि सूचितः। अलगप्पनगर इति पदं सौन्दर्यताननगरमिति परिवर्तितम्।

॥ श्रीः ॥

१२ ॥ श्रीपिल्लैपाकं - कल्याणजगन्नाथस्वामि- मङ्गलम् ॥

कल्याणीकामुकायाऽस्तु बालपाकनिवासिने ।
कल्याणदाय कल्याणजगन्नाथाय मङ्गलम् ॥१॥

कल्याणकोटिनाम्नेड्यविमानान्तर्निवासिने ।
बालपाकपुरे तस्मै जगन्नाथाय मङ्गलम् ॥२॥

यतिराजावतारश्रीमहाभूतपुरीं शुभाम् ।
समया वसते तस्मै जगन्नाथाय मङ्गलम् ॥३॥

पवमानसुतेनाऽग्रे धातोरिव गरुत्मतः ।
आदेशेनाभिसेव्याय जगन्नाथाय मङ्गलम् ॥४॥

आदेशार्थविचाराद्यैः यतिराजमतावनम् ।
योऽतनोत्तत्पुरीशाय जगन्नाथाय मङ्गलम् ॥५॥

पाकशासनरुद्रादिशासकाय परात्मने ।
पाकपाकनिवासाय जगन्नाथाय मङ्गलम् ॥६॥

नाथयामुनयोगीन्द्रदेशिकादिगुरूत्तमैः ।
सेव्यमानाय कल्याणजगन्नाथाय मङ्गलम् ॥७॥

पाकपाकपुरे रत्या नाकलोके विरक्तिमान् ।
प्रेक्ष्यते जगता योऽस्मै जगन्नाथाय मङ्गलम् ॥८॥

रामानुजरतायास्तु रामानुजपुरान्तिके ।
रामानुजात्तकैङ्कर्यलक्ष्यभूताय मङ्गलम् ॥९॥

कविश्रीनिधिपुत्रेण बालेन कलितां नुतिम्।
गृह्णतेऽस्तु सदा तस्मै जगन्नाथाय मङ्गलम्॥१०॥

पठतां मङ्गलं चेदम् सदा मङ्गलदायिने।
बालपाकनिवासाय नित्यश्रीर्नित्यमङ्गलम्॥११॥

॥ इत्यदोहि श्रीपिल्लैपाकं-कल्याणजगन्नाथस्वामि -मङ्गलम्॥

***

---

*अयं प्रबन्धः ग्रन्थकर्त्रा २००३ तमवर्षे श्रीपिल्लैपाकं श्रीग्रामे श्रीकल्याण-जगन्नाथस्वामिमन्दिर महासंप्रोक्षणसमये तत्र महतीं वरिवस्यां कृतवता वदान्य-वावदूकरामानुजनाम्ना मित्रेण श्री P.V. शेषाद्रिमहाशयद्वारा चोदितेन व्यरचि॥

॥ श्रीः ॥

२३ ॥ श्रीलक्ष्म्यष्टोत्तरशतनामनिरुक्तिस्तुतिः ॥

लक्ष्मीनामनिरुक्त्या लक्ष्मीनिधिसूनुरद्य तं नत्वा।
लक्ष्मीभक्तजनानां लक्ष्मीं दातुं प्रयत्नमाधत्ते ॥१॥

१. ॥ ओं प्रकृत्यै नमः ॥

प्रकृतिर्लक्ष्मीः कस्मात्? सेष्टे प्रकृतेर्यया हि देवो नः।
सृष्टिं कुरुते जगतां तस्याः प्रीत्यै तया सहाऽऽलोच्य ॥२॥

२. ॥ ओं विकृत्यै नमः ॥

विकृतिर्लक्ष्मीः कस्मात्? महदादि बहून् विकारनिचयान् सा।
प्रकृतिर्दृष्ट्यासास्याः अविकारस्सोऽपि वीक्षणादेव ॥३॥

३. ॥ ओं विद्यायै नमः ॥

विद्या लक्ष्मीः कस्मात्? हयवदनाङ्के स्थिता सती नित्यम्।
भ्रियते विद्याभर्त्रा या विद्या सा हि कोऽत्र सन्देहः ॥४॥

४. ॥ ओं कमलायै नमः ॥

अथ सा कमला कस्मात्? सर्वभूतहितप्रदा।
रक्षिका राक्षसीर्यस्मात् जुगोप पवनात्मजात् ॥५॥

५. ॥ ओं श्रद्धायै नमः ॥

श्रद्धा लक्ष्मीः कस्मात्? देव्या युक्तस्तया स देवो नः।
दीव्यति जगतस्तनुते सृष्ट्यादि च तत् तथा हि वेदोक्तिः ॥६॥



श्रीकोमलवल्ली (महालक्ष्मी) देवी, श्रीकुम्भघोणम् ॥

६. ॥ ओं विभूत्यै नमः ॥

कस्मात् विभूतिः प्रथिताब्धिजाता? विभूतिरैश्वर्यमितीर्यते तत्।
नित्यं च लीलेति विशेष्यमाणं तस्या यतो वेदविदो वदन्ति ॥७॥

७. ॥ ओं सुरभ्यै नमः ॥

सुरभिर्लक्ष्मीः कस्मात्? ननु रभ राभस्य इत्यदोधातोः।
स्वित्युपसर्गेद्धात् या त्वरया कुरुते दयां हि सुरभिस्सा ॥८॥

८. ओं परमात्मिकायै नमः ॥

लक्ष्मीः प्रोक्ता कस्मात् विबुधैः परमात्मिकेति देवीयम् ?।
स्वेच्छातः पत्नी यत् परमस्यार्थः तदात्मनो वेदात् ॥९॥

९. ओं वाचे नमः ॥

वागिति लक्ष्मीः कस्मात् नाम्ना विबुधैस्स्तुता विभातीयम् ?।
वाचां यद्वेदानां लक्ष्यं ज्ञेया तदीयवाचैषा ॥१०॥

१०. ॥ ओं पद्मालयायै नमः ॥

पद्मालयाम्बा परिवर्णितेयम् पद्माख्यपुष्पे वसतिर्यदस्याः।
पद्मादिलाभो भविता ध्रुवं नः पद्मालयेत्यस्य मनोर्जपेन ॥११॥

११. ॥ ओं पद्मायै नमः ॥

पद्-धातोर्मन्-योगे पद्मं सिद्धं भवेत् पदं तच्च।
गतिपरमिति मत्यर्थे सर्वज्ञाऽम्बा ततश्च पद्मेयम् ॥१२॥

१२. ओं शुचये नमः ॥

शुचिरिति लक्ष्मीः प्रोक्ता कस्मादिति चेत् नतान् समानेषा।
शुच्यति कुरुते शुद्धान् शुचिरिति जपतां पवित्रता सिद्धा ॥१३॥

१३. ओं स्वाहायै नमः ॥

स्वेदे धृततां याते विचिकित्सति तमाह या देवम्।
जुहुयाश्शुचिरिति तेऽहं वागिति देवी कथं न सा स्वाहा? ॥१४॥

१४.॥ ओं स्वधायै नमः ॥

स्वयं निधत्ते हरिवक्षसीयं
पदं विधत्ते प्रलयेऽथ तस्य।
एकाकिनो यत् सखितां च देवी
स्वयं स्वधा तेन रमाऽ*कथीयम्॥ १५ ॥

१५. ॥ ओं सुधायै नमः ॥

सुधा यथा स्वर्गनिवासिभिस्सा संधीयते तद्वदियं सुराणाम्।
पत्येति माता जगतां कवीन्द्रैः सुधेति वर्ण्या सुखदा चकास्ति ॥१६॥

१६. ॥ ओं धन्यायै नमः ॥

धनं सतां कृष्णपदम्बुजातं तदाप्य चाङ्के निदधाति यस्मात्।
धन्यां रमां तत्त्वविदो वदन्ति लब्धा धनं स्यात् जपतोऽस्य नाम्नः ॥१७॥

१७. ॥ ओं हिरण्मय्यै नमः ॥

हिरण्मयो यो रविमण्डलेऽस्ति तस्य प्रिया यद्दयिता रमेयम्।
हिरण्मयीं तां कथयन्ति तस्मात् हिरण्यवृद्धिर्जपतोऽस्य नाम्नः ॥१८॥

१८. ॥ओं लक्ष्म्यै नमः ॥

लक्ष्मीर्लक्ष्मीः कस्मात्? तत्त्वं परमं हि लक्ष्यति सा यत्।
स्थित्वा वक्षसि; "लक्ष्मीः *पत्नी च त" इति पुरुषसूक्तम्॥१९॥

---

*(अकथि-कथण् धातोः कर्मणि लुङ् ॥)
(*पत्नी तवेति च पुंसूक्तम्॥ इति पाठान्तरम्।)

१९. ॥ ओं नित्यपुष्टायै नमः ॥

नित्यं भगवत्सुषमा-पीयूषं या पिबेत् कथं न भवेत्? ।
पुष्टा नित्यं तत् श्रीः कथिता कविभिश्च नित्यपुष्टेति ॥२०॥

२०. ॥ ओं विभावर्यै नमः ॥

भासा यस्य विभाति सर्वमिति यः प्रोक्तो हरिर्ब्रह्म सः
यद्भासा नितरां विभाति कमला तस्मादित्यं प्रोच्यते ।
तत्वज्ञैस्तु विभावरीति सकलैस्तन्मङ्गलं भासयत्
द्रव्यस्यापि तदेव नाम कलितं सा भासयेन्नस्समान् ॥२१॥

२१. ॥ ओं अदित्यै नमः ॥

अखण्डितैश्वर्ययुताऽदितिस्स्यात् लक्ष्म्याः किमन्यो भवितास्य नाम्नः? ।
लक्ष्यं ततस्तां मुनयस्स्तुवन्ति तन्नाम संकीर्त्य तथैव वेदाः ॥२२॥

२२. ॥ ओं दित्यै नमः ॥

या खण्ड्येत् सा दितिरुच्यते नः दोषांश्च पापानि समानि देवी ।
निसर्गकारुण्यवशाद्द्यतीयं दितिश्च तस्मात् कमला स्वनाम्ना ॥२३॥

२३. ॥ओं दीप्तायै नमः ॥

दीप्ता स्वकान्त्या हरिवल्लभेयं श्रीरङ्गहर्म्ये किल मङ्गलार्थम् ।
न्यस्तस्य दीपस्य यथेति रेखा भट्टार्यवाचाप्यपि नाम चैतत् ॥२४॥

२४. ॥ओं वसुधायै नमः ॥

अष्टौ वसवो यस्मात् वसुरष्टावात्मसद्गुणान् ब्रूते ।
या तान् दधाति देवी वसुधानाम्ना स्तुवन्ति तां भक्ताः ॥२५॥

२५. ॥ ओं वसुधारिण्यै नमः ॥

वस्विति संपत् प्रोक्ता धारिण्यस्य तु नताय दातुं या ।
सा वसुधारिण्युक्ता वसुदेववधूस्नूषाऽभिधेयेन ॥२६ ॥

२६. ॥ओं कमलायै नमः ॥

कमला लक्ष्मीः कस्मात्? काम्यत इति सकललोकनाथेन ।
अपि; नामैतत् जपिता काम्यो भविता हि संपदां तूर्णम् ॥२७ ॥

२७. ॥ ओं कान्तायै नमः ॥

कान्तालक्ष्मीः कस्मात् ? कान्ता लोके यया हरेयुश्च ।
यूनां चित्तं कान्त्या सा तद्विभूतिलेशभूताः ॥२८ ॥

२८. ॥ ओं क्षमायै नमः ॥

क्षमा यदा मूर्तिमती भवेत् सा रमेति शास्त्रादधिगम्यते यत् ।
क्षमेति नाम्ना प्रथिताऽस्ति देवी क्षमाऽस्य नाम्नो जपतः फलेन्नः ॥२९ ॥

२९. ॥ ओं क्षीरोदसंभवायै नमः ॥

नित्यानपायिनी विष्णोरपि या क्षीरसागरात् ।
उत्थिता मथिताद्देवी नाम्ना क्षीरोदसंभवा ॥३० ॥

३०. ॥ ओं अनुग्रहपरायै नमः ॥

निग्रहो नोचितो नाथ! कार्यस्सर्वेष्वनुग्रहः ।
पाठयन्तीमिमं पाठं ह्यनुग्रहपरां विदुः ॥३२ ॥

३१. ॥ ओं बुद्धये नमः ॥

पशुं यथा यष्टिकरो नियच्छेत् तथा नरं नैव स देववर्गः ।
रिरक्षिषेद्यं किल योगमस्याः संप्रार्थ्य दद्यादिति बुद्धिरेषा ॥३२ ॥

३२. ॥ ओं अनघायै नमः ॥

अनघा लक्ष्मीः कस्मात्? अपकारिष्वपि दयावती यस्मात्।
इदमपि मारुतिकोपात् राक्षसवनिताभिरक्षणे दृष्टम्॥३३॥

३३. ॥ ओं हरिवल्लभायै नमः ॥

कस्माच्छ्रीर्हरिवल्लभेति कथिता वेदान्तविद्यायुतैः?
वाल्लभ्यं ह्यवलम्ब्य कोपकलुषं शुद्धं प्रसन्नं प्रियम्।
कृत्वागस्विजनस्य रक्षणमियं संपादयन्ती स्थिता
भक्तार्तेर्हरणात्तथाऽस्य कमितुर्मुख्यं हरित्वं च तत्॥३४॥

३४. ॥ ओं अशोकायै नमः ॥

प्रपन्नचर्यापरिदर्शनाय याऽ*शोकदावे वसतिं दधार।
तस्मादशोका परिकीर्तिता श्रीः फल्यादशोकत्वमदोजपेन॥३५॥

३५. ॥ ओं अमृतायै नमः ॥

अमराणाममरत्वं न पानादमृतस्य तत्।
अस्या वीक्षणादेवेत्यमृता प्रोच्यते रमा॥३६॥

३६. ॥ ओं दीप्तायै नमः ॥

दीप्ताऽग्निशिखा सीता रावण! दग्धो भवेरिति वचनतः।
तादृशदुष्टानां श्रीः दीप्ताग्निशिखेति दीप्तोक्ता॥३७॥

३७. ॥ ओं लोकशोकविनाशिन्यै नमः ॥

लोको हि शास्त्रं तदुदिरीतानां विलङ्घनात्तस्य तु शोक एव।
धर्म्येऽथ संस्थाप्य च लोकशोकविनाशिनीयं पथि भृत्यवर्गान्॥३८॥

---

*(अशोकदावः अशोकवनम्)

३८. ॥ ओं धर्मनिलायै नमः ॥

धर्मे तु नितरां देवी रतेति ज्ञायते यतः।
वर्णिता धर्मनिलया शक्रं प्रति रमोक्तितः ॥३९॥

३९. ॥ ओं करुणायै नमः ॥

दया यथा स्यात् धृतविग्रहेयं तथाऽब्धिकन्या करुणामयीति।
नामाऽथ क्लृप्तं करुणेति मान्यैः नाम्नोऽस्य पाठात् कमलाप्रसादः ॥४०॥

४०. ॥ ओं लोकमात्रे नमः ॥

स लोकशब्दो ननु लोकवासि-जीवान् समान् वक्ति यतस्त एते।
तस्यास्सुतास्तेन रमां वदन्ति तां लोकमातेति मनीषिवर्याः ॥४१॥

४१. ॥ ओं पद्मप्रियायै नमः ॥

मूर्तित्रये तं परमं मुकुन्दं संसूचयद्भाति हि नाभिपद्मम्।
इयं यथा तेन रमाप्रियं तत् पद्मप्रिया साऽथ रमा तथेयम् ॥४२॥

४२. ॥ ओं पद्महस्तायै नमः ॥

यत् पद्मयुगमं सततं विभर्ति स्वहस्तयुग्मेन रमा दयाढ्या।
तां पद्महस्तोति समीरयन्ति श्रीसूक्तमन्त्रार्थविदो महान्तः ।।४३.॥

४३. ॥ ओं पद्माक्ष्यै नमः ॥

पद्माक्षी कस्मात् श्रीः ? पद्मं सुरभि च सुशीतलं सौम्यम्।
चेतोहारि विशालं अक्ष्णोर्युगमपि तथा हि लक्ष्म्यास्स्तः ॥४४॥

४४. ॥ओं पद्मसुन्दर्यै नमः॥

पद्यत इति पद्मा श्रीः आर्तैरथ तन्मनोगतं शोकम्।
निजसुन्दरतनुकिङ्कर-हरिणा हरसीति पद्मसुन्दरि! पाहि ॥४५॥

४५. ॥ ओं पद्मोद्भवायै नमः ॥

मथितादब्धेः पद्मा पद्मासीनाऽक्षिगोचरा साऽभूत्।
पद्मेनोद्भव इति सा प्रोक्ता पद्मोद्भवा रमा देवी ॥४६ ॥

४६. ॥ओं पद्ममुख्यै नमः ॥

पद्यत इति पद्यं श्रीमुखमथ हरिणा प्रपद्यते पातुम्।
तत्रस्थामृतमिति तत् पद्ममुखीति श्रियोऽस्ति नामेदम् ॥४७॥

४७. ॥ओं पद्मनाभप्रियायै नमः ॥

परत्ववाची किल तस्य भाति संज्ञाविशेषस्त्विति पद्मनाभः।
तस्यानुरूपा दयिताऽनुकूला तद्पद्मनाभप्रियता रमायाः ॥४८॥

४८. ॥ ओं रमायै नमः ॥

रमतेऽस्यां नित्यं यत् भगवान् विष्णू रमाऽथ नाम्नेयम्।
जपति जने नामैतत् जनकौ जगतां रमेते तौ ॥४९ ॥

४९. ।। ओं पद्ममालाधरायै नमः ॥

ऐश्वर्यं पद्मशब्दोक्तम् मालास्तस्या समन्ततः।
दातुं धरति भक्तेभ्यः पद्ममालाधरा ततः ॥५० ॥

५०. ॥ ओं देव्यै नमः ॥

स वासुदेवो ननु देव एकः तया द्वितीयो भगवान् स्वधाम्नि।
अस्मानथाक्षानभिकल्पमानः देव्या श्रिया दीव्यति तेन देवी ॥५१ ॥

५१. ॥ ओं पद्मिन्यै नमः ॥

वात्स्यायनमतेनेयं पद्मिनी वनिता भवेत्।
पद्मिनीति ततो देवी पद्मनाभप्रियोच्यते ॥५२ ॥

५२. ॥ ओं पद्मगन्धिन्यै नमः ॥

पद्मकेसरसंमृष्टः स्मारयेद्रमणं यतः ।
निश्वासं पवनश्चास्याः प्रोक्ताऽसौ पद्मगन्धिनी ॥५३ ॥

५३. ॥ओं पुण्यगन्धायै नमः ॥

वासो यदीयो भविता हि शुद्ध्यै भक्तो यदीयस्सुरभिश्च कीर्त्या ।
पुण्यश्च गन्धो सततं यदीयः सा पुण्यगन्धेति समीरितेयम् ॥५४ ॥

५४. ॥ओं सुप्रसन्नायै नमः ॥

अन्याः प्रसन्ना अपि देवतास्ताः दद्युर्वरान् ये परिणामतस्स्युः ।
आत्मक्षयायैव न चैवमेषा तत्सुप्रसन्नेति रमेरितेयम् ॥५५ ॥

५५. ॥ओं प्रसादाभिमुख्यै नमः ॥

प्रवणाऽनुग्रहे यस्मात् प्रपन्नेष्टप्रदायिनी ।
प्रसादाभिमुखीं देवीं प्रवदन्ति मनीषिणः ॥५६ ॥

५६. ॥ओं प्रभायै नमः ॥

प्रभा रवेः प्राकृतखे स्थितस्य यथा तथाऽप्राकृतखे स्थितस्य ।
प्रभा रवेर्भाति रमेति तत्त्वम् सीतोक्तितश्चेत्यभिधा प्रभाऽस्याः ॥५७ ॥

५७. ॥ओं चन्द्रवदनायै नमः ॥

आह्लादयेद्यथा चन्द्रः आपन्नान् वदनं श्रियः ।
तथा तच्चन्द्रवदनेतीर्यते विबुधे रमा ॥५८ ॥

५८. ॥ ओं चन्द्रायै नमः ॥

आह्लादयन्ती विनतान् विभाति पुमर्थवृष्ट्या; पुरुषोत्तमं च ।
पुत्रोत्सवेनेव समागमेन जीवात्मनां; नाम ततो हि चन्द्रा ॥५९ ॥

५९. ॥ओं चन्द्रसहोदर्यै नमः॥

सहोदिता चन्द्रमसाऽवतारे क्षीराब्धितो या मथितात्सुराणाम्।
रसायनायेति परेण चन्द्र-सहोदरी तेन रमेरितेयम्॥६०॥

६०. ॥ ओं चतुर्भुजायै नमः॥

पुरुषार्थानपि सद्यो दातुं सज्जा नताय देवीयम्।
दर्शयितुं तद् धत्ते बाहून् चतुरश्चतुर्भुजा तेन॥६१॥

६१. ॥ ओं चन्द्ररूपायै नमः॥

चन्द्रस्य रूपं भविता यथेह लोकस्य सर्वस्य हृदोऽस्य तृप्त्यै।
तद्वद्रमाया अपि रूपम स्मात् सा चन्द्ररूपेति समीर्यते श्रीः॥६२॥

६२. ॥ ओं इन्दिरायै नमः॥

इदि परमैश्वर्ये स्यात् इति धातुश्चेन्दिरेतिशब्दोऽयम्।
तस्माद्धातोर्लब्धः परमं लक्ष्म्याः ब्रवीति चैश्वर्यम्॥६३॥

६३. ॥ ओं इन्दुशीतलायै नमः॥

भवतपन-तप्त-जन्तोः इन्दुरिव च शीतला यस्मात्।
देवीन्दुशीतला श्रीः नाम्ना प्रोक्ता तथा हि सा लक्ष्मी :॥६४॥

६४. ॥ ओं आह्लादजनन्यै नमः॥

आह्लादं नित्यं श्रीः मोक्षं दत्वा प्रपन्नसंघाय।
जनयति तस्मात् कमला प्रोक्ताऽऽह्लादजननीति देवीयम्॥६५॥

६५. ॥ ओं पुष्ट्यै नमः॥

पुष्टो भगवान् यस्याः सङ्गात् लोकस्समोऽपि यदृष्ट्या।
तस्मादेषा पुष्टिः प्रोक्ता नाम्ना समस्तमाता श्रीः॥६६॥

६६. ॥ ओं शिवायै नमः ॥

मङ्गलदात्री माता शरणं कृपया यदस्ति लक्ष्मीर्नः ।
शेते सर्वं चास्या यत्तूपस्थे शिवेति सा प्रोक्ताः ॥६७॥

६७. ॥ओं शिवकर्यै नमः ॥

स्वप्ने शीङितिधातोः निष्पन्नोऽयं ब्रवीति भद्रं यत् ।
शिव इति शब्दोऽस्य श्रीः कर्त्री तत् शिवकरीति नामास्याः ॥६८॥

६८. ॥ ओं सत्यै नमः ॥

अस्तीति शब्देन सदाभिवर्ण्यो देवः परस्तेन सहैव भाति ।
प्रिया तदीया कमला सदेयम् सतीति नाम्ना प्रथिता ततश्च ॥६९॥

६९. ॥ ओं विमलायै नमः ॥

हेयानां दूरे श्रीः निखिलानां वर्तते गुणानां यत् ।
विमला नाम्ना कमला प्रोक्ता देवी तदीयतत्त्वज्ञैः ॥७०॥

७०. ॥ ओं विश्वजनन्यै नमः ॥

विश्वस्यैषा जननी तस्माद्विश्वजननीति नामाऽस्याः ।
वृद्धैः पठितं जपतो मातेव श्रीरवेन्निजान् पुत्रान् ॥७१॥

७१. ॥ ओं तुष्ट्यै नमः ॥

तुष्टिर्दुरापा ननु दृश्यते सा वित्तेन कीर्त्याप्यपि भोगतश्च ।
येष्वप्रसन्नाऽथ रमा प्रसन्ना येष्वाप्यते तैरिति सा च तुष्टिः ॥७२॥

७२. ॥ओं दारिद्र्यनाशिन्यै नमः ॥

कुबेरीकुरुते दृष्ट्या कुचेलसदृशं जनम् ।
यस्मादेषा रमा तस्मात् प्रोक्ता दारिद्र्यनाशिनी ॥७३॥

७३. ॥ओं प्रीतिपुष्करिण्यै नमः॥

पुष्कैररञ्चिते तीर्थे संज्ञा पुष्करिणी यतः।
प्रीतिस्तत्राधिका देव्याः प्रीतिपुष्करिणी च सा॥ ७४॥

७४. ॥ओं शान्तायै नमः॥

शान्ताभ्रातुः पत्नी विभवे शान्ता नाम्ना स्वयमपि लक्ष्मीः।
शान्ता यस्मान्नित्यं तस्याः शान्ता नाम्नो जपतस्स्याम॥७५॥

७५. ॥ ओं शुक्लमाल्याम्बरायै नमः॥

शुक्लमल्लीसुमैः क्लृप्तमालाऽस्या वसनं तथा।
शुक्लकौशेयमित्येषा शुक्लमाल्याम्बरा रमा॥७६॥

७६. ॥ ओं श्रियै नमः॥

श्रृणोति भक्तार्तरवं पतिं स्विकं तं श्रावयत्वेवमियं श्रयेत।
तं श्रीयमाणा निजभक्तसंघैः श्रीणाति तेषामघसन्ततिं च।
शृणात्यपक्कानथ पाकबुद्धीन् षोढा रमा श्रीरिति षड्पदीयम्॥७७॥

७७. ॥ ओं भास्कर्यै नमः॥

भास्कर-मण्डल-भासक-वक्षस्-स्थलभासनपटुरेषा लक्ष्मीः।
भास्कर्यभिधाजुष्टा भद्रं भविता जपतामेतन्नाम॥७८॥

७८. ॥ओं बिल्वनिलयायै नमः॥

अस्या वृक्षो बिल्वो वेदे प्रोक्तोऽथ बिल्वनिलयेयम्।
कमला नाम्ना तस्मात् एतज्जपतामरोगता सिद्धा॥७९॥

७९. ॥ओं वरारोहायै नमः॥

वरस्तुङ्गमूचे तथारोहणेन पदं प्रोक्तमेवं यदीयं पदं तु।
वरं लोकवर्ण्यं रमा तेन देवी वरारोहवाचस्त्रिया साभिधेन्धे॥८०॥

८०. ॥ओं यशस्विन्यै नमः॥

कृष्णस्य नामाऽथ महद्यशस्स्यात् तथा श्रुतं तित्तिरिवेदमस्ते।
यशस्विनीयं यदयं श्रियस्तत्- नाम्ना रमां वेदविदो गृणन्ति॥८१॥

८१. ॥ओं वसुन्धरायै नमः॥

वसु धनमेतद्दातुं निजभक्तजनेषु या दधातीह।
तस्मान्नाम्ना लक्ष्मीः प्रोक्ता भक्तैर्वसुन्धरेतीयम्॥८२॥

८२. ॥ओं उदाराङ्गायै नमः॥

उदारं सुन्दरं प्रोक्तं ह्युदाराणि श्रियो यतः।
अङ्गान्यस्यास्ततः प्रोचुरुदाराङ्गामिमां बुधाः॥८३॥

८३. ॥ओं हरिण्यै नमः॥

हरत्यघं भक्तजनस्य देवः हरिस्ततः केशव एष नाम्ना।
तस्यापि चित्तं हरतीति लक्ष्मीः हरिण्यभिख्यामहिता विभाति॥८४॥

८४. ॥ओं हेममालिन्यै नमः॥

हेम्नैव कृप्तामिह मालिकां या बिभर्ति नित्यं महितां रमेयम्।
तद्धेममालिन्यभिधासमेता विभाति वन्द्या कमलाऽब्धिकन्या॥८५॥

८५. ॥ओं धनधान्यकर्यै नमः॥

धनं धान्यं भवेदेतत्त्वभिवृद्धं यदीक्षया।
धनधान्यकरी तस्माद्रमा नाम्ना समेधते॥८६॥

८६. ॥ओं सिद्ध्यै नमः॥

मेदिन्यभिख्यो ननु कोश ऊचे पादावनीं सिद्धिमियं तु भूत्वा।
मेदिन्यपत्यं त्वपि वृत्तिमस्या इयेष तस्मादपि सिद्धिरेषा॥८७॥

८७. ओं स्त्रैणसौम्यायै नमः ॥

नारीस्वभावे भविता पदं तत् स्त्रैणं रमा तेन विभाति सौम्या।
अज्ञातदण्डा सततं प्रसन्ना तत्स्त्रैणसौम्येति विभाति नाम्ना ॥८८॥

८८. ॥ ओं शुभप्रदायै नमः ॥

शुभं हि मोक्षस्समचेतनानां अस्याः प्रसादान्न भवेद्गते सः।
शुभप्रदा तेन समीरितेयं शुभाय जप्यो मनुरेष नित्यम् ॥८९॥

८९. ॥ ओं नृपवेश्मगतानन्दायै नमः ॥

प्रजापालनसक्तस्य यत्प्रसादात् गृहे मुदः।
नृपवेश्मगतानन्दा रमा तस्मात् प्रकीर्तिता ॥९०॥

९०. ॥ओं वरलक्ष्म्यै नमः ॥

वरं केसरवाचि स्यात् तद्वर्णामोदभोग्यताः।
अस्याः प्रसादतस्तस्माद्वरलक्ष्मीयमीरिता ॥९१॥

९१. ॥ ओं वसुप्रदायै नमः ॥

नारायणश्रीचरणाम्बुजाख्यं धनं तदिष्टं वसु तत् श्रितेभ्यः।
एषा प्रदत्ते कमला ततश्च वसुप्रदां तां मुनयो वदन्ति ।९२॥

९२॥ ओं शुभायै नमः ॥

शुभेति कान्तिं कवयो वदन्ति शुभंयुबृन्दैरभिवन्द्यमाना।
शुभाय लोकस्य शुभा यदीया शुभेति नामाऽस्य जपे शुभं स्यात् ॥९३॥

९३. ॥ओं हिरण्यप्राकारायै नमः ॥

प्राकाराश्च हिरण्येन कल्पिताः कमलागृहे।
कमला तेन हिरण्यप्राकारेति समीरिता ॥ ९४॥

९४. ॥ओं समुद्रतनयायै नमः॥

मथितादुदधेर्जाता माधवप्रेयसी रमा।
मुनिभिःकथिता तस्मात् समुद्रतनयाख्यया॥९५॥

९५. ॥ओं जयायै नमः॥

जयो मुकुन्दस्य सदा रणेषु न चक्रतो नापि शरैः परं तु।
तत्तेजसा तेन रमा जयेति नाम्ना मुनीन्द्रैः परिगीयतेऽसौ॥९६॥

९६॥ओं मङ्गलायै नमः॥

श्रीर्मङ्गला मङ्गलदायिनीयम् नामाऽपि तस्या मुनिभिस्तदेव।
क्लृप्तं तदेतज्जपतां जनानां श्रीर्मङ्गलं संततमातनोति॥९७॥

९७. ॥ ओं देव्यै नमः॥

देवस्य दिव्या कमला सदृक्षी देवी तथा तस्य समास्वथापि।
क्रीडासु साहाय्यमियं तनोति देवीति नाम्रा प्रथिता विभाति॥९७॥

९८. ॥ओं विष्णुवक्षस्स्थलस्थितायै नमः॥

पश्यतां सर्वदेवानां गत्वा वक्षस्स्थलं हरेः।
स्थिता तत्र रमा नित्यं विष्णुवक्षस्स्थलस्थिता॥९९॥

९९. ॥ओं विष्णुपत्न्यै नमः॥

प्रपन्नसंरक्षणयज्ञदीक्षां दधाति विष्णुः कमलाऽस्य पत्नी।
तद्विष्णुपत्नी प्रथिता ततोऽसौ मन्त्रेऽपि गायत्र्यभिधे तदीये॥१००॥

१००. ॥ओं प्रसन्नाक्ष्यै नमः॥

प्रसन्ने त्वक्षिणी यस्याः भक्तेषु च तथा प्रिये।
प्रसन्नाक्षीति नाम्नेयं वर्ण्यते कमला बुधैः॥१०१॥

१०१. ओं नारायणसमाश्रितायै नमः ॥

नारायणं समाश्रित्य भक्ताधध्वंसनं रमा।
याचते नित्यमेवेति नारायणसमाश्रिता ॥१०१॥

१०२. ॥ओं दारिद्र्यध्वंसिन्यै देव्यै नमः॥

दारिद्र्यध्वंसनं कृत्वा भक्तानां दीव्यतीति सा।
दारिद्र्यध्वंसिनी देवी नामनी द्वे त्विमे युते ॥१०३॥

१०३. ॥ओं सर्वोपद्रववारिण्यै नमः॥

सर्वानुपद्रवानेषा भक्तानां वारयेदिदम्।
शीलमस्या इति ह्येषा सर्वोपद्रववारिणी ॥१०४॥

१०४. ॥ओं नवदुर्गायै नमः॥

निग्रहस्य हरेरेषा दुःखतो गमतं श्रिते।
नवीभूतं तनोतीति नवदुर्गा रमेरिता॥ १०५॥

१०५. महाकाल्यै नमः॥

महानसौ सन् कननीति देवः महाक इत्यस्य रमा यदाली।
कालीं ततस्तां च महाप्रपूर्वां नतास्स्तुवन्तीह बुधास्तु केचित्॥१०६॥

१०५. ॥ओं महादेव्यै नमः॥

मन्त्रे तदीये महतीति देवी सा कीर्तिता हस्तिगिरो तथैव।
देवी तदाख्या हि महाप्रपूर्वा पठ्येति केचित्तु बुधा वदन्ति॥१०७॥

१०६. ॥ओं ब्रह्मविष्णुशिवात्मिकायै नमः॥

ब्रह्मा शिवो यदाज्ञप्त्यै प्रेमतो विष्णुरेव च।
तस्मादियं रमा प्रोक्ता ब्रह्मविष्णुशिवात्मिका॥१०८॥

१०७. ॥ओं त्रिकालज्ञानसंपन्नायै नमः॥

अतीतानागतानेहोवर्तमानक्षणस्थितान्।
त्रिकालज्ञानसंपन्ना जानातीति रमेरिता॥१०९॥

१०८. ॥ओं भुवनेश्वर्यै नमः॥

ईशाख्यधातोर्वरटा युते स्या-दौणादिके ङीप्-सहितात् तु सिद्धः।
यदीश्वरीशब्द इहेश्वरार्थे लोकस्य सा तद्भुवनेश्वरीयम्॥११०॥

पुरुषोत्तमनगरे श्रीः नाम्ना भुवनेश्वरी विभातीयम्।
तन्नामोक्त्या पूर्तौ सूचयति नुतिर्महाप्रसादाप्तिम्॥१११॥

करुणाकरबुधकविना कमलाष्टोत्तरशताभिधानानाम्।
कमलापदभक्तमुदे कृतानीत्थं निरुक्तिपद्यानि॥११२॥

करुणाकरसंबुद्ध्या कान्तं संप्रार्थ्य पार्वतीलब्धे।
करुणाकरकविनेयं विवृतिः कलितेति शोभते सर्वम्॥११३॥

शास्त्रसाहितीवल्लभोदितं कृष्णवल्लभापादयोरिदम्।
अर्पितं पठन् स्तोत्रमद्भुतं सर्वसंपदामालयो भवेत्॥११४॥

॥ इति श्रीमदुभयवे. विल्लूर. नडादूर. श्रीभाष्यसिंहासनाधिपति
श्रीमदाशुकविसार्मवभौमतनयेन तदाङ्घ्रियुगल
सेवालब्धसर्वतोमुखविज्ञानेन शास्त्रसाहितीवल्लभादि
बिरुदततिमण्डितेन करुणाकराचार्येण विरचिता
लक्ष्म्यष्टोत्तरशतनामनिरुक्तिस्तुतिः
संपूर्णा॥

***



श्रीमान् (नवनीत) हनुमान्, श्रीरङ्ग श्रीमदाण्डवन् आश्रमाधीन
-वैकुण्ठनाथमन्दिरम्, नवदेहली ॥

॥ श्रीः ॥

१४. ॥ नवनीतहनुमत्-शतकम् ॥

(॥ प्राभञ्जनिप्रासशतकम् ॥)

॥१. प्रारम्भप्रकरणम् ॥

नवनीतमयं नौमि नवसंवत्सरे कपिम्।
नवमीजपदासक्तम् नवव्याकृतिपण्डितम्। ०१.०१.२००६ ॥१॥

निषङ्गी नवनीतेन निषङ्गी स्वजनेषु च।
"निषङ्गी" यजुषां लक्ष्ये निषङ्गी क्षेमदोऽस्तु मे ॥०२.०१.२००६ ॥२॥

नवनीतविलिप्ताङ्गो नवनीतविलेपनम्।
नवं चक्रे यदीयानां नवं मां तनुतादयम्॥ ०३-०१.२००६ ॥३॥

नटढक्काजसूत्राणां स्फुटं वेत्ता गिरां मुनेः।
घटजस्य हृदं केतुपटस्थः क्षेमदोऽस्तु मे ॥०४.०१.२००६ ॥४॥

अनुमानवतां श्रेष्ठो हनुमानस्तु मे श्रियै।
मनुवंश्यहरेर्नाम्ना मनुमानिति विश्रुतः ॥ ०५.०१.२००६ ॥५॥

अञ्जनाभतनौ रक्तं अञ्जनातनयं भजे।
भञ्जनं द्विषतां धत्ते रञ्जनं स्वजनस्य यः ॥०६. ०१.२००६ ॥६॥

रामाङ्गवर्णनं कृत्वा श्यामां रामस्य सुन्दरीम्।
भा-मा-पूर्णमुखीं चक्रे यो मां पायात् स मारुतिः ॥०७.०१.२००५ ॥७॥

बाहुवेगेऽतुलं लोके प्राहुर्यं स कपीश्वरः।
राहुमातुर्निहन्ता मां राहुकेतुभयादवेत् ॥०८.०१.०६ ॥८॥

मन्देतरदयायुक्तं मन्दसोदरमन्त्रिणम्।
मन्दपीडानिवृत्यर्थं मन्दरेण समं भजे ॥०९.०१.०६ ॥९॥

आयुषाऽथ सुदीर्घेण वायुसूनुमलङ्कृतम्।
ना युतस्सेवमानस्स्यादायुषा महता भुवि ॥१०.१.०६ ॥१०॥

हेमाचलसमाकारं रामाङ्घ्रिरतमाश्रये।
सामादिवेदसारज्ञं सीमातीतयशोनिधिम् ॥११.०१.०६ ॥११॥

स पिता पवनो यस्य कपिवर्यश्च केसरी।
अपिवद्वचनं यस्य कपिसिंहस्स मामवेत् ॥१२.०१.०६ ॥१२॥

स्कन्दतातांशमूर्तिर्यो मन्दतातेन शिक्षितः।
कन्दुकीकृतकैलासनन्दनारिस्स मामवेत् ॥१३.-०१.०६ ॥१३॥

वातात्मजातमीडेऽहं सीताशोकहरं कपिम्।
पातालाद्भवनाम्नो मां पाताऽस्ते यस्य विक्रमः ॥१४.०१.०६ ॥१४॥

करिराजगतौ मायानरि विष्णौ सदा रतः।
अरिनाशमसौ कृत्वा परिपातु कपिस्स माम् ॥१५.०१.०६ ॥१५॥

पलाशदण्डपाणिस्सन् पलाशनिधनं दधत्।
फलाशालक्ष्यसूर्योऽव्यात् मलान्याश्वपहृत्य माम् ॥१६.०१.०६ ॥१६॥

हरिपादरतो नित्यं हरिराजस्य मन्त्रिषु।
गरिमादिसुसिद्ध्याढ्यः हरिभक्तिं दधातु मे ॥१७.०१.०६ ॥१७॥

हस्ते भेषजगोत्रेन्द्रं हस्तिवक्त्रपितुः प्रियम्।
मस्तके च दधत् पायात् निस्तुलो मां कपीश्वरः ॥१८.०१.०६ ॥१८॥

नादागमरसज्ञोऽयं पादाब्जे ध्यायतस्सदा।
वेदाननस्य सर्वस्वं दाता मे नात्र संशयः ॥१९.०१.०६ ॥१९॥

वरुणालयमातीर्णः करुणामिव रूपिणीम्।
तरुमूले समासेवी कुरुतात् करुणां मयि।२०.०१.०६ ॥२०।॥

२.अच्-प्रकरणम्

अङ्गदादिनुतो दद्यात् मङ्गलं मारुतिर्मम।
रङ्गनाथरते तस्मिन् तुङ्गकीर्ती रतेस्सदा॥२१.०१.०६ ॥२१॥

आनन्दं ब्रह्मणो विद्वान् सानन्दान् तनुतात् नतान्।
वीनं दमयतो वेगात् सानन्दो यस्य राघवः॥२२.०१.०६ ॥२२॥

इनमीडे हरीन्द्रैस्तं पनसादिभिरानतम्।
वनवासरते सक्तं जनकस्य गिरा हरौ॥२३.०१.०६ ॥२३॥

ईरयन्तं सदा रामतारकं तमहं भजे।
नीरधिं प्रसुमुत्तीर्णं कीरवाण्याः कृते कपिम्॥२४.०१.०६ ॥२४॥

उदये द्युमणिं स्वीये उदये ग्रसितुं प्लुतः।
हृदयं मेऽधिरूढस्सन् सदयं संप्रसीदतु॥२५.०१.०६ ॥२५॥

ऊनकार्यरतात्तस्मात् हीनराक्षसपुङ्गवात्।
येन देव्युद्धृता चित्तं तेन मे नाथवत् सदा॥२६.०१.०६ ॥२६॥

ऋक्षवृद्धवचोवृद्धः यक्षजातारिपौ रतः।
रक्षसां नाशको भूयाद्रक्षणाय सदा मम।। २७.०५.०६ ॥२७॥

ऋणाति निजगानेन घोणाहरिसमाकृतिः।
वीणामुनेश्च जेताऽयं शोणायितहनुः कपिः॥२८.०५.०६ ॥२८॥

एक एव समर्थो योऽशोककाननभञ्जने।
साकमेष मया भूयात् पाकचिन्ता हरन् मम॥२९.०१.०६ ॥२९॥

ऐन्द्रशत्रुकपेर्मित्रं ऐन्द्रव्याकृतिवल्लभम्।
ऐन्द्रकाकाक्षिहारीष्टं सान्द्रभक्तिरहं भजे।३०.०१.०६॥३०॥

ओघमेघस्स्वनो वाग्मी मेघनादरणेऽस्त्रजम्।
मोघमाकलयद्बन्धं राघवे भक्तिमान् कपिः॥३१.०१.०६॥३१॥

औषधाद्रिधरो जैत्रघोषदो ध्वजमास्थितः।
तोषदः पाण्डवानीके भीष्यन् कुरुवाहिनीम्।०१.०२.०६॥३२॥

अं सदा भावयन्तं तं अंसदेशे निजे स्थितम्।
संसरत्तापहर्तारं तं सरण्युसुतं भजे॥०२.०२.०६॥३३॥

अ इत्यभिधया ख्याते स इन्धे भक्तिमान् कपिः।
अ-इ-उण् मुखसूत्राणां य इहैको रहस्यवित्।०३.०२.०६॥३४॥

३. हल्-प्रकरणम्

कनकाचलसंकाशः मनसा धृतराघवः।
पनसापूर्णकुक्षिर्मे धनमैन्द्रं ददातु सः॥०४.०२.०६॥३५॥

खगराजसमो वीर्ये खगसंपातिवाक्यतः।
सगरात्मजतामाप्तं गगनेन तरन्नवेत्॥०५.०१.०६॥३६॥

गतिमान् मतिमानेष पतिदूतस्समागतः।
इति यो मानितो देव्या पतितं पालयेत् स माम्॥०६.०२.०६॥३७॥

धनमध्ये चरन् लङ्कावनमध्येऽथ जानकीम्।
धनदुःखादवन्पातु धनदानुजभीतिदः॥०७.०२.०६॥३८॥

ङादिशब्दं न जानेऽहं वेदिवह्निरिव ज्वलन्!।
आदिमूलपदे सक्त! स्वादिमूलर्क्षा! रक्ष माम्।०८.०२.०६॥३९॥

चयं सर्वकलानाञ्च जयं सर्वरणेष्वपि।
अयं चापि दद्रक्षेत् अयं मां कपिपुङ्गवः ॥०९.०२.०२॥४०॥

छायापतिविनेयोऽसौ मायानरि सदा रतः।
मायाः क्लेशहरो वाग्भिः पायादस्मानपायतः ॥१०.०२.०६॥४१॥

जयं राघवसेनायां नयं वाचि निरन्तरम्।
श्रियं चाऽपि सदा भक्तेष्वयं दत्ते महाकपिः।२१.०२.०६॥४२॥

झषकूर्मादिरूपेषु तुषबुद्धिं ददत् स्वयम्।
सुषमां राघवस्यैष इषमातनुते मतेः ॥१२.०२.०६॥४३॥

ञादिरस्ति पदं नैव मेदिनीतनयाकृते।
सूदिताऽशोकदाव त्वं वादिभीकर! रक्ष माम् ॥१३ .०२.०६॥४४॥

टङ्कहस्तकृतं पुण्यं टङ्कयत् हरता सदा।
कङ्कराजप्रियेणाहं अङ्कितस्वहृदं भजे ॥१४.०२.०६॥४५॥

ठान्तं पादिं स्वयं छायाकान्तं नत्वाऽप्तवान् कपिः।
शान्तं रामं सदा ध्यायन् स्वान्तं भूषयतान्मम ॥१४.०२.०६॥४६॥

डमरोरुदितं सूत्रं कमलस्याप्ततो भजन्।
अमलस्वान्तगम्भीरः मम शं तनुतां कपिः ॥१६.०२.०६॥४७॥

ढालिवर्गं जयन् युद्धे मालिनं जम्बुपूर्वकम्।
वालिसोदरमन्त्री मां केलिमानवतात् कपिः ॥१७ .०२.०६॥४८॥

णान्तकाव्यमहाहारे भान्तमेनं महाकपिम्।
शान्तमेवं भजत् चित्तं नान्तमेति मुदो मम ॥१८.०२.०६॥४९॥

तमसातीरवासी यं कमलादु:खहारिणम्।
तमसो दूरगं वक्ति नमसाऽहं वृणोमि तम् ॥१९.०२.०६ ॥५० ॥

थं तमौषधपूर्णं यः थं हरन् सुहृदामधात्।
थं ददत् भजतामेष थं परं भाति वानरः ॥ २०.०२.०६ ॥५१ ॥

दयानिधिमहं मान्यं नयानमाश्रयं श्रये।
मयात्मजापतौ येन भयावतरणं कृतम् ॥२१.०२.०६ ॥५२ ॥

धनदानुजसैन्यं यो घनघोषेण भीषयन्।
वनमस्य बभञ्जासौ घनकान्तिरतो जयेत् ॥२२.०२.०६ ॥५३ ॥

नगराजसुतातिथ्यं खगराजजवस्स्वयम्।
न गतो कार्यसक्तोऽसावगदोऽस्तु सदा मम ॥२३.०२.०६ ॥५४ ॥

पलाशसैन्यहन्ताऽसौ कलासु कुशलः कपिः।
नलादिसुहृदामिष्टो मलानि नुदतान्मम ॥२४.०२.०६ ॥५५ ॥

फलायते रविर्यस्य पलायन्ते निशाचराः।
बलाद्यस्य परं भीताः कलादक्षो विभाति सः ॥२५.०२.०६ ॥५६ ॥

बलारिसुतहन्तुर्यो बलाधानपटुः कपिः।
स लाभाय भवेदस्मै शिलायुधधरः प्रभुः ॥२६.०२.०६ ॥५७ ॥

भजतां क्षेमदो भक्त्या गजवक्त्रपितुः कपिः।
निजवीर्योदितो नित्यं गजसंपत्प्रदोऽस्तु मे ॥२७.०२.०६ ॥५८ ॥

मनसोऽपि द्रुतं गच्छन् पनसादिभिरीडितः।
घनवर्णे रतो रामे मनसि स्तात्सदा मम ॥२८.०२.०६ ॥५९ ॥

यक्षकन्या हता येन रक्षसां जातिमाश्रिता।
पक्षमस्य जयं नेता रक्षतान्मारुतिस्स माम् ॥०१.०३.२००६ ॥६० ॥

रजनीशमुखं रामं गजतुल्यगतिं च यः।
सजयं कुरुते नित्यं भज तं वायुनन्दनम् ॥०२.०३.०६ ॥६१ ॥

लवतातरतं नौमि लवणाब्धिं पुरा तरन्।
अवनं योऽतनोत्तस्या अवनीदुहितुः कपिः ।०३.०३.२००६ ॥६२ ॥

वनजायतनेत्रं तं मनसा चिन्तयन् सदा।
कनकाचलसङ्काशो जनयेन्मम सद्गतिम् ।०४.०३.०६ ॥६३ ॥

शतयोजनविस्तीर्णं प्लुतमब्धिमहं ततः।
कृतराघवकैङ्कर्यं स्तुतमीडेऽपि सीतया ॥०५.०३.०६ ॥६४ ॥

षडङ्गानाप यो वेदान् फडं मत्वा वृतात् पुरा।
अडन्धीरहितं सोऽयं जडं मां पालयेत् कपिः ॥०६.०३.०६ ॥६५ ॥

सवनादावशक्तोऽहं पवनात्मज! ते कृपाम्।
अवनायाश्रये दासः नवव्याकृतिपण्डित! ॥०७ .०३.०६ ॥६६ ॥

हलपद्धितिनाम्राढ्यां खलरावणपीडिताम्।
अलमेकः परित्रातुं मलनाशाय मेऽप्यसौ ॥०८.०३.०६ ॥६७ ॥

४.अङ्गवृत्तान्तप्रकरणम्

लङ्कारक्षकराक्षस्याश्शङ्कादायिभुजाबल!।
शङ्कादूरां शणेर्बुद्धिं शं कामपि च संपदम् ॥०९.०३.०६ ॥६८ ॥

अक्षराक्षसतातादिवक्षोभेदकसद्भुज!।
अक्षरास्यवरं कृत्वा रक्ष मां पवनात्मज! ॥१०.०३.०६ ॥६९ ॥

भुजसारसमानीतनिजपक्षजय! प्रभो ! ।
गजवक्त्रादिभिश्श्लाघ्य! भजतः कुरु मे दयाम् ॥११.०३.०६ ॥७०॥

भुजमूले पुरा धृत्वा गजतुल्यगती प्रभू ।
भजतादिति सुग्रीवं भजमानमहं भजे ॥१२.०३.०६ ॥७१॥

कार्यालये नराः केचित् वार्यादिसदृशाः स्थिताः ।
आर्यालयानुकंपाया वार्यास्तान् बाधनान्मम ॥१३.०३.०६ ॥७२॥

नार्यासक्तिर्न ते धीर! कार्याणां साधने क्षम! ।
आर्यासक्ता सदा धीस्ते कार्यास्मिन् करुणा त्वया ॥१४.०३.०६ ॥७३॥

पुच्छवह्निमुपादाय स्वच्छलङ्कापुरीं दहन् ।
कच्छपं चादिमं वोढा यच्छतात् कुशलं मम ॥१५.०३.०६ ॥७४॥

भेषजाद्रिभुजो भाति वेषमानुषसक्तधीः ।
कोषपूरकवीक्षाढ्यो द्वेषलोभादिवारकः ॥१६.०३.०६ ॥७५॥

तरुभञ्जनदक्षेन ह्युरुविक्रम! पाणिना ।
कुरु भञ्जनमस्माकं करुणाकर! पाप्मनाम् ॥२७.०३.०६ ॥७६॥

परपूर्दहने दक्ष! वरवाल! कपीश्वर!
गरतुल्यानि पापानि हरतान्मामकान्यपि ॥२८.०३.०६ ॥७७॥

हरवीर्यसमुद्भूत! परसैन्यविनाशक! ।
परस्वे परदारे च हर मे वीक्षणादिकम् ॥२९.०३.०६ ॥७८॥

गदया मण्डितः पाणिः सदया बुद्धिवृत्तयः ।
मदमानविहीनास्ते गदहारी त्वमेव मे ॥०३.०३.०६ ॥७९॥

मारुते स्खलनं ते नो ऊरुजातादिदर्शने।
चारुते वर्णितेत्याहुः चारु मे त्वं व्रतं कुरु ॥३१.०३.०६ ॥८० ॥

अविनीता इमे धूर्ता अविनीताऽत्र ते स्थितः।
भवितेति क्षिपन्भाति सवित्रा गुरुमान् कपिः ॥०१.०४.०६ ॥७१ ॥

विनतापौत्रवीर्याणि विनतापुत्रसारथौ।
विनतो वर्णयन्भाति विनते क्षेमदः कपिः ॥०२.०४.०६ ॥८२ ॥

मण्डलं मम भित्त्वाऽगात् चण्डवेगस्स चाऽण्डजः।
पुण्डरीकाक्षदृष्ट्येति चण्डरश्मिवचो भजन् ॥०३.०४.०६ ॥८३ ॥

वीर एष रतो नित्यं नीरजायतलोचने।
सूरशिष्यो नतं पातु शूरवर्याभिवन्दितः ॥०४.०४.०६ ॥८४ ॥

धनुषा भूषिते सक्तो हनुमान् वारयेन्मम।
अनुयाताङ्गदो नित्यं अनुयाताङ्गना मतीः।।०५.०४.०६ ॥८५ ॥

हनुभूषणनामासौ तनुभूषणदर्शनात्।
ननु तद्दम्पती गोप्ता क्व नु तत्सदृशो भवेत् ॥०६.०४.०६ ॥८६ ॥

ऋक्षराजवचोवृद्धो रक्षसां पुरमाश्रितः।
अक्षमुख्यरिपुध्वंसी रक्षणं तनुतान्मम ॥०७.०४.०६ ॥८७ ॥

रामस्य चरितं प्रोच्य सामवाग् भरतं कपिः।
ग्रामं नन्दिमुखं प्राप्य क्षेमसंयुक्तमातनोत् ॥०८.०४.०६ ॥८८ ॥

यथाऽयं प्रणतानस्मान् तथा वितनुतां सदा।
कथामेतां हृदि न्यस्य पथा यातोऽसतामपि ॥०९.०४.०६ ॥८९ ॥

अञ्जनाचलवासी च कञ्जनाभहरिर्हरिः ।
अञ्जनागर्भसंभूतो भञ्जकौ पाप्मनां मम ॥१०.०४.०६ ॥९० ॥

अग्रीवान् राक्षसान् कृत्वा सुग्रीवप्रीतिकृत् कपिः ।
सुग्रीवः पञ्चवक्त्रैर्मां सुग्रीवं तनुतां नतम् ॥११.०४.०६ ॥९१ ॥

गीतान् सारथिना सर्वान् श्रोताऽयं केनचित् कपिः ।
सीतां श्रीरामवृत्तान्तैः पाता मां पातु सर्वदा ॥१२.०४.०६ ॥९३ ॥

वातस्य तनयो लोके ताततुल्यबलः कपिः ।
जात एष सदा रक्षेत् वातरोगादिमञ्जनम् ॥१३.०४.०६ ॥९४ ॥

५.अर्चामूर्तिप्रकरणम् ।

केसरिक्षेत्रजो वक्त्रे केसरीन्द्रं पुरो दधत् ।
केसरीन्द्रौ निजास्येषु भासते नामपर्वते ॥१४.०४.०६ ॥९५ ॥

नरसिंहे रतो नित्यं नरसिहं पुरो दधत् ।
पुरं चोलहरेः कुर्वन् वरं भाति वरप्रदः ॥१५.०४.०६ ॥९६ ॥

विश्वरूपधरो भाति विश्वमङ्गलदः कपिः ।
विश्वरक्षककेशानां विश्वन्दितमन्दिरे ॥१६.०४.०६ ॥९७ ॥

तुङ्गमूर्तिरयं भाति नङ्गनल्लूपुरे हरिः ।
अङ्ग! वक्त्रे हरिं पश्यन् मङ्गलानि ददन्नते ॥१७.०४.०५ ॥९८ ॥

द्वादशश्रीतनोः छात्रः द्वादशोऽनुचरैरयम् ।
ता दशाननमाः हर्ता मे दयेत पुरीस्थितः ॥१८.०४.०६ ॥९९ ॥

आधिव्याधिहरो देवः यो धिया भजतो मम ।
साधितश्रीर्जलं दत्वा लोधिवीथ्यालयान्धुतः ॥१९.०४.०६ ॥१०० ॥

आहरन् कूपपाथो मे मेहर्-चन्द्-स्वापणे स्थितः।
श्रीहरेः पार्श्वगो रक्षेत् श्रीहरिर्मारुतिस्सदा।२०.०४.०६॥१०१॥

वैकुण्ठविमुखोऽप्येष वैकुण्ठपतिसेवकः।
वैकुण्ठसुखदो मेऽत्र वैकुण्ठकलिकल्मषः॥२१.०४.०६॥१०२॥

इति करुणाकरकविना कलिते प्रासातिसुन्दरे शतके।
वैकुण्ठाधिपनिलये सेव्यो जुषतां स सुन्दरो नाम्ना॥२२.०४.०६॥१०३॥

मङ्गलायतने सक्तं सुन्दरं प्रति निर्मितम्।
सुन्दरं शतकं दद्यात् मङ्गलं पठतामिदम्॥२३.०४.०६॥१०४॥

रङ्गलक्ष्मणप्रत्तयाख्यया शास्त्रसाहितीवल्लभः कविः।
रङ्गलक्ष्मणाचार्यनिर्मितं गव्यलेपनं तं जगौ कपिम्॥१४.०४.०६॥१०५॥

॥इति श्रीमदुभयवे.विल्लूर.नडादूर.श्रीभाष्यसिंहासनाधिपति.
श्रीमदाशुकविसार्वभौमतनयेन तदङ्घ्रियुगलसेवालब्धसर्वतोमुखविज्ञानेन
शास्त्रसाहितीवल्लभादिबिरुदततिमण्डितेन करुणाकराचार्येण विरचितं

नवनीतहनुमत्-शतकापरनामधेयं
प्राभञ्जनिप्रासशतकं* अदोहि।

***

* शतकमिदं १.१.२००६ तमदीने नवदेहलीनगरे श्रीमदाण्डवनाश्रमीय-वैकुण्ठनाथमन्दिरे नवनीतविलिप्ताङ्गं हनुमन्तं संसेव्य परवशेन ग्रन्थकर्त्रा प्रतिदिनमेकं प्रासालङ्कारमण्डितं हनुमत्परं पद्यमिति रीत्या निर्मितम्॥

॥ श्रीः ॥

१५. ॥ श्रीपुण्यपुरीकल्याणवेङ्कटेशदशकम् ॥

पुण्यञ्च पापमिति शास्त्रविदो वदेयुः पुण्यं तु पापमखिलं कलयन्नतानाम्।
पुण्यो विभासि भगवन्निह वेङ्कटेश! पुण्याभिधां पुरमिदं किमु तेन धत्ते? ॥१॥

कल्याणवेङ्कटपतिः करुणामृताब्धिः कल्याणशैलकृतकार्मुकमुख्यसेव्यः।
कल्याणदैवतमुरस्यभि-सन्दधानः कल्याणसन्ततिमिहाऽऽतनुते नतानाम् ॥२॥

पुण्याख्यपत्तनमिदं परिमण्डयन्तं पुण्यैकमूर्तिमनघं कमलानिवासम्।
पुण्येन पूर्वजनिसङ्कलितेन दृष्ट्वा पुण्योऽभवं किमपरं मम वाञ्छनीयम्? ॥३॥

नारायणाख्ययतिराजकृतप्रतिष्ठः नारायणाद्रिनिलयो नृहरिं तथैव।
वारान्निधेरपि सुतां समया नतेषु वारान्निधीन् वितरतीह स मङ्गलानाम् ॥४॥


पञ्चायुधी भूषणमस्य तस्मात्पञ्चायुधी नामसहस्र-हारः।
पञ्चापि खानीह हितानि मर्त्यपञ्चाननेतो मम सन्तनोतु ॥५॥

सीताप्रभाभास्करसेवकेन वह्नेर्दिशा वायुदिशा तथैव।
आमुक्तमाल्यप्रदया च सेव्या यन्मन्दिरे भाति हरिं तमीडे ॥६॥

ऐशान्यकोणे स च हेतिराजः ईशेन भक्त्या सततं नुतोऽस्ति।
यन्मन्दिरे सौम्य इहैष दत्तां भूमासमेतो मम मङ्गलानि ॥७॥

वारान्निधिर्द्रष्टुमिवात्मजां स्वां वापीवपुर्वह्निदिशीह यस्य।
पारायणं तस्य यशस्सदा मे सा पारणा नेत्रयुगस्य वर्ष्म ॥८॥

सेनेशकार्यात्मजभाष्यकारान् पद्मागृहे संवसतो नमामि।
मालोलपार्श्वे शठकोपमादिं घण्टागुरुं तं कलिहं भजेय ॥९॥



श्री-भूमि-नीला-कोमलवल्लीसनाथ. श्रीमदपर्यामामृत (श्रीशार्ङ्गपाणि) स्वामी, श्रीकुम्भघोणम्॥

कुलशेखरसूरिस्ते नवने नवभिः कृतात्तु दशकादुपरि।
अर्थयते यद्यत्तत् सकलं पुण्यनगरीश! मेऽत्रास्तु ॥१०॥

श्रीपुण्यपूः पतिनुतिर्भजतां हिताय श्रीसारनाथमुखभक्तगिराऽऽविरासीत्।
श्रीवासराघवकवेस्तनयात् भगिन्याः श्रीवीरराघवशठारियतीशितुश्च ॥११॥

॥ इत्यदोहि श्रीपुण्यपुरीकल्याणवेङ्कटेशदशकम् ॥

***

॥ श्रीः ॥

१६. ॥श्रीलक्ष्मीसहस्रनामनिरुक्तिस्तोत्रम्- प्रथमः पादः ॥

कमलानामनिरुक्तिः कमलानिधिसूनुपद्यकल्प्येयम्।
कमलाकान्तमुखाना कमलानिधि तान् गुरुन् धिनोतु समान् ॥१ ॥

सर्वत्र वासमपि यः कलयन् न दुष्येत्
तत्रत्यदोषनिवहैरिति वासुदेवः।
श्रीमान् स दीव्यति रमा महिषी समाऽस्य
श्रीवासुदेवमहिषीति समाख्ययेन्धे ॥२ ॥

१. ॥ओं श्रीवासुदेवमहिष्यै नमः ॥

पुंसः प्रधानस्य तथेश्वरा ये ब्रह्मादयो भान्ति तदीश्वरीयम्।
तस्माद्रमाख्या किल पुंस्प्रधाने श्वरेश्वरीत्यस्ति तथाऽपि सूक्तम् ॥३ ॥

२. ॥ओं पुंस्प्रधानेश्वरेश्वर्यै नमः ॥

ईदृशस्स्यादियान्वेति विभवोऽस्या न मीयते।
अचिन्त्यानन्तविभवा तस्मादेषा प्रकीर्तिता ॥४ ॥

३. ॥ओं अचिन्यानन्तविभवायै नमः ॥

रूपं नाम यदा भजेत भविता भावः पदार्थस्तदा
ताभ्यां स्याद्रहितो यदा स कथितोऽभावः पदार्थस्तदा।
सृष्टेः प्राक् तदभाववाच्यमखिलं पश्चाच्च भावाख्यया
भावाभावविभाविनी सममिदं यस्या वशे स्वं यतः ॥५ ॥

४. ॥ओं भावाभावविभाविन्यै नमः ॥

अहङ्कारादिसर्वेषामन्तरात्मतया स्थिता।
याऽत एव रमा तस्मादहं भावात्मिकाऽऽख्यया ॥६ ॥

५. ॥ओं अहंभावात्मिकायै नमः ॥

बद्धस्य जीवस्य मतेस्तु सिद्धिः यैः पद्यते तानि पुवर्हि खानि।
पद्मानि तेषामियमन्तरात्मा पद्मेति तस्मात् प्रथिता रमाऽऽस्ते ॥७॥

६. ॥ओं पद्मायै नमः॥

रूपाख्याविधुरा भवन्ति कथिताश्शान्ता नु जीवा दशां
ये सूक्ष्मामधि नैव तत्र भविता संख्या ह्यनन्ताश्च ते।
तेषामेव यथा विभाति भगवानात्मा तथा श्रीरियं
शान्तानन्तचिदात्मिका भगवती वेदान्तिभिर्गीयते ॥८॥

७. ॥ओं शान्तानन्तचिदात्मिकायै नमः॥

अजस्याप्यन्तरात्मेयं कान्तेन सहिता रमा।
ब्रह्मभावं गता प्रोक्ता सृजन्तीति चराचरम्॥

८. ॥ओं ब्रह्मभावं गतायै नमः॥

निम्नोन्नतो भेदमयश्च सर्गः दृष्टो निदानं किल कर्म तत्र।
नैजां न हीच्छां कुरुते रमेति सात्यक्तभेदेति समाख्ययेन्धे ॥१०॥

९. ॥ओं त्यक्तभेदायै नमः॥

सम्बन्धस्समवाय एव जगतां नारायणस्य प्रभोः
देव्याश्चापि तथैव संभवति यत् देवी विभुः श्रीस्स्वयम्।
तस्मात् सर्वजगन्मयीति कमलां वेदान्तविद्यायुताः
नित्यं भक्तगणा भजन्ति नितरां भक्त्याऽथ नाम्ना रमाम्॥११॥

१०. ॥ओं सर्वजगन्मयै नमः॥

ज्ञानं बलं वीर्यमथाऽपि तेजः शक्तिस्तथैश्वर्यमिति प्रसिद्धाः।
षाड्गुण्यवाच्या अथ तैः प्रपूर्णा षाड्गुण्यपूर्णा प्रथिता रमेयम्॥१२॥

११. ॥ओं षाड्गुण्य पूर्णायै नमः॥

त्र्यन्तवाचामभिलक्ष्यमेषा त्रयी सतां श्रीरिति गीयते सा।
त्रय्याश्च सिद्धान्तमयी रमेयं त्र्यन्तरूपा प्रथितास्ति नाम्ना ॥१३॥

१२. ओं त्र्यन्तरूपायै नमः ॥

आत्मा परमात्मा स्यात् तमियं लक्ष्मीर्जहाति देवेशम्।
न कदापीत्याख्याऽस्या आत्मानपगामिनीति भातीयम् ॥१४॥

१३. ॥ओं आत्मानपगामिन्यै नमः ॥

यदद्वितीयो भगवान् विभाति स एकनामा हरिरीश्वरो नः।
तस्यैव योग्या दयिता रमेति नामैकयोग्येति बिभर्ति सेदम् ॥१४॥

१४. ॥ओं एकयोग्यायै नमः ॥

यस्या मनो मङ्गलभावपूर्णम् तथाकृतिर्मङ्गलसंस्थयाऽऽढ्या।
साऽशून्यभावाकृतिरेधते श्रीः नाम्ना जपन् तत् भविता हि पूर्णः ॥१६॥

१५. ॥ओं अशून्यभावाकृतये नमः ॥

ये तेजसा भान्ति पदार्थपुञ्जाः श्रियः प्रसादात् इह ते तथेति।
तेजः प्रभाविन्यभिधा तदस्याः तेजः परं त्वस्य जपेन सिद्ध्येत् ॥१७॥

१६. ॥ओं तेजःप्रभाविन्यै नमः ॥

अनुभाव्यं कमाप्नोति त्वनुभावयिता यया।
भाव्यभावकभावा सा कमला भाति संज्ञया ॥१८॥

१७. ॥ओं भाव्यभावकभावायै नमः ॥

आत्मा मनस्यत् मनसा रमेयम् शुद्धेन भाव्या भवतीति शास्त्रम्।
श्रीरात्मभाव्या कथिता ततश्च नाम्नो जपादस्य मनोविशुद्धिः ॥१९॥

१८. ॥ओं आत्मभाव्यायै नमः ॥

यत्काम्यमाना जगति प्रसिद्धाः कामा निषिद्धा न भवन्ति तेषु।
ये तान् समान् दोग्धि समाश्रिताय तत् कामधुक्-नामसमन्वितेयम् ॥२०॥

१९. ॥ओं कामदुहे नमः ॥

अन्येन केनापि न सृष्टिरस्याः स्वस्य स्वयं सूतिरियं ततश्च।
श्रीरात्मभूरित्यपि नामधेयं बिभर्ति योग्यं स यथा प्रियोऽस्याः ॥२१॥

२०. ॥ ओं आत्मभुवे नमः ॥

स्थूलं वस्तु यदस्ति गृह्यमिह खैर्भावाभिधं तद्भवेत्
सूक्ष्मं तत्तु भवेत्तथेन्द्रियगणागृह्यं ह्यभावाभिधम्।
भावाभावमयं तदेतदखिलं व्याप्य स्थिता या विभुः
भावाभावमयीति भाति कथिता देवी रमा साऽऽख्यया ॥२२॥

२१. ॥ ओं भावाभावमय्यै नमः ॥

विभू रमा सर्वगता तथाऽपि तत्रत्यदोषैर्न कदाऽपि देवी।
संस्पृश्यते दीव्यति नाम तस्मात् दिव्येति तस्या जपतां सुखाय ॥२३॥

२२. ॥ओं दिव्यायै नमः ॥

कर्मानुगुणनीचोच्चभेद्यवर्गे चतुर्विधम्।
भेदकं भावयेद्धर्ष्म भेद्यभेदकभाविनी ॥२४॥

२३. ॥ओं भेद्यभेदकभाविन्यै नमः ॥

अदःकुटुम्बतां गतं जगद्यतो रमेरिता जगत्कुटुम्बिनी बुधैः।
इदं तु नाम यो जपेद्रमां स्मरन् कुटुम्बमस्य सत्पथे स्थिरं भवेत् ॥२५॥

२४. ॥ ओं जगत्कुटुम्बिन्यै नमः ॥

अखिलं धरतीयम्बाऽखिलाधारा च नामतः।
भक्तितो जपतामेतत् आधारादि भवेत् स्थिरम् ॥२६॥

२५. ॥ओं अखिलाधारायै नमः ॥

विष्णौ कान्तधियातिवेलमनघां प्रीतिं दधाना रमा
जीवानामपि मण्डले सुतगणे मातेव वात्सल्ययुक्।

शुद्धे सत्त्वमये गुणत्रययुते चैतन्यहीने तयोः
भोग्ये कामविजृम्भिणीति कथिता नाम्ना तथाऽनेहसि ॥२७॥

२६. ॥ओं कामविजृम्भिण्यै नमः ॥

सृष्टिं स्थितिं च संहारं स्थित्वान्तश्शासनं तथा।
मोचनं कुरुते चेति पञ्चकृत्यकरी रमा ॥२८॥

२७. ॥ओं पञ्चकृत्यकर्यै नमः ॥

परमेष्ठ्यादिपञ्चानां शक्तीनामास्पदेन या।
देहिनी शुद्धसत्त्वेन पञ्चशक्तिमयी च सा ॥२९॥

२८. ॥ओं पञ्चशक्तिमय्यै नमः ॥

आत्मा तु जगतामेको यतो नारायणः प्रभुः।
आत्माऽस्य वल्लभा श्रीरित्याख्याऽस्या आत्मवल्लभा ॥३०॥

२९. ॥ओं आत्मवल्लभायै नमः ॥

भावो यल्लोकसृष्टिस्स्यादभावस्संहृतिस्तथा।
अनुयान्ती तयोः कान्तं भावाभावानुगा रमा ॥३१॥

३०. ॥ ओं भावाभावानुगायै नमः ॥

सर्वैरपि रमा देवी स्तूयते नितरां यतः।
तस्माद्भक्ताः प्रगायन्ति नाम्नेमां सर्वसंमताम् ॥३१॥

३१. ॥ओं सर्वसंमतायै नमः ॥

आत्मा समेषां यदसौ तदेष आत्मेति तस्माद्धरिरीर्यतेऽसौ।
आत्मोपगूहिन्यभिधा तदस्याः गाढोपगूढा हरिणा यदेषा ॥३३॥

३२. ॥ओं आत्मोपगूहिन्यै नमः ॥

क्रोधो न यस्या भविता कदाऽपि सुशीतलं तेन सदा प्रसन्नम्।
मनस्तदेषा महिता च नाम्ना सौम्येति देवी कलशाब्धिकन्या ॥३५॥

३४. ॥ओं सौम्यायै नमः ॥

सौम्यमेव सदा धत्ते रूपमेषा प्रियेऽन्यथा।
क्रुद्धरूपधरेऽपीति सौम्यरूपव्यवस्थिता ॥३६॥

३५. ॥ओं सौम्यरूपव्यवस्थितायै नमः॥

आदिरन्तो न यस्यास्स्तां आद्यन्तरहिता हि सा।
आख्यया युज्यते लक्ष्मीस्तदाख्यामहिता ततः ॥३७॥

३६. ॥ओं आद्यन्तरहितायै नमः॥

सृष्ट्यादिलीलां दधतस्स्वभर्तुः देवस्य दिव्या कमला सखीयम्।
देवीति नाम्ना महिता तदेतत् जपन् प्रसादं लभते रमायाः॥३८॥

३७. ॥ओं देव्यै नमः॥

स्वरूपं हि सदा देव्याः केवलं भद्रभावना।
भक्तानामिति नाम्नेयं भवभाव्यस्वरूपिणी ॥३९॥

३८. ॥ ओं भवभाव्यस्वरूपिण्यै नमः॥

अक्षीयमाणो विभवो यदस्याः देव्या विभातीति महद्भिरेषा।
महाविभूतिः कथिताऽथ नाम्ना महाविभूतिर्जपतो नरोऽस्य ॥४०॥

३९. ॥ओं महाविभूत्यै नमः॥

निष्पक्षपातमखिलेषु समाश्रितेषु स्वानुग्रहं वितनुते सततं जनेषु।
तस्मादियं बुधजनैस्समतां गतेति नाम्ना विभाति विनुता कलशाब्धिकन्या ॥४१॥

४०. ॥ओं समतां गतायै नमः॥

ज्योतिर्गणो नित्यगणस्य वाची ज्येतिर्यथा स्यात्परमेवमेव।
नित्या यतश्श्रीरपि चैतदीशा ज्योतिर्गणेश्वर्यभिधा तदस्याः ॥४२॥

४१. ओं ज्योतिर्गणेश्वर्यै नमः॥

कारयन्तीह भक्तान् यत् कर्तव्यान्यखिलानि सा।
प्रसीदति रमा तस्मात् सर्वकार्यकरी स्मृता ॥४३॥

४२. ॥ओं सर्वकार्यकर्यै नमः॥

सन्तोषदात्री सततं नतानां समानि सौख्यानि विधाय तेषाम्।
धर्माणि भूत्वा सकलानि देवी धर्मस्वभावा प्रथिता ततस्सा ॥४४॥

४३. ॥ओं धर्मस्वभावायै नमः॥

आत्मशब्दस्य मुख्योऽर्थः केशवो; भक्तरक्षणे।
तस्येयमग्रतो भूयादित्येषाऽऽत्माग्रतस्स्थिता ॥४५॥

४४. ॥ओं आत्माग्रतस्स्थितायै नमः॥

उभयेच्छानुगुणं श्रीः गुणभावमुपाश्रिता।
आज्ञासमविभक्ताङ्गी जायते नाम तत्तया ॥४६॥

४५. ॥ओं आज्ञासमविभक्ताङ्ग्यै नमः॥

अज्ञानं नाशयित्वैषा प्रसादाय शुभःक्रियाः।
कारयन्ती नतान् प्रोक्ता ज्ञानानन्दक्रियामयी ॥४७॥

४६. ॥ओं ज्ञानानन्दक्रियामय्यै नमः॥

रूपाणि धत्ते निजनायकस्य रूपानुरूपाणि निजेच्छयैव।
न कर्मबन्धादिति नाम लक्ष्म्याः स्वातन्त्र्यरूपेति पठन्ति वेदाः ॥४८॥

४७. ॥ओं स्वातन्त्र्यरूपायै नमः॥

देवस्योरसि देवीयं यद् वासं तनुते सदा।
तत् देवोरस्थिता नाम्ना महालक्ष्मीः प्रकीर्तिता ॥४९॥

४८. ॥ओं देवोरस्थितायै नमः॥

तदीयमाराधनमेव धर्मः तेनैव लक्ष्मीः किल धर्मिणीयम्।
तद्धर्मधर्मिण्यभिधा तदस्याः जपेन नाम्नोऽस्य हि धर्मिणस्स्मः ॥५०॥

४९. ॥ओं तद्धर्मधर्मिण्यै नमः॥

ईशाख्यधातोर्वरटा युते यत् औणादिके ङीप्- तत् ईश्वरी च।
स्यादीश्वरार्थे कमलाऽथ सर्व भूतेश्वरीनामयुता विभाति॥४९॥

५०. ॥ओं सर्वभूतेश्वर्यै नमः॥

सर्वाणि लोके किल यानि सन्ति भूतानि तेषामियमेव माता।
व क्षेमकृत्तेन तु सर्वभूतमातेति नाम्ना परिगीयते श्रीः॥५२॥

५१. ॥ओं सर्वभूतमात्रे नमः॥

आत्मा समस्तजगतामिति वर्णितस्य दासाघदर्शनमसौ विनिवारयेत् श्रीः।
संमोहकृत्यकलनैरिति संज्ञयाऽऽत्मसंमोहिनीति कमला लसति प्रघुष्टा॥५३॥

५२. ॥ओं आत्मसंमोहिन्यै नमः॥

अङ्गानि सर्वाण्यपि सुन्दराणि देव्या रमाया इति सा विधत्ते।
सर्वाङ्गसुन्दर्यभिधामिमां च वर्णीं जपन् विन्दति रम्यदारान्॥५४॥

५३. ॥ओं सर्वाङ्गसुन्दर्यै नमः॥

सर्वं हि संप्राप्य विभाति लक्ष्मीः सर्वं शुभं प्रापयति स्वभक्तान्।
तस्यास्ततो भक्तकुलेन सर्वव्यापिन्यभिख्या प्रसमर्पितास्ति॥५५॥

५४. ॥ओं सर्वव्यापिन्यै नमः॥

प्राप्तं जनानां कुरुते नतानां ऐश्वर्ययोगं यदियं रमा तत्।
श्रीः प्राप्तयोगिन्यभिधायुता स्यात् ना प्राप्तयोगो जपतोऽस्य भक्त्या॥५६॥

५५. ॥ओं प्राप्तयोगिन्यै नमः॥

उपायभूतो भगवान् हरिस्तथा रमा च देवीति परं रहस्यम्।
मुक्त्यै मुमुक्षोरिति संप्रदाये विमुक्तिदायिन्यभिधा ततोऽस्याः॥५७॥

५६. ॥ओं विमुक्तिदायिन्यै नमः॥

सा भक्तियोगेन परेण लभ्या कान्तेन युक्ता कमला यथाऽयम्।
ततश्च तस्या अपि नामधेयं तद्भक्तिगम्येति विभाति रम्यम्॥५८॥

५७. ॥ओं भक्तिगम्यायै नमः॥

भक्त्या नतं वाऽप्यथ भोगसिद्ध्यै धनायया वाप्यथ तं क्रमेण।
सन्तारयेत् संसृतिसागरं श्रीः संसारतारिण्यभिधा ततोऽस्याः॥५९॥

५८. ॥ओं संसारतारिण्यै नमः॥

धर्मं मतिं तस्य च साधनाय येऽर्थास्समान् तानापि सन्नतेभ्यः।
ददाति लक्ष्मीरतितुष्टिपूर्वं धर्मार्थसाधिन्यभिधा ततोऽस्याः॥६०॥

५९. ॥ओं धर्मार्थसाधिन्यै नमः॥

व्योमशब्दः परं देशं ब्रूते स निलयः श्रियः।
तद्व्योमनिलया नाम्ना कथिता कमला बुधैः॥६१॥

६०. ॥ओं व्योमनिलयायै नमः॥

व्योमवन्निर्मला यस्याः विग्रहो दिव्य एधते।
तेन सा कीर्त्यते नाम्ना कमला व्योमविग्रहा॥६२॥

६१. ॥ओं व्योमविग्रहायै नमः॥

आकाशो भगवान् यतस्स हि परं सङ्काशते सर्वतः
तल्लोकोऽपि तथैव देववसतिर्नाकोऽपि लोकस्तथा।
भूतेष्वादिरपीह योगिहृदिति व्योमानि यस्याः पदं
पञ्चव्योमपदीति नाम कमला धत्ते मुनीन्द्रैः कृतम्॥६३॥

६२. ॥ओं पञ्चव्योमपद्यै नमः॥

वेदैर्वर्णितवैभवा यवनिकां मायामयीं तद्धरेः
अस्माकं किल मध्यगामपि रमा व्यावर्तयन्ती यतः।

कारुण्यात् स्वयमेव भाति तदियं प्रोक्ता रमा नामतः
रक्षाव्यावृतिरित्यनन्तनगगं तं नः पुरस्साऽऽनयेत् ॥६४॥

६३. ॥ओं रक्षाव्यावृत्यै नमः॥

प्राप्यशब्दतः पुरुषार्थ इत्युच्यते श्रुतौ सर्व एव सः।
गृह्यते नते तं समं रमा वर्षतीति सा प्राप्यपूरणी ॥६५॥

६४. ॥ओं प्राप्यपूरण्यै नमः॥६५॥

आनन्दगेहे वसतो विशालं वक्षस्स्थलं वासगृहं यदीयम्।
आनन्दक्लृप्तेव तनूर्यदीया साऽऽनन्दरूपा प्रथिताऽस्ति नाम्ना ॥६६॥

६५. ॥ओं आनन्दरूपायै नमः॥

सर्वाणि मान्यानि सदीप्सितानि संप्राप्य देवी सततं मुदाऽऽस्ते ।
सर्वाप्तिशालिन्यभिधासमेता सर्वाप्तये मन्त्रमिमं जपेम ॥६७॥

६६. ॥ओं सर्वाप्तिशालिन्यै नमः॥

सर्गरक्षणे संतनोति यत् शक्तितो हरिस्सा हि सिन्धुजा।
शक्तिनायिका तद्रमेरिता नाम कीर्तयन्नेधते नरः। ॥६८॥

६७. ॥ओं शक्तिनायिकायै नमः॥

हिरण्यलोहस्य समो हि वर्णः यदीयदेहस्य ततो रमा सा।
हिरण्यवर्णा कथिताख्ययाऽस्याः सूक्तं मुखे नाम तदेव धत्ते ॥६९॥

६८. ॥ओं हिरण्यवर्णायै नमः॥६९॥

हितश्च रमणीयश्च हिरण्यं प्रोच्यते वपुः।
प्राकारस्तेन हैरण्यप्राकारा तत्तनू रमा ॥७०॥

६९. ॥ओं हैरण्यप्राकारायै नमः॥

यद्धेमक्लृप्तां कमला दधाति मालां निजांसे सततं सुरम्याम्।
तद्धेममालिन्यभिधा कृतास्याः मुनीश्वरैस्तदपदसक्तचित्तैः ॥७१॥

७०. ॥ओं हेममालिन्यै नमः॥

प्रत्नैस्तु रत्नैः कलितास्सुभूषाः रत्नाकरप्रेष्टसुता रमेयम्।
विभर्ति तस्मादथ नामधेयं तत्प्रत्नरत्नेति विभाति तस्याः ॥७२॥

७१. ॥ओं प्रत्नरत्नायै नमः॥

भद्रं हरिस्तस्य विशालवक्षः पीठो यदस्याः कमला ततश्च।
सा भद्रपीठेति विभाति नाम्ना भद्रं भजेताऽस्य जपेन भक्तः ॥७३॥

७२. ॥ओं भद्रपीठायै नमः॥

विना भयं यां तु समे श्रयेरन् सा श्रीः ततो वेदविदस्स्तुवन्ति।
हरिप्रपत्तिस्सुलभाऽनयेति तां वेशिनीमित्यपि नाम दत्त्वाः ॥७४॥

७३. ॥ओं वेशिन्यै नमः॥

रजतेन कृतां मालां धत्ते सा रजतस्रजा।
नाम्नोऽस्य जपतश्श्राद्धे प्रीयन्ते पितरस्समे ॥७५॥

७४. ॥ओं रजतस्रजायै नमः॥

आज्ञां पत्युःतथास्याश्च शास्त्रं पालयतो रमा।
अमरान् तनुते नाम्ना स्वाज्ञाकार्यमरा ततः ॥७६॥

७५. ॥ओं स्वाज्ञाकार्यमरायै नमः॥

नित्यः परो नाम समेधतेऽस्याः सद्विग्रहो यं च हरिस्स देवः।
नित्यानूभूतं नवमेव वक्ता नित्याऽथ नाम्रा कमला विभाति ॥७७॥

७६. ॥ओं नित्यायै नमः॥

वेदा हरिं तं किल सर्वगन्धं वदन्ति तद्वक्षसि संवसन्ती।
इयं कथं वा सुरभिर्न भूयात् संज्ञा ततोऽस्यास्सुरभिर्यथार्था ॥७८॥

७७. ॥ओं सुरभ्यै नमः॥

व्योमेति विष्णोः पदमुच्यते तत् परं च निर्वाह उताऽस्य देव्याः।
आज्ञावशे तेन रमा बिभर्ति तां व्योमचारिण्यभिधां यथार्थाम्।।७९।।

७८. ।।ओं व्योमचारिण्यै नमः।।

अप्राप्तां श्रियमातनोति नितरां युक्तां रमा सेवके
याऽस्तेऽस्मिन्नथ तां तनोति नितरां संरक्षितामच्युताम्।
योगक्षेम इति श्रुतीरितमिमं भक्तेषु दत्ते यतो
योगक्षेमवहेति नाम मुनिभिस्तस्या यथार्थं कृतम्।।८०।।

७९. ।।ओं योगक्षेमवहायै नमः।।

अद्रिमूर्ध्नि गृहे वासात् नाहं स्यां सुलभेति या।
शुकपुर्यां स्थिता सर्वसुलभा सा रमाऽख्यया।।८१।।

८०. ।।ओं सर्वसुलभायै नमः।।

यथेच्छमेषा किल कर्तुमीष्टे सर्वं रमा तेन तदीयनाम।
मुनीश्वरैः कल्पितमेतदिच्छाक्रियात्मिकेत्यस्ति नितान्तरम्यम्।।८२।।

८१. ।।ओं इच्छाक्रियात्मिकायै नमः।।

निजजनशोकं दृष्ट्वा कृपया कमला तदीयशोकेन।
भजतेऽश्रुमुखी लज्जां करुणास्रानतमुखी रमा तस्मात्।।८३।।

८२. ।। ओं करुणास्रानतमुख्यै नमः।।

कमलेन समे यस्या अक्षीणि पृथुशीतले।
कमलाक्षीति रमा तत् कथिता मुनिसत्तमैः।।८४।।

८३. ।।ओं कमलाक्ष्यै नमः।।

यथा हि कान्तिश्शशिने विधत्ते जगत् प्रसन्नं नितरां तथैव।
अस्याश्च कान्तिस्तदिमां रमाऽऽख्यां शशिप्रभेत्यस्ति समादधाना।।३५०।।८५।।

८४. ।।ओं शशिप्रभायै नमः।।

कल्याणमूचुः किल मङ्गलं सा दत्ते तदेवैषु नतेषु लक्ष्मीः।
कल्याणदायिन्यभिधां ततश्च बिभर्ति देवी नितरां यथार्थाम् ॥८६॥

८५. ॥ओं कल्याणदायिन्यै नमः॥

ध्येयस्सदा सवितृमण्डलमध्यवर्ती
नारायणस्सरसिजासनभूतवक्षाः।
ध्येयं तु कल्यमथ शब्दविदो विदुस्तत्
कल्याऽभिधानमपि तत्कमलार्हमस्ति ॥८७॥

८६. ॥ ओं कल्यायै नमः॥

कलिकल्मषमखिलं नाशयति रमा स्वभक्तबृन्देषु।
यस्मादियमथ तस्मात् कलिकल्मषनाशिनीति नाम्नेन्धे ॥८८॥

८७. ॥ ओं कलिकल्मषनाशिन्यै नमः॥

प्रशस्ता ज्ञानिनः प्रज्ञाः अमेया कमला यतः।
तेषामपि ततः प्रोक्ता प्रज्ञापरिमिताऽऽख्यया ॥८९॥

८८. ॥ ओं प्रज्ञापरिमितायै नमः॥

आत्मा समेषां मधुसूदनोऽसौ आत्मेति शब्दो निरुपाधिकोऽतः।
ब्रूते तमेवास्य सदानुरूपा साऽऽत्मानुरूपेति रमाख्ययेन्धे ॥९०॥

८९. ॥ओं आत्मानुरूपायै नमः॥

सत्यं स्थायि वदेत्ताद्दृक्फलायैषोपयाचिता।
विबुधैरिति नाम्नेयं रमा सत्योपयाचिता ॥९१॥

९०. ॥ओं सत्योपयाचितायै नमः॥

मनसा तु विशुद्धेन गृह्णते विनता इमाम्।
भक्ता इति रमा प्रोक्ता मनोज्ञेया मनीषिभिः ॥९२॥

९१. ॥ओं मनोज्ञेयायै नमः॥

उपासनं ध्यानमथेह तस्याः ज्ञानं पदं चापि तदर्थकं तत्।
तेनाथ लभ्येति ततश्च लक्ष्मीः सा ज्ञानगम्या कथिताऽथ नाम्ना ॥९३ ॥

९२. ॥ओं ज्ञानगम्यायै नमः॥

मुक्तात्मभिस्सदा क्लृप्तसेवानां लक्ष्यभू रमा।
मुनिभिः कथिता तेन नित्यमुक्तात्मसेविनी ॥९४॥

९३. ॥ओं नित्यमुक्तात्मसेविन्यै नमः॥

कर्तुं हि कार्याणि नराः किलैके शक्तिं दधाना इह सञ्चरन्ति।
शक्तिं तु तेषां कमला प्रदत्ते तत्कर्तृशक्तिः कथिता रमेयम् ॥९५॥

९४. ॥ओं कर्तृशक्त्यैनमः॥

हरिरिव विभुरथ मोक्षं चेष्टे दातुं रमा नतेभ्यः श्रीः।
अपि घटकनृकृत्यं सा कुरुते तत्सुगहनेति नामाऽस्याः ॥९६॥

९५. ॥ओं सुगहनायै नमः॥

मिष्टं न भुङ्क्ते मधुमेहभीत्या नो पप्पटं रक्तगवेगभीत्या।
यस्याऽथ शक्तिं न रमा ददाति तत्भोक्तृशक्तिः कमलाऽथ नाम्ना ॥९७॥

९६. ॥ओं भोक्तृशक्त्यै नमः॥

सत्ये रतिर्यस्य महत्सु भक्तिः पित्रोश्च सेवां कुरुतेऽथ यो वा।
धर्मे रतिर्वा भजते रमा तं गुणप्रिया तत् कमलाऽथ नाम्ना ॥९८॥

९७. ॥ओं गुणप्रियायै नमः॥

लक्ष्मीकटाक्षो यदि लभ्यते ना प्रकीर्णकास्येन समो धिया स्यात्।
लक्ष्मीहयास्यस्स ततोऽस्ति सेव्यः तत् ज्ञानशक्तिः कमलाऽथ नाम्ना ॥९९॥

९८. ॥ओं ज्ञानशक्त्यै नमः॥

आकारत्रयसंपन्ना कमला न हरिर्यतः।
अनौपम्या ततः प्रोक्ता नाम्ना पद्मनिवासिनी ॥१००॥

९९. ॥ओं अनौपम्यायै नमः॥

नतप्रतीपं न कदाऽपि कुर्यात् कृपामयीयं प्रणतार्थिता ऽपि।
तस्माद्रमां तत्त्वविदो वदन्ति तां निर्विकल्पां परयाऽथ भक्त्या ॥१०१॥

१००॥ ओं निर्विकल्पायै नमः॥

स चामयो व्याधिपरोऽस्ति शब्दः यस्याः प्रसादात् बहुदूरगस्स्यात्।
तेनेर्यमाणा न कथं भवेत् सा निरामयाऽम्बा जगतां स्वनाम्ना ॥१०२॥

१०१. ॥ओं निरामयायै नमः॥

पुण्यं च पापं न हि तां स्पृशेताम् ताभ्यां न दुष्टा कमला ततस्ताम्।
नाम्नाऽकलङ्कां मुनयो वदन्ति तयाऽकलङ्कोऽहमसानि पूतः ॥१०३॥

१०२. ॥ओं अकलङ्कायै नमः॥

अमृतं तत् परं ब्रह्म यद्भवामयभेषजम्।
आधारोऽस्यामृताधारा नाम्ना तद्दयिता रमा ॥१०४॥

१०३. ॥ ओं अमृताधारायै नमः॥

महती शक्तिरुक्तास्या यदस्या वशगो हरिः।
महाशक्तिरियं नाम्ना महद्भिर्वर्णिता रमा ॥१०५॥

१०४. ॥ ओं महाशक्त्यै नमः॥

अचित्समान् श्रीः प्रलये समीक्ष्य जीवान् शरीरैस्सह योजयावः।
उक्तेति कान्तेन जगद्विकासं सहादधातीति विकासिनीयम् ॥१०६॥

१०५. ॥ओं विकासिन्यै नमः॥

मायाऽऽश्चर्यं वदेत् ये तु गुणास्तां ददते हि तैः।
महद्भिर्महिता देवी महामाया रमेरिता ॥१०७॥

१०६. ॥ओं महामायायै नमः॥

कान्ताऽनन्दमयस्यैषा दधाना महतीं मुदम्।
महानन्दामिमां प्राहुः महान्तस्तेन वै मुदा ॥१०८॥

१०७. ॥ओं महानन्दायै नमः॥

देहात्माभिदाबुद्धिस्सा सङ्कल्प इति कथ्यते।
सा नास्या इति देवीयं निस्सङ्कल्पा रमेरिता ॥१०९॥

१०८. ॥ओं निस्सङ्कल्पायै नमः॥

यथेश्वरः सेयमपि स्थिता श्रीः निजे महिम्नीति न संशयोऽत्र।
निराश्रया तेन रमा स्वनाम्ना परस्य वक्षोऽपि यदाश्रयोऽस्ति ॥११०॥

१०९. ॥ओं निराश्रयायै नमः॥

सदैकरूपा कमला यतस्सा विद्वद्भिरेषा कथिताऽस्ति नाम्ना।
एकस्वरूपा तदिदं जपन्तो विकारदूरा विजयं लभन्ते ॥१११॥

११०. ॥ओं एकस्वरूपायै नमः॥

प्रसादयन्ती निजनाथमेषा करोति कृत्यं घटकस्य तद्वत्।
उपायता चापि फलत्वमस्याः विधात्रयं तत् त्रिविधेति नाम ॥११२॥

१११. ॥ओं त्रिविधायै नमः॥

संख्या बुद्धिः प्रोक्ता त्वस्याः पादे भक्तिर्येषां नास्ति।
दूरे तेषां तस्यास्सेयं संख्यातीता नाम्ना लक्ष्मीः ॥११३॥

११२. ॥ ओं संख्यातीतायै नमः॥

दोषेण केनाऽपि न युज्यते श्रीः स्त्रीत्वप्रयुक्ता अपि येऽवतारे।
रामायणेऽगस्त्यमुनीरितास्ते नास्या यतो नाम निरञ्जनास्याः ॥११४॥

११३. ॥ओं निरञ्जनायै नमः॥

सत्ता यदस्या न च लोकमातुः तदन्यकल्प्या कमितुर्यथैव।
तदात्मसत्तेति वदन्ति लक्ष्मीं तामाश्रितानां न कुतोऽपि भीतिः॥११५॥

११४. ॥ओं आत्मसत्तायै नमः॥

यन्नाम केवलमहो! पठितं सकृन्नः शुद्धिं तनोति परमां शुभसंपदं च।
तस्मादियं श्रीर्न भवेदभीड्या नाम्ना रमा नित्यशुचिर्मुनीन्द्रैः? ॥११६॥

११५. ॥ओं नित्यशुचये नमः॥

पराऽस्य शक्तिः परमस्य वेदे इत्युक्तमस्याश्च तथैव शक्तिः।
परेति पद्मां परिवर्णयन्ति नाम्ना महान्तः परशक्तिमेताम्॥११७॥

११६. ॥ओं परशक्त्यै नमः॥

सुखं न चान्यत्तु यतो रमायासः सदोचितं तेन रमा स्तुतेयम्।
सुखोचितेत्येव महद्भिरेषा सुखं सदा मे भजतस्तनोतु॥११८॥

११७. ॥ओं सुखोचितायै नमः॥

कामो न कोपो भविता रमायाः दोषप्रदौ हेयगुणौ कदाऽपि।
तेनास्ति शान्ता सततं ततश्च सा नित्यशान्तेति बिभर्ति नाम॥११९॥

११८. ॥ओं नित्यशान्तायै नमः॥

सा नित्यशान्ता यदतस्ततश्च तरङ्गहीनो जलधिस्सुधायाः।
तत्रोपमा स्यादत एव हेतोः तां निस्तरङ्गां विबुधा वदन्ति॥१२०॥

११९॥ ओं निस्तरङ्गायै नमः॥

सदैकरूपरूपेयं स्वरूपे करुणामये।
निर्भिन्ना तेन नाम्नेयं महद्भिस्स्तूयते रमा ॥१२१ ॥

१२० ॥ओं निर्भिन्नायै नमः ॥

ईशादियं दण्डधराद्दयामयी जीवादियं शेषितयाऽथ शेषात्।
भिन्ना स्वतो धान्यधनाभिमानैः श्रीस्सर्वभेदिन्यभिधां बिभर्ति ॥१२२ ॥

१२१. ॥ओं सर्वभेदिन्यै नमः ॥

विभुर्यथा विष्णुरियं तथेयं सर्वेषु वस्तुष्वथ सङ्गताऽपि।
कीर्णा न दोषैरिति तामतस्सऽङ्कीर्णेति देवीं मुनयस्स्तुवन्ति ॥१२३ ॥

१२२. ॥असङ्कीर्णायै नमः ॥

भक्तानां स भवेत् भर्ता विधेयः प्रेमतस्स्वयम्।
अनया सहितस्तस्मात् विधेयात्मेति तां विदुः ॥१२४ ॥

१२३. ॥ओं विधेयात्मने नमः ॥

विना भयं पापिजनैश्च सेव्या यतो रमा कोपसुदूरगा सदा।
तस्मान्निषेव्येति समाह्वयेयं रमा समस्तैरभिसंस्तुताऽस्ते ॥१२४ ॥

१२४. ॥ओं निषेव्यायै नमः ॥

काकासुरस्यासुततिं ररक्ष काणत्वमात्रं किल दण्डमस्य।
यत्सन्निधानात् स विधाय देवः सा सर्वपालिन्यभिधा तदाऽस्ते ॥१२६ ॥

१२५. ॥ओं सर्वपालिन्यै नमः ॥

न किञ्चनेयं निजमोदलब्ध्यै सुखाय वा वाञ्छति सिन्धुकन्या।
निष्कामना तेन रमेरितेयं नाम्ना महद्भिः बहुधा स्तुवद्भिः ॥१२८ ॥

१२६ ॥ ओं निष्कामायै नमः ॥

रसं परं ब्रह्म वदन्ति वेदाः आनन्दलाभश्च ततस्समेषाम्।
इत्यादि तस्यापि रमा रसाय तस्माद्रमां सर्वरसां वदन्ति ॥१२८॥

१२७. ॥ओं सर्वरसायै नमः॥

अभेद्यसङ्कल्पयुता श्रितानां रक्षाकृतौ भाति दयामयीति।
शठारिमुख्योक्तिरसस्ततश्च रमामभेद्येति वदन्ति नाम्ना॥

१२८. ॥ओं अभेद्यायै नमः॥

मोक्षादिसंपदस्सर्वाः साधयेत् कमला यतः।
श्रितानां नाम तत्तस्याः कृतं सर्वार्थसाधिनी॥१२९॥

१२९. ॥ओं सर्वार्थसाधिन्यै नमः॥१३०॥

ईदृशी कमला अस्या ईदृशी संपदित्यपि।
न शक्यो निर्णयस्तस्मात् अनिर्देश्यामिमां विदुः॥१३१॥

१३०. ॥ओं अनिर्देश्यायै नमः॥

कालतो वस्तुतो वाऽपि परिच्छेदो न विद्यते।
गुणानां गणने चेति रमाऽपरिमितोच्यते॥१३२॥

१३१. ॥ ओं अपरिमितायै नमः॥

यस्यास्स्वरूपे न भवेद्विकारः ज्ञानादिके तस्य च धर्मवर्गे।
रूपे परं नैजविलासक्लृप्तः सा निर्विकारेति बिभर्ति नाम॥१३३॥

१३२. ॥ओं निर्विकारायै नमः॥

या विष्णुपत्नीत्यभिलक्ष्यते या जीवात्ममातेति हरिं प्रसन्नम्।
पुंस्कारकृत्येन तनोति या च त्रिलक्षणैवं कमलाऽथ नाम्ना॥१३४॥

१३३. ॥ओं त्रिलक्षणायै नमः॥

पापप्रवृत्तेर्निजभक्तवर्गं निवारयन्ती भयमस्य दत्वा।
संरक्षितुं सिन्धुसुता ततश्च भयङ्करीत्याश्रयते समाख्याम्॥१३५॥

१३४ ॥ ओं भयङ्कर्यै नमः ॥

भक्तैः कृतानामिह कर्मणां सा सिद्धिं शुभां संप्रददाति देवी।
तस्माद्रमां सर्वजना नमन्ति तां सिद्धिरूपेति समाख्यया च॥१३६॥

१३५. ॥ ओं सिद्धिरूपायै नमः ॥

व्यक्तं न कोऽपीह रमास्वभाव-स्वरूपरूपादि च वेत्ति विष्णुः।
स चाऽपि नेतीयमथाख्ययास्तेऽव्यक्ता रमा तादृशवैभवाढ्या॥ १३७॥

१३६. ॥ओं अव्यक्तायै नमः ॥

सदिति कथ्यते यत्स्वरूपतो विकृतिमेति नो यत् भजेत्तु ताम्।
असदिदं द्वयं यद्वशे विदुः सदसदाकृतिं तां बुधा रमाम्॥१३८॥

१३७. ॥ओं सदसदाकृतये नमः ॥

अणुरिति विभुरिति कमला ह्यसमा ससमा तथेश्वरी च निसर्गात्।
ईश्वरयोगादिति किल बहुविधपक्षास्तदप्रतर्क्या सोक्ता॥१३९॥

१३८. ॥ ओं अप्रतर्क्यायै नमः ॥

सङ्कल्पोऽस्या भविता यदि पुनरिह कोऽपि तं विहन्तुमलं न।
तस्मादेषा नाम्ना श्रीरिन्धेऽप्रतिहतेति सर्वनुता॥१४०॥

१३९. ॥ ओं अप्रतिहतायै नमः ॥

कर्मानुरूपं हि फलं प्रदेयं इति प्रवृत्तं पुरुषोत्तमञ्च ।
दयानुरूपं फलमेव देयं त्वित्यादिशन्तीति रमा नियन्त्री॥१४१॥

१४०. ॥ओं नियन्त्र्यै नमः ॥

यन्त्रो यथा याति हि चालकेन संप्रेरितस्तद्वदिहाऽखिलश्च।

श्रीप्रेरितं तेन बुधास्स्तुवन्ति तां यन्त्रवाहिन्यभिधां विधाय ॥१४२॥

१४१. ॥ ओं यन्त्रवाहिन्यै नमः ॥

उपासकस्यास्ति हृदि स्थितो हरिः सहाऽनया तत्र निजानुरूपया।

अतस्तुवन्तीह च हार्दमूर्तिरित्- यभिख्यया सिन्धुसुतां कवीश्वराः ॥१४३॥

१४२. ॥ओं हार्दमूर्त्यै नमः ॥

व्याप्य त्रिलोकीं कमला स्वमूर्त्या स्थिता महत्या सममङ्गभूतम्।

अन्तर्गतं तत्र विधाय तस्मात् इमां महामूर्तिरितीरयन्ति ॥१४४॥

१४३. ॥ओं महामूर्त्यै नमः ॥

कीदृश्यहो मूर्तिरियं रमायाः इत्यत्र विज्ञानविजृम्भिताश्च।

निस्संशयं नेशत एवमेषा-व्यक्तेति नाम्ना पुनरुच्यतेऽतः ॥१४५॥

१४४. ॥ ओं अव्यक्तायै नमः ॥

न कोऽपि दोषो निजपादभक्त जनस्य सर्वज्ञहरेः स्फुटं स्यात्।

यथा तथा गूहनमाचरन्ती श्रीर्विश्वगोपिन्यभिधायुतेन्धे ॥१४६॥

१४५. ॥ओं विश्वगोपिन्यै नमः ॥

दत्ते धने यस्तु ददाति तस्य वित्ते क्षयो दृश्यत एव किन्तु।

ऐश्वर्यमास्ते बहुवर्धमानं लक्ष्म्याः तदाख्याऽप्यथ वर्धमाना ॥१४७॥

१४६. ॥ ओं वर्धमानायै नमः ॥

अवद्यं विद्यते यस्या अङ्गेषु न मनागपि।

समेष्वप्यनवद्याङ्गी नाम्ना भाति रमा ततः ॥१४८॥

१४७. ॥ओं अनवद्याङ्ग्यै नमः ॥

हेयगुणैर्हीनेयं सागरकन्या यतस्ततो नाम्ना।
निरवद्या देवीन्धे सकलावद्यविनाशको मनुस्सोऽयम्॥१४९॥

१४८. ॥ ओं निरवद्यायै नमः॥

धर्मं चार्थं कामं सेष्टे दातुं यतस्ततो देवी।
नाम्ना त्रिवर्गदा श्रीः मोक्षे कामं जपोऽस्य जनयेन्नः॥ १५०॥

१४९. ॥ ओं त्रिवर्गदायै नमः॥

अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा।
इत्युक्तेर्युज्यते तस्या अप्रमेयेति नाम तत्॥१५१॥

१५०. ॥ ओं अप्रमेयायै नमः॥

अवाप्तकामा यदियं ततश्च साध्यं न किञ्चित् क्रियया हि तस्याः।
तादृक्क्रिया नास्ति ततो रमायाः नाम्नाऽक्रिया भाति नुता बुधैस्सा॥ १५२॥

१५१. ॥ ओं अक्रियायै नमः॥

सर्वेषु वस्तुष्वपि संप्रवेश व्याप्ती यथार्हे अपि संभजन्ती।
सूक्ष्मेति नामाऽथ बिभर्ति देवी सूक्ष्मज्ञतामस्य जपो ददाति॥१४३॥

१५२. ॥ ओं सूक्ष्मायै नमः॥

परो निर्वाण इत्युक्तो मोक्षोऽमुं प्रददाति यत्।
श्रितेभ्यः प्रोच्यते लक्ष्मीः परनिर्वाणदायिनी॥ १५४॥

१५३. ॥ ओं परनिर्वाणदायिन्यै नमः॥

लोके वरं यत्तु भवेत्समं तत् श्रीमत्पदेनैव विशिष्यमाणम्।
ततो महत्त्वं न विगीतमस्या नामाऽविगीतेति ततो रमायाः॥१५५॥

१५४. ॥ ओं अविगीतायै नमः॥

वेदे तथा वेदशिरस्यपीयं तन्त्रे पटूनां कलितैर्विचारैः।
सिद्धिं स्वतत्त्वे धिय आतनोति तत्तन्त्रसिद्धेति समाख्ययेन्धे ॥ १५६ ॥

१५५. ॥ ओं तन्त्रसिद्धायै नमः ॥

यद्विष्णुपत्नीति निरुप्यते श्रीः तस्मादनन्येति रवेः प्रभेव।
तद्योगपूर्वं धियमाविशन्ती श्रीर्योगसिद्धेति तदाख्ययेन्धे ॥ १५७ ॥

१५६. ॥ ओं योगसिद्धायै नमः ॥

अमरास्सूरयो नित्या अनन्तगरुडादयः।
ईश्वरी तु रमा तेषां तस्मान्नाम्नाऽमरेश्वरी ॥ १५८ ॥

१५७. ॥ ओं अमरेश्वर्यै नमः ॥

विश्वं सृजत्यथ दयामयचित्तयुक्ता
दत्वेन्द्रियादिकमनेन भजेत् परं माम्।
नित्यैस्समं च भवतादिति मन्यमाना
तद्विश्वसूतिरिति नाम ततो रमायाः ॥ १५९ ॥

१५८. ॥ ओं विश्वसूतये नमः ॥

विद्याधनादि सकलं प्रददाति देवी
हस्तादिमिन्द्रियगणं पशुदारपुत्रान्।
सत्कर्म कुर्विति समानिति तर्पयन्ती
नाम्नाऽथ तेन कमला किल तर्पयन्ती ॥ १६० ॥

१५९. ॥ ओं तर्पयन्त्यै नमः ॥

नित्यांस्तु शेषगरुडप्रमुखान् समीक्ष्य नित्येन शेषविभवेन युतान् रमेयम्।
तृप्तिं लभेत; नहि तादृशतृप्तिरस्याः बद्धस्स्थितीक्षणत इत्यथ नित्यतृप्ता ॥ १६१ ॥

१६०. ॥ ओं नित्यतृप्तायै नमः ॥

संसाराग्निविदीपनव्यपगतप्राणात्मसञ्जीविनी
लक्ष्मीः काचन यन्महौषधिरियं श्रीभाष्यसूक्तिर्यथा।
श्रीरामानुजसंप्रदायविबुधाः श्रीगृध्रराजोक्तितः
रामे चाऽपि वने महौषधिरिति प्रीताः स्तुवन्ति श्रियम्॥ १६२॥

१६१. ॥ ओं महौषध्यै नमः॥

कृच्छ्रं गतो यं तु करोति शब्दं हाहेति चाम्बेति च तं तु सर्वम्।
मातेव वत्सस्य समाह्वयं स्वं शब्दाह्वया यन्मनुते रमेयम्॥ १६३॥

१६२. ॥ ओं शब्दाह्वयायै नमः॥

चराचरव्यपाश्रयस्समोऽपि शब्दः यथा हरिं रमां वदेत्तथा श्रियं नः।
इति स्थिते रमा तदीर्यते च शब्दसहेतिनामतो बुधैस्समैश्च लक्ष्मीः॥ १६४॥

१६३. ॥ ओं शब्दसहायै नमः॥

कृतेषु भक्तैश्शुभमेव कर्म कैङ्कर्यरूपं स्मरति प्रियेण।
तस्माद्रमां वेदविदो वदन्ति नाम्ना कृतज्ञेति मनुर्महानसौ॥ १६५॥

१६४. ॥ ओं कृतज्ञायै नमः॥

इह लक्ष्मीर्वसतीति प्रथयल्लक्षणमियं तनोतीति।
स्फुटरीत्या तद्देवीं नाम्ना कृतलक्षणां रमामाहुः॥ १६६॥

१६७. ॥ ओं कृतलक्षणायै नमः॥

वामेतरं वक्षसि भागमेवं वामोरुमस्याथ हरेस्तथैव।
वामेतरं पार्श्वमियं श्रितेति त्रिवर्तिनीं सिन्धुसुतां वदन्ति॥ १६७॥

१६६. ॥ ओं त्रिवर्तिन्यै नमः॥

स लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।
यथा तथेयमित्येषा त्रिलोकस्था रमेरिता॥ १६८॥

१६७. ॥ ओं त्रिलोकस्थायै नमः॥

भूलोकेऽथ भुवर्लोके स्वर्लोके चापि जायते।
गर्भवासं विना तस्माद्भूर्भुवस्स्वरयोनिजा॥ १६९॥

१६८. ॥ ओं भूर्भुवस्स्वरयोनिजायै नमः॥

घटपटकर्तारस्ते मृत्तन्त्वादि प्रगृह्य कार्याणि।
रचयन्ति तथा ग्राह्या कैश्चिदपीयं न तद्रमाऽग्राह्या॥ १७०॥

१६९. ॥ ओं अग्राह्यायै नमः॥

जगतां सृष्टाववने सकलान् गृह्णाति यद्रमा देवी।
उचिते मार्गे तस्मात् प्रोक्ता श्रीर्ग्राहिकेति नाम्नेयम्॥ १७१॥

१७०. ॥ ओं ग्राहिकायै नमः॥

वस्तुपरिच्छेदो वा देशानेहः कृतोऽथ वाऽस्या न।
अस्ति परिच्छेदस्तच्छ्रीस्साऽनन्ताह्वया रमा भाति॥ १७२॥

१७१. ॥ ओं अनन्ताह्वयायै नमः॥

सर्वोत्तरो विष्णुरयं समिन्धे तस्मादसौ भाति रमा परं तु।
यदुत्तरा भक्तजनस्य दृष्टौ सर्वातिशायिन्यभिधा तदस्याः॥ १७३॥

१७२. ॥ ओं सर्वातिशायिन्यै नमः॥

भक्तापराधैः कलुषत्वमेषा नाप्नोति भर्तेव नभोऽमलं तम्।
प्रसादयन्ती च विभाति तस्मात् तां व्योमपद्मेति वदन्ति सन्तः॥ १७४॥

१७३. ॥ ओं व्योमपद्मायै नमः॥

संसारी ना वृजिनकरणे पाटवं संप्रधत्ते
शास्ता विष्णुस्तदुचितपथे दण्डदाने तथैव।
मुक्तिस्स्यात्तत् कथमिति सदा चिन्तयन्ती ह्युपायान्
एका देवी ननु कृतधुरा सेर्यते तेन नाम्ना॥१७५॥

१७४. ॥ ओं कृतधुरायै नमः॥

कामैस्सर्वैः अपि बहुविधैः पूर्णतामादधाना
कामस्याम्बा कमलमधि सा संवसन्ती विभाति।
देवीं तस्मात् कथयति गणः पण्डितानां रमां तां
विष्णोः पत्नीं विततविभवां पूर्णकामेति नाम्ना॥ १७६॥

१७५. ॥ ओं पूर्णकामायै नमः॥

मा दण्डनां देहि दयस्व रक्षेत् -येवं वशीकृत्य समादिशन्ती।
तमीश्वरं भक्तजनानवन्ती महेश्वरी मा कथितेति नाम्ना॥ १७७॥

१७६. ॥ ओं महेश्वर्यै नमः॥

आर्तीस्स्वकीया सुलभेन वक्तुं तत्सन्निधौ पारयतीह भक्तः।
तस्मात्सुवाच्यां मुनयो वदन्ति नाम्ना रमां तद्गुणविद्धचित्ताः॥१७८॥

१७७. ॥ ओं सुवाच्यायै नमः॥

भक्तार्तिवाचो भगवान् स चाऽपि शृणोति सर्वं हि यथा तथैषा।
वक्तीति नाम्ना किल वाचिकां तां वदन्ति सन्तो वनजानिवासाम्॥ १७९॥

१७८. ॥ ओं वाचिकायै नमः॥

सत्यं कथनं सर्वं भविता देव्या यतस्ततो लक्ष्मीः।
सत्यकथनाभिधाढ्या जपतामभिधामिमां जयो नित्यम्॥१८०॥

१७९. ॥ ओं सत्यकथनायै नमः॥

न्यासं पापं ह्युभयमपि ये यौगपद्येन कुर्युः
तानप्येषाऽवति करुणया सान्द्रपापान् प्रपन्नान्।
''संकोचो मे न भवति समे रक्षणीयाः श्रिता माम्''
इत्येवं श्रीश्चरति तदियं सर्वपालिन्यभिख्या॥ १८१॥

१८०. ॥ ओं सर्वपालिन्यै नमः॥

नीलाक्षीयं जनकतनया राघवस्य प्रियेति
वायोः सूनुर्यदभजततां लक्ष्यमाणां स्वलिङ्गैः।
सर्वोत्कृष्टां रघुपतिमपि व्याप्य सर्वः स शब्दः
यत्रेन्धे श्रीःभवति विनुते लक्ष्यमाणेति तेना ॥१८२॥

१८१. ॥ ओं लक्ष्यमाणायै नमः॥

अस्याः कान्तं सकलजगतां नायकं वक्ति वेदः
अस्या वासादुरसि भगवान् श्रीनिवासस्स इन्धे।
इत्थं देवी परमपुरुषं लक्षयन्ती रमेयं
स्वाख्यां धत्ते जलधितनया लक्षयन्तीति सार्थाम्॥१८३॥

१८२. ॥ ओं लक्षयन्त्यै नमः॥

ज्येष्ठोऽस्य जगतां देवः प्रिया तस्य रमा यतः।
जगज्ज्येष्ठा ततो लक्ष्मीः जगदे वेदपण्डितैः॥१८४॥

१८३. ॥ ओं जगज्ज्येष्ठायै नमः॥

शुभानि पुष्णाति सदा नतेभ्यः शुभावहा तेन रमाऽऽख्ययेन्धे।
शुभाश्रयस्तत्पतिविग्रहोऽपि तदाश्रयादेव हि तादृशोऽस्ति॥१८५॥

१८४. ॥ ओं शुभावहायै नमः॥

जगत्समस्तं तदपाङ्गसंश्रयं वदन्ति मान्या इति पद्मजेयम्।
जगत् बिभर्तीति न संशयस्तत् जगत्प्रतिष्ठेति रमाभिधेन्धे॥१८६॥

१८५. ॥ ओं जगत्प्रतिष्ठायै नमः॥

धनधान्यादिकं दत्त्वा पोषयन्ती नतान् सदा।
नाम्ना भुवनभर्त्रीति रमा भाति बुधैस्तुता॥१८७॥

१८६. ॥ ओं भुवनभर्त्र्यै नमः॥

गूढा समन्तादपि यत् प्रभाऽस्याः विसृत्वरा तेन रमा स्तुतेयम्।
गूढाप्रभावत्यभिधामुदीर्य गुरुत्तमैस्तत्पदपद्मसक्तैः ॥१८८॥

१८७. ॥ ओं गूढाप्रभावत्यै नमः ॥

किङ्करैः क्रियमाणानां क्रियाणां तत्फलैरियम्।
योगं तनोति तस्माच्छ्रीः क्रियायोगात्मिकेरिता ॥१८९॥

१८८. ॥ ओं क्रियायोगात्मिकायै नमः।

रक्षणे सुदृढा देवी रमा भाति सदा यतः।
मूर्तिरित्युच्यते नाम्ना मुकुन्दमहिषी बुधैः ॥ १९० ॥

१८९. ॥ ओं मूर्त्यै नमः ॥

योगिनां हृदयाब्जेषु निवासं कुरुते यतः।
हृदब्जस्था रमा प्रोक्ता विबुधैर्भक्तियन्त्रितैः ॥१९१॥

१९०. ॥ ओं हृदब्जस्थायै नमः ॥

स्तन्यं ततो दुग्धमथो यवागुः इति प्रजावर्धनसत्क्रमेण।
सत्वोदयं सद्गुरुलाभमुक्ती ददाति जीवस्य महाक्रमा तत् ॥१९२॥

१९१. ॥ ओं महाक्रमायै नमः ॥

समष्टिव्यष्टिवर्ण्याभ्यां हीनायां दिवि वासतः।
परमायां रमा नाम्ना परमद्यौरितीरिता ॥१९३॥

१९२. ॥ ओं परमदिवे नमः ॥

भक्तानामीहमानानां निजाराधनमेति सा।
सामीप्यं पूर्वमेवेति रमा प्रथमजेरिता ॥१९४॥

१९३. ॥ ओं प्रथमजायै नमः ॥

आत्मनामपि सर्वेषां आत्मभूताऽब्धिकन्यका।
नियन्त्रीति रमा प्रोक्ता परमात्मेति नामतः ॥१९५॥

१९४. ॥ ओं परमात्मने नमः ॥

जगत् समस्तं सकलान्निधीनतस्-समाप्न्युयात्तेन जगत्प्रसूरिति।
जगन्निधिर्नामत एव पण्डितैः नुता रमा सागरसम्भवेयम् ॥

१९५. ॥ ओं जगन्निधये नमः ॥१९६॥

आत्मा परस्यादरविन्दनेत्रः तस्येयमास्ते निरपायपत्नी।
आत्मानपायिन्यभिधा ततोऽस्याः आत्मज्ञबृन्दैरनघा व्यधायि ॥१९८॥

१९६. ॥ ओं आत्मानपायिन्यै नमः ॥

नारायणस्यास्ति समा स्वरूप-रूपात्मधर्मैर्विभवेन धाम्ना।
स्वरूपतुल्येति रमां तदाहुः नाम्ना श्रुतेस्सारविदो महान्तः ॥१९८॥

१९७. ॥ओं तुल्यस्वरूपायै नमः॥

लक्षणानीश्वरस्याऽस्याः आदित्वं मुक्तिदातृता।
समानीति रमा प्रोक्ता नाम्नेयं समलक्षणा ॥१९९॥

१९८. ॥ ओं समलक्षणायै नमः ॥

शरणागतरक्षादिवृत्तैरपि रमा सदा।
तुल्या पत्युस्ततो देवी तुल्यवृत्तेति कीर्तिता ॥२००॥

१९९. ॥ ओं तुल्यवृत्तायै नमः ॥

वयसा चापि तस्येयं अनुरूपाऽम्बुजा यतः।
नाम्ना समवया लक्ष्मीः कीर्तिता कविभी रमा ॥२०१॥

२००. ॥ ओं समवयसे नमः ॥

यस्याः पतिस्सर्वजगद्विधर्ता ब्रह्मादयश्चापि कुमारभूताः।

सा मोदमाना न कथं सदा स्यात् तन्मोदमानेति रमेरितेयम्॥२०१॥

२०१. ॥ ओं मोदमानायै नमः॥

खगेषु मुख्यः खगशब्दवाच्यः स पक्षिराजो गरुडो ध्वजेऽस्याः।

खगध्वजा तेन समीरितेयं नाम्ना रमा वेदविदां वरिष्ठैः॥२०३॥

२०२. ॥ ओं खगध्वजायै नमः॥

सर्वाण्यपि रमायास्तु कार्याणि महतां सदा।

प्रियाणीति कृतं नाम प्रियचेष्टिति तत् श्रियः॥२०४॥

२०३. ॥ ओं प्रियचेष्टायै नमः॥

पत्युस्तु शीलेन समं बिभर्ति शीलं रमा यत् सततं ततश्च।

श्रीस्तुल्यशीलेति ततस्स्तुतेन्धे बुधैश्चैरस्सागरसंभवेयम्॥२०५॥

२०४. ॥ ओं तुल्यशीलायै नमः॥

वरं प्रशस्तं प्रददाति नित्यं नताय नैवाऽवरमित्यतस्सा।

प्रोक्ताऽथ नाम्ना वरदेति भक्त्या वराणि सर्वाणि जपोऽस्य दद्यात्॥२०६॥

२०५. ॥ ओं वरदायै नमः॥

स कामकामोऽपि हरिस्सदाऽस्याः रूपं वरं कामयमान आस्ते।

तत्कामभूतं किल रूपमस्याः तत्कामरूपिण्यभिधा रमायाः॥२०७॥

२०६. ॥ ओं कामरूपिण्यै नमः॥

सर्वाण्यपि वराण्यस्यां लक्षणानीह योषिताम्।

समग्रलक्षणामेतां नाम्ना सन्तः स्तुवन्ति तत्॥२०८॥

२०७. ॥ ओं समग्रलक्षणायै नमः॥

अनन्ता हि गुणा यस्मात् कल्याणा मधुराः अपि ।
अस्या इति रमा तस्मात् अनन्ता परिकीर्तिता ॥२०९॥

२०८. ॥ ओं अनन्तायै नमः ॥

भूतिर्यदस्या परमस्य भूतेः तुल्या नितान्तं श्रुतिभिः प्रशस्ता ।
तत्तुल्यभूतीत्यभिधां विधाय स्तुवन्ति भक्त्या कमलां श्रुतिज्ञाः ॥२१०॥

२०९. ॥ ओं तुल्यभूत्यै नमः ॥

सदाऽविकारा यदियं स्वभावे सनातनीं तेन रमां मुनीन्द्राः ।
समाह्वयेनाभिनमन्ति नित्यं सनातनं मार्गमुपाश्रिता ये ॥ २११ ॥

२१०. ॥ ओं सनातन्यै नमः ॥

समस्तलोकस्य समं च योगं क्षेमं विधातुं च समर्थभूता ।
महद्विभूतिर्वितता तदीया महर्द्धिरस्या अभिधा ततश्च ॥२१२॥

२११. ॥ ओं महर्द्धये नमः ॥

प्रसादपरसङ्कल्पोऽवितथोऽस्यास्सदा ततः ।
कीर्तिता सत्यसङ्कल्पा रमा तेन बुधोत्तमैः ॥२१३॥

२१२. ॥ ओं सत्यसङ्कल्पायै नमः ॥

ऋग्वेदमध्ये बहवस्स्तुवन्ति श्रीसूक्तपूर्वाहि ऋचः किलैताम् ।
तत् बहवृचाख्या कमलाऽभिधेयं श्रीसूक्तपारायणपुण्यदात्री ॥२१५॥

२१३. ॥ ओं बह्वृचायैनमः ॥

परमेशो हरिश्चऽपि देवी मे भवतादिति ।
श्रियं कामयते तस्मात् कमला परमेश्वरी ॥२१५॥

२१४. ॥ ओं परमेश्वर्यै नमः ॥

जगन्त्येषाऽपराधौघदुष्टान्यपि दयामयी।
रक्षन्तीव शिशून् माता जगन्मातेति कीर्तिता॥ २१६॥

२१५. ॥ ओं जगन्मात्रे नमः ॥

अल्पाक्षरं स्वा_ु सदा दधाति वाक्यं रमा सूत्रमिवेति नाम्ना।
सा सूत्रवत्यस्ति तथास्य नाम्नो जप्ता भवेत् सूत्रविदां वरिष्ठः ॥२१७॥

२१६. ॥ ओं सूत्रवत्यै नमः ॥

भूतानि सर्वाणि बिभर्ति देवी प्ानं तथान्नादि च संवितीर्य।
श्रीर्भूतधात्रीति ततस्स्तुतेयं नाम्नो जपादस्य सुपुष्टता स्यात् ॥२१८॥

२१७. ॥ ओं भूतधात्र्यै नमः ॥

यशो विशालं दधती रमेयं न केनचित् निन्दितकीर्तिरास्ते।
यशस्विनी नाम ततो दधाना यशस्विनस्स्याम जपादमुष्य ॥२१९॥

२१८. ॥ ओं यशस्विन्यै नमः ॥

समेऽपि संसारिजना भवेयुः मुक्ता इतीमं सततं दधाना।
महाभिलाषं मधुवैरिकान्ता महाभिलाषेति विभाति नाम्ना ॥२२०॥

२१९. ॥ ओं महाभिलाषायै नमः ॥

शुभानि सर्वाणि हरेस्सुयोगात् सूते रमा तेन सवित्र्यभिख्या।
सावित्र्यभिख्याऽपि तदर्थ एव सा सौति सर्वाणि जपात् शुभानि ॥२२१॥

२१९. ॥ ओं सावित्र्यै नमः ॥

सृष्ट्या मुदं प्राप्य विभाति देवी सहैव कान्तेन परं प्रधानम्।
मोदान्वितानामथ सा पुरस्तात् तस्मात् प्रधानां कथयन्ति नाम्ना॥ २२२॥

२२१. ॥ ओं प्रधानायै नमः ॥

सर्वं विलीनं प्रलये रमेयं प्रकाशपूर्णं कुरुते दयार्द्रा।
तत्सर्वभासिन्यभिधां दधाना सा भासते माधवधर्मपत्नी ॥२२३॥

२२२. ॥ ओं सर्वभासिन्यै नमः ॥

विष्णुस्सर्वगतो विभाति तदखिलं स्वार्थे धरन् सर्वदा
तच्छक्त्ये यमयन्पृथक्स्थितिकथादूरे स्वशेषं समम्।
कुर्वन्नित्थमिदं जगन्निजतनुं तद्वत् रमेयं स्थिता
तस्माच्छ्रीर्महिता विभाति कथिता नानावपुर्नामतः ॥२२४॥

२२३. ॥ ओं नानावपुषे नमः ॥

इत्थं सर्वतनुर्यदस्ति कमला तेनाऽथ भेदास्स्थिताः
नानाऽस्या इति नामतो बहुभिदा लक्ष्मीस्स्तुता पण्डितैः।
एतन्नाम जपन् भवेद्बहुविदां नेता जनो भक्तिमान्
सर्वत्रापि समत्वबुद्धिसहितो लक्ष्मीहरी तोषयन्॥२२५॥

२२४. ॥ ओं बहुभिदायै नमः ॥

सर्वं सृष्ट्युपयुक्तवस्तु जगतां जानाति देवी स्वयं
सर्वज्ञा जननी ततश्च कथिता नाम्ना बुधैस्सिन्धुजा।
एतन्नाम जपन् भवेत् स्वयमसौ भक्तो बुधैश्श्लाघितः
सर्वज्ञश्च सभासु पण्डितमणिः लक्ष्मीनिवासस्सदा ॥२२६॥

२२५. ॥ ओं सर्वज्ञायै नमः ॥

अविज्ञातार्थतत्त्वैश्च कीर्त्यमानेषु नामसु।
हन्त्यघं त्विति सा पुण्यकीर्तना कीर्त्यते रमा ॥२२७॥

२२६. ॥ ओं पुण्यकीर्तनायै नमः ॥

एको विष्णुर्महद्भूतं पृथग् भूतान्यनेकशः।
भूताश्रयेति भूतानां समेषामाश्रया रमा ॥२२८॥

२२७. ॥ ओं भूताश्रयायै नमः ॥

हृषीकाणामियं देवी हृषीकेशस्य चेश्वरी।
सुगन्धपुरि सेव्येयं हृषीकेशेश्वरी रमा ॥२२९॥

२२८. ॥ ओं हृषीकेशेश्वर्यै नमः ॥

शोकापनोदनरता निजकिङ्कराणां
देवी रमा सकलदेवमनुष्यनन्द्या।
विष्णोः प्रिया विविधधामनिवासिनी साऽ
शोकाभिधा जयति हस्तिगिरीक्ष्यमाणा ॥२३०॥

२२९. ॥ ओं अशोकायै नमः ॥

वाजिनामिन्द्रियाणां श्रीः वाहिका सत्पथे यतः।
विबुधैर्वन्दिता भाति नाम्नेयं वाजिवाहिका ॥ २३१ ॥

२३०. ॥ ओं वाजिवाहिकायै नमः ॥

स्वरूपतो व्याप्य जगत् स्थितेयं गुणैरनन्तैरथ मङ्गलैश्च ।
बृहत्त्वमित्थं वहतीति देवी ब्रह्मात्मिकेति स्तुतिलक्ष्यमास्ते ॥२३२॥

२३१. ॥ ओं ब्रह्मात्मिकायै नमः ॥

पुण्ये रतान् यत्कुरुते स्वभक्तान् देवी सदा तानार्यजनान् तथैव।
तस्मादियं पुण्यजनीति देवी नाम्ना रमा भाति समीड्यमाना ॥२३३॥

२३२. ओं पुण्यजन्यै नमः ॥

नित्यं परं तत् पदमस्ति कस्मात्? नित्येच्छयाऽस्या ननु सत्यमेव।
नित्यं तदस्याः किल कामतो यत् तत् सत्यकामेत्यभिधा तदीया ॥२३४॥

२३३. ॥ ओं सत्यकामायै नमः ॥

समाधिकाले स्वयमेत्य देवी साक्षात्कृतेस्तुल्यदशाभिसेव्या।
भवेदितीयं परिकीर्त्यते श्रीः समाधिभूरित्यभिधासमेता ॥२३५॥

२३४. ॥ ओं समाधिभुवे नमः ॥

हितमपि रमणीयं तत् विबुधैः पठितं हिरण्यमित्येतत्।
परमं पदमिह याऽऽस्ते गर्भ इवेयं हिरण्यगर्भोक्ता ॥२३६॥

२३५. ॥ ओं हिरण्यगर्भायै नमः ॥

अवाकी स तु गाम्भीर्यात् अनादर इति श्रुतः ॥
अस्याः पतित्वमाप्यैषा गम्भीरा न कथं भवेत्? ॥२३७॥

२३६. ॥ ओं गम्भीरायै नमः ॥

मानातीतं विपुलमनघं तत्तु रूपं रमायाः
गौर्भूस्तस्या भवति हि तनूः धूलिरस्याऽग्रतस्तु।
गौर्धूलिस्स्यादिति हि कथयत् नाम देव्या विभाति
गोधूली तज्जपति कमला संप्रसन्ना सदा स्यात् ॥२३८॥

२३७. ॥ ओं गोधूल्यै नमः ॥

कमले देव्याऽऽसीना कमला कमलासनस्य मातेयम्।
कमलासनेति नाम्ना कमलं दातुं जपोऽस्य नाम्नो नः ॥२३९॥

२३८. ॥ ओं कमलासनायै नमः ॥

पापिनि क्रोधमूर्तिं तं पतिं स्ववचनैर्जितम्।
कृत्वा रक्षणदात्रीति जितक्रोधा रमोच्यते।२४०॥

२३९. ॥ ओं जितक्रोधायै नमः ॥

कुशब्दवाच्या धरणी स्थितानां तस्यामियं यच्छति यन्मुदं श्रीः।
तेनाब्धिकन्या कुमुदिन्यभिख्यां धत्ते जपादस्य सदा प्रमोदः ॥२४१॥

२४०. ॥ ओं कुमुदिन्यै नमः ॥

क्लिष्टाऽपि माला सुरभिस्सुरम्या सा वैजयन्तीति वदन्ति सन्तः।
न चाऽपराधैः कलुषा कदाऽपि श्रीर्वैजन्यतीव तदेव नाम ॥२४२॥

२४१. ॥ ओं वैजयन्त्यै नमः ॥

फलप्रदाने कमला प्रसक्ता जवेन युक्ता मनसो ददाति।
फलानि देवी त्वरितेति नाम मनोजवेत्यस्ति समुद्रपुत्र्याः ॥२४३॥

२४२. ॥ ओं मनोजवायै नमः ॥

सेवनीया धनायायां देवीयं करुणामयी।
नामाऽस्यास्तु ततो भाति धनलक्ष्मीरिति श्रुतम् ॥२४४॥

२४३. ॥ ओं धनलक्ष्म्यै नमः ॥

स्वस्त्यस्तु विश्वस्य सदेति देवी भद्राणि कृत्वा परिपालनं नः।
करोति तस्मात् कमलां स्तुवन्ति नाम्ना नताः स्वस्तिकरीति सन्तः ॥२४५॥

२४४. ॥ ओं स्वस्तिकर्यै नमः ॥

राज्यार्थिभिः परा सेवा लक्षीकृत्य रमां यतः।
क्रियते तेन नामास्या राज्यलक्ष्मीरिति श्रुतम् ॥२४६॥

२४५. ॥ ओं राज्यलक्ष्म्यै नमः ॥

महान्ति भद्राणि सदा ददाति महासती तेन रमा दधाति।
महाभिधां मङ्गलसन्ततिर्नः महत्यदोमन्त्रजपेन भूयात् ॥२४७॥

२४६. ॥ ओं महासत्यै नमः ॥

जिगीषुभिस्सदा सेव्या जयसिद्ध्यै रमा यतः।
जयलक्ष्मीस्तु नाम्नैषा स्तूयते मुनिपुङ्गवैः ॥२४८॥

२४७. ॥ ओं जयलक्ष्म्यै नमः ॥

मातर्मैथिलि! राक्षसीस्त्वयि तदा सार्द्रापराधास्त्वया
रक्षन्त्या पवनात्मजाल्लघुतरा रामस्य गोष्ठी कृता।

भट्टार्यैरिति वर्णिता भगवती देवी महागोष्ठ्यतो
नाम्नेयं वितरत्वतीव शुभदे श्रेयःपथे मे रतिम् ॥२४९॥

२४८. ॥ ओं महागोष्ठ्यै नमः ॥

लोकानामपि सर्वेषामीश्वरीति रमोच्यते।
मघोनीत्याख्यया देवी महितैर्मुनिपुङ्गवैः ॥२५०॥

२४९. ॥ ओं मघोन्यै नमः ॥

मा लक्ष्मीर्धवः कान्तोऽस्याः माधवस्तत्प्रिया सदा।
नाम्ना तेन कवीन्द्रैः श्रीः प्रोच्यते माधवप्रिया ॥२४१॥

२५०. ॥ ओं माधवप्रियायै नमः ॥

पद्मं हृदयं भजतां तस्यान्तर्या प्रतिष्ठिता देवी।
शिशुरिव गर्भे मातुः तस्मान्नाम्नाऽथ पद्मगर्भेयम् ॥२५२॥

२५१. ॥ ओं पद्मगर्भायै नमः ॥

अस्या निश्वसितं वेदाः अथवायमवातरत्।
तन्नाम्नेति मुनेरेषा प्रोक्ता वेदवती रमा ॥२५३॥

२५२. ॥ ओं वेदवत्यै नमः ॥

पाथोजानामसाहस्रपादभागनिरुक्तितः।
पादव्यथानिवृत्याऽऽस्याः पादयोः प्रणमाम्यहम् ॥२५४॥

शेषपूरणमस्याऽथ शेषिदंपतिसंमुदे।
शिष्टायुषि यथा मे स्यात् शिष्टानां स्यात् कृपा तथा ॥२५५॥

॥ इति श्रीलक्ष्मीसहस्रनामनिरुक्तौ प्रथमः पादः ॥

***

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

१७॥ श्रीचेम्बूरहोबिलमठश्रीलक्ष्मीध्यानश्लोकाः ॥

(साधारण्येन ध्यानम्)

सेवे पश्चिमसागरस्य तटगे चेम्बूर्मठेऽवस्थितां
प्रह्लादाय वरप्रदस्य रमणीं नारायणे योगिनि।
आसक्तामनघामभीतिवरदौ हस्तौ दधानां तथा
पश्चाद्बाहुयुगेन पद्मयुगलं हस्तीद्धपार्श्वद्वयाम् ॥१ ॥

(मूलबिम्बध्यानम्)

भूषारत्नगणोज्ज्वलां भगवतीं चेम्बूर्मठेऽवस्थितां
तां देवीं कनकात्मजाय वरदे सक्तां सदा बिभ्रतीम्।
पाणिभ्यामभयं वरं च पुरतः पश्चात् सरोजे तथा
भक्त्या त्वं भज हे! मनो मम महालक्ष्मीं प्रभामध्यगाम् ॥२ ॥

(उत्सवबिम्बध्यानम्)

लक्ष्मीं चेश्चभिधां समुद्रतटगे चेम्बूर्मठेऽवस्थितां
हस्त्यासेवितपार्श्वयुग्ममधुरां भूषागणैरुज्ज्वलाम्।
प्रह्लादाय वरप्रदस्य महिषीं पाण्योर्दधत्पङ्कजां
अन्याभ्यामभयं वरं च नमतां सेवे ददानां सदा ॥३ ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥श्रीनिधये वात्स्य श्रीनिवासराघवाचार्यमहादेशिकाय नमः ॥

॥ करुणात्रिवेणी ॥

तत्र संस्कृतवाङ्मयभूतम्

॥ गङ्गास्रोतः ॥

तत्र द्वितीयः

॥२. वेदान्तविभागः ॥

तत्र

॥ अधिकरणमाधवी ॥

(तत्र तत्र श्रीभाष्याधिकरणेषु श्लोकवार्तिकभूता)

॥आचार्यवन्दनम् ॥

श्रीतातपादान् प्रणमामि भक्त्या येषां प्रसादाद्विहृतिर्ममेयम् ।
श्रीभाष्यपीयूषमहासमुद्रे भीतिं विना वादितिमिङ्गिलेभ्यः ॥१ ॥

आदौ

॥ जिज्ञासाधिकरणम् ॥


१. ॥अखिलेति श्लोकभावसङ्ग्रहः ॥

निर्विघ्नपूर्त्यै निजवाङ्मयस्य श्रियःप्रिये बुद्धिमपेक्षमाणः ।
तद्भक्तिरूपां प्रथमेऽत्र पद्ये भव्यानुशास्तिं कुरुते यतीन्दुः ॥२ ॥

तत्राखिलेत्याद्यपदं यतीन्द्रः पर्यायशब्दान्निखिलादिसर्वान् ।
सन्त्यज्य वृङ्क्ते प्रणवाकृतित्वं संपादयन् भाष्यकृतेः परं तत् ॥३ ॥



श्रीमद्भगवद्भाष्यकाराः तदङ्घ्रिच्छायायां
तत्प्रत्त-तदीयश्रीभाष्यसिंहासनाधिरूढाः तद्भागिनेयाः
श्री (नडादूर् आळ्वान्) वरदविष्णुमिश्राः (ग्रन्थकर्तुः कुलकूटस्थाः) च ॥



श्रीभाष्यटीकाभूत- श्रीश्रुतप्रकाशिकादायिनः- नडादूरम्माळ्वात्स्यवरदेशिकाः
(ग्रन्थकर्तुः कुलकूटस्थाः) तदुत्सङ्गेकिशोरदेशिकाः
"प्रतिष्ठापितवेदान्तः प्रतिक्षिप्तबहिर्मतः ।
भूयास्त्रैविद्यमान्यस्त्वं भूरिकल्याणभाजनम् ॥"
इति तदीयानुग्रहं भजन्तः च ॥

२. ॥ अखिलपदभावोपन्यासे कृतज्ञताविष्कारः ॥

तद्भावजिज्ञासुतया स्थितस्य कण्डूतिमुत्प्रेक्ष्य यदीयतातः।
श्वेताद्रिवास्तव्यपुरश्शिखस्य पादाब्जवासं प्रसमादिदेश ॥३॥

येनाथ तस्याङ्घ्रियुगं श्रितेन शिष्यत्वपुत्रत्वकृती विधाय।
तस्मादवाप्याखिलभाष्यभावः नागाचले शिष्यगणे वितीर्णः ॥४॥

यस्य प्रसादादिह भाष्यटीका घण्टागुरुश्चापि समुज्ज्वलौ स्तः।
श्रीभाष्यसिंहासनात्मनीन- पितामहायाथ यतीश्वरेण ॥५॥

प्रत्तं प्रसंरक्ष्य चकास्ति योऽसावस्मत्कुलादिर्गुरुसार्वभौमः।
यद्भक्तिरूपां वरदो मतिं तां समीक्ष्य चाम्बेति समाजुहाव ॥६॥

इत्थं च चित्रोदयमेनमीड्यं को वा सुधीर्भाष्यरतोऽत्र पद्ये।
विस्मर्तुमीष्टे तदहं स्मरामि प्रणम्य मूर्ध्ना वरदार्यमेनम् ॥७॥

३. ॥ मङ्गलाचरणे शास्त्रसंक्षेपः ॥

पद्यादिमार्धे परमस्य पुंसः निदानता तत्र विरोधरोधः।
उपायता चास्य फलत्वमेवं ह्यध्याययुग्मद्वयलभ्यमुक्तम् ॥८॥

पद्योत्तरार्धे श्रुतिदीप्ततोक्तेस्समन्वयन्यायमथाऽस्य शब्दैः।
व्युत्पत्तिमस्मिन्नथ लक्ष्यतां च शब्देतरागोचरतां तथाऽऽह ॥९॥

जन्मस्थेमपदेनात्र युगपत्सर्गसंहृतिम्।
नेच्छतां गुरुभाट्टानां मताप्रामाण्यसूचनम् ॥१०॥

लीलापदमथाऽत्राऽह साक्षिचैतन्यवादिनाम्।
भारतीकान्तमार्गस्थवचनानामसारताम् ॥११॥

विनतेत्यादिना ध्वस्ता ब्रह्माज्ञानमतेरिता।
परमेण च जीवानां परस्परमभिन्नता ॥१२॥

श्रुतीत्यादिपदेनाथ वेदबाह्यमतं समम्।
चार्वाकार्हतबुद्धोक्तम् तदपष्ठिवति सूचितम् ॥१३॥

तेनैव पदेनाथ निरस्ता हैतुकास्समे।
आनुमानिकमीशं तं वदन्तो वादवाग्भटाः ॥१४॥

ब्रह्मणीति पदेनाथ परमाणूनां निदानता।
स्वायत्तेति वदन्तस्ते साङ्ख्यवैशेषिकादयः ॥१५॥

श्रीनिवासपदेनाथ जटाधारिमते स्थिताः।
ईश्वरोत्तीर्णमेवैतत् ब्रह्म स्यादिति वादिनः ॥१६॥

शेमुषीतिपदेनाथ ज्ञानकर्मसमुच्चयम्।
मोक्षसाधनमिच्छन्तो भास्करीयाः निवारिताः ॥१७॥

भक्तिरूपपदेनाथ वाक्यार्थज्ञानमात्रतः।
विमुक्तिं कामयमाना मायासक्ता निवारिताः ॥१८॥

॥४॥ द्वितीयमङ्गलश्लोकविषयाः ॥

पद्ये द्वितीये गुरुवन्दनं तत् कार्यं स्वशिष्यैरिति शिक्षणं च।
कुर्वन् स्वसूक्तेः विषयं ब्रवीति प्रयोजनं चापि तथान्वयश्च ॥१९॥

विषयोऽत्र परं ब्रह्म तत्प्राप्तिस्तु तथा भवेत्।
प्रयोजनं तयोस्तत्र संबन्धो विशदस्तथा ॥२०॥

॥५॥ भगवद्बोधायनकृतां...इति पङ्क्तेर्भावः ॥

ऋषिवाक्पदवीप्राप्तं सूत्रवर्णार्थवर्णनम्।
कथयन् सूचयत्यत्र प्रामाण्यं निजवाक्कृतेः ॥२१॥

॥६॥ प्रथमसूत्रे पदयोजना॥

अथस्य प्रतियोगी स्यात् विचारः कर्मणामिह ।
अल्पास्थिरफलान्येव ददते तानि यत्ततः ॥२२।

इति वृत्तस्य हेतुत्वं अतश्शब्देन वर्णितम्।
बृंहयत्-बृहतो ज्ञानं ब्रह्मणस्तु प्रयच्छति ॥२३॥

अनन्तमक्षयञ्चेति ह्यापातज्ञानवान् नरः।
विशदं च दृढं ज्ञानं प्राप्तुमर्हति तत्त्वतः ॥२४॥

इतीदं ब्रह्मजिज्ञासापदेनात्रोपपादितम्।
जिज्ञासेति पदे सन् च स्वार्थ एवात्र तिष्ठति ॥२४॥

इच्छां विधातुं नहि कश्चिदीष्टे तदिष्यमाणा किल धीरिहेष्टा।
सन् चापि तत्र स्वयमेव तादृक्प्रीतिर्भवेदित्यभिसूचनाय ॥२५॥

इति सौत्रपदव्याख्या बोधायनमुनेः पथि।
मुनिरेव पटुर्ज्ञातुं मुनेस्सूत्रकृतो हृदम् ॥२६॥

॥७॥ पूर्ववृत्तविचारे साधनचतुष्टयकथने अनौचित्यम्।

नित्यानित्यविवेकश्च, शमोऽथान्यो दमस्तयोः।
साधनश्रीरिति युग्मं तत्, इहामुत्राऽपि भोगतः ॥२७॥

वैराग्यश्च, मुमुक्षुत्वं पूर्ववृत्तं चतुष्टयम्।
मृषाद्वैतिमते प्रोक्तं कुतस्त्वत्र न गृह्यते? ॥२८॥

योऽयं विवेको भवतामभीष्टः धर्मे विना ज्ञानमिहाप्यते किम्? ।
विना विचारं श्रुतिचोदितानां धर्मे कथं वा दृढमाप्यते धीः? ॥२९॥

द्वेधा स्थितानामथ चेन्द्रियाणां निषिद्धकार्येषु निवारणं हि ।
दमश्शमश्चाक्षनिषिद्धकार्यज्ञानञ्च वा तेन विनाऽऽप्यते किम्? ॥३०॥

अल्पोऽस्थिरो भोग इहाप्यमुत्र मतिस्त्वियं वा कथमाप्यते सा? ।
तेभ्यो विमुक्तौ रतिमान् मुमुक्षुः तदज्ञानहीनस्य कथं च तत्त्वम्? ॥३१॥

एकेन कर्माभिविचारणेन पूर्वाभिवृत्तेन वृतं त्वया च ।
चतुष्टयं तत् यदि लभ्यते चेत् का हानिरित्थं कथने तवेह? ॥३२॥

अस्मन्मते लाघवलाभ एवं उद्गीथचिन्ता च तथाङ्गचिन्ता ।
विद्याभिदाभेदविचार एवमपेक्षते कर्मविचारदाक्ष्यम् ॥३३॥

तापत्रयज्ञानमिहोक्तवन्तौ स भास्करो यादवसंयमी च ।
तत्रापि पूर्वं कथितस्समाधिः सदुत्तरं दातुमलं समिन्धे ॥३४॥

॥८॥ शास्त्रैक्यम् ॥

इदं यतः कर्मविचारपूर्वकं ततस्स बोधायनवृत्तिकारः ।
षट्कद्वयं कर्मविचारसक्तं चतुष्टयं देवविचारसक्तम् ॥३५॥

तल्लक्षणानां निजशिष्यमूलं कृत्वा तु सूत्राणि मुनिस्स कृष्णः ।
अध्याययुग्मद्वयमाततान ब्रह्माभिलक्ष्यान्तिमभागभूतम् ॥३६॥

इत्याह तस्मादिदमेकमेव शास्त्रं समिन्धे क्रमसङ्गतीद्धम् ।
अग्रे तदाराधनचिन्तनानि सद्वारमद्वारकमन्त्यभागे ॥३७॥

सद्वारकाराधनशास्त्रभागे सद्वारकं सूत्रविधानमस्य।
अद्वारकाराधनशास्त्रभागे चाद्वारकं सूत्रविधानमस्य ॥३८॥

व्यासस्य विष्णोरिति चातुरीं तां को वा न मृष्येत् भुवि वैदिकोऽत्र?।
शास्त्रैक्यमित्थं दृढसिद्धमस्ति स शङ्करार्योऽपि तथैव मेने ॥३९॥

बोधायनोक्त्या यतिराज आसीत् प्रतारितश्चेति जगाद कश्चित्।
अथाभिदाख्यं मतमास्थितानां भिदाग्रहोऽप्यत्र कलेर्हि लीला ॥४०॥

॥९॥ अध्ययनविधिः, तेन रागतः कर्मविचारपूर्वकः ब्रह्मविचार इति पर्वक्रमः॥

स्वाध्यायसंस्कारपरो विधिस्स्यात् स्वाध्याय आस्ते यदिहाऽत्र कर्म।
कार्यान्तरस्याऽथ तु योग्यतायाः आपादनं संस्कृतिरिष्यते यत् ॥४१॥

स्वाध्याय इत्थं किल वेदवर्णग्रहे विरामं भजतीति युक्तम्।
तस्मादथापातात एव लब्धान् अर्थान् विचारेण दृढीकरिष्यन् ॥४२॥

मीमांसते रागत एव बोद्धा यद्येवमस्याथ परस्य चापि।
स्वाध्यायतस्साऽमतिरस्ति चेति तद्ब्रह्म साक्षादथ संविचार्यम् ॥४३॥

तस्माद्विचारो न हि कर्मणां स्यात् तत्पूर्ववृत्तत्वकथा गता स्यात्।
अनेन वादेन विना विचारं तद्ब्रह्मणोऽप्यस्य तथा प्रवृत्तिः ॥४४॥

नास्मिन् विचारे; नहि युज्यतेऽयं वादो यतसंशयमेवमेव।
विपर्ययं चापि न तीर्ण आस्ते विना विचारं पुरुषो हि लोके॥ ४५॥

स एव हेतुः किल कर्मणाञ्च विचारणे किं न भवेद्वदेह।
वेदोक्तकर्माणि विचार्य तेभ्यो लभ्यं फलं फल्गु न शाश्वतञ्च ॥४६॥

ज्ञात्वा नरोऽनन्तमथाक्षयं च लभ्यं फलं ब्रह्मविदः परं तत्।
श्रुत्वा तदीयेऽथ विचार एष प्रवर्तते पक्ष इतीह युक्तः ॥४७॥

॥१०॥ कर्मविचारो ब्रह्मविचारप्रतीप इति लघुः पूर्वपक्षः ॥

अभिदामतितो भविता हि पुमानथ मुक्त इति श्रुतिभावमिमम्।
न भवानधिगच्छति तेन मतिः भिदयाऽऽहितकर्मविमर्शनगा ॥४८॥

सर्वापेक्षा युक्ता युग्ये तुरगे यद्वत्तद्वत् ब्रह्म।
प्राप्तुः कर्मसमुच्चितमेवं सूत्रं ब्रूते ज्ञानं पश्य ॥४९॥

सूत्रस्य भावो भवता न संयक् ज्ञातस्ततस्त्वेवमिहार्थमाह।
यन्निर्विशेषं ब्रह्म चिदस्ति तस्य विज्ञानतोऽज्ञानविनाश इन्धे ॥५०॥

अज्ञानमविद्या तस्या निवृत्तिर्मोक्ष उच्यते।
वर्णाश्रमभिदाधारं कर्म तत्साधनं कथम्? ॥५१॥

नित्यप्राप्तं यतो ब्रह्म साध्यता तस्य वा कथम्?
प्रतिबन्धनिवृत्तेश्च नान्यदत्र तदिष्यते ॥५२॥

क्षीयन्ते कर्मतो लभ्या फलसंघा यथाऽत्र हि।
तथाऽमुत्र भवन्तीति वदन्ती श्रूयते श्रुतिः ॥५३॥

भेदावलम्बीति विरोधि कर्म क्षयिष्णुदायीति विरुद्धताऽथ।
द्वेधेति कर्मास्ति विरोधिभूतं मुक्तेः कथं साधनताऽस्य युक्ता? ॥५४॥

यो ब्रह्म विद्यात् स भवेत् स्वयं तु ब्रह्मेति वेदस्स्वयमेव वक्ति।
अर्थान्तरं प्राप्तुरतो न चास्ति प्राप्यं त्विति स्पष्टमितीरयन् तत् ॥५५॥

तमेव विदित्वा मृत्युं अतिक्रान्तः पुमानसौ।
भविता नाऽस्ति पन्थाऽन्यो मुक्तये चेति वर्णितम् ॥५५॥

न्यायानुग्रहजुष्टानां श्रुतीनां पुरतः कथम्? ।
अविद्यामपि विद्याञ्च विदित्वेति वदत्श्रुतिः ॥५६ ॥

तर्कानुग्रहदूरस्थाऽविशदा स्थातुमर्हति ।
निस्सहाया किलैका च बहूनां विमतौ स्थिता ॥५७॥

विद्या च यज्ञादिमपेक्षमाणा स्थितेति सिद्धान्तसृतिर्यदेषा ।
स भास्करो यादवमस्करी च प्रायस्समानाविह सर्व एते ॥५८ ॥

विरोधमित्थं द्विविधं प्रदर्शितं मखादयो वेदनकामनाप्तये ।
विधीयमाना इति सन्-समेत-तत्-श्रुतिस्स्थवर्णौघसमीक्षणेन च ॥५९ ॥

विविदिषया युक्तश्चेत् शान्तो दान्तस्समाहितो भूत्वा ।
पश्येदात्मनि तं चेत्युक्त्या शमदममिहान्तरङ्गं स्यात् ॥६० ॥

कर्मणामिति तेनात्र नोपयोगो यतस्ततः ।
प्रतीपत्त्वं च समालोच्य पूर्ववृत्तिमतं त्यजेः ॥६१ ॥

॥११॥ तदुपरि लघुस्सिद्धान्तः ॥

अविद्यानिवृत्तिर्हि मोक्षस्य चापि स्वयं ब्रह्म विज्ञानसाध्यो भवेन्नः ।
इतीदं यदुक्तं तदङ्गीकृतं तत् परं ब्रह्मविज्ञानमुक्तं यदत्र ॥६२ ॥

वाक्यार्थविज्ञानमितीरितं हा! तद्रोचतां शास्त्रविदां कथं वा?
वाक्यार्थविज्ञानमिदं विधेयं यतो न भूयादपि तस्य चाथ ॥६३ ॥

विज्ञानतो नास्ति निवृत्तिरस्याः प्रत्यक्षमेतत् सहसा समेषाम् ।
दोषाय नेदं शशिरेक एव भातीति विज्ञानविजृम्भणेऽपि ॥६४ ॥

चन्द्रद्वयाज्ञाननिवृत्त्यलाभः दृष्टो हि लोके तिमिरामयस्य ।
अज्ञानमूलं यदिहास्ति संयक्छिन्नं ततो वासनया स्थितेन ॥६५ ॥

अज्ञानलेशेन न काऽपि हानिः इत्यादिकं नैव समाधिरत्र।
सा वासना वस्तुत एव नास्ति मिथ्या किलाज्ञानविजृम्भणं ते ॥६६ ॥

ज्ञानेन बाध्यं तदहो वदन् त्वं तद्वासनां केन तदप्रबाध्याम्।
वदेः पुनर्भेदमतिस्स्वमूले छिन्नेऽपि तिष्ठेदिति बालिशोक्तिः ॥६८॥

चन्द्रद्वयज्ञाननिदानरोगः स वस्तुतो यत् परमार्थभूतः।
विना चिकित्सां नहि बुद्धिमात्रनिवर्त्य एवं विषमोपमेयम् ॥६८॥

वाक्यार्थविज्ञानत एव तस्मात् अन्यत् भवेत् बन्धनिवृत्तिदायि।
ज्ञानं तदेतत् भजनं तथा च ध्यानं तथोपास्तिरितीर्यमाणम् ॥६९॥

निचाय्य तं मृत्युमुखात् प्रमुच्यते श्रुतीरितं त्वेतदिहापि दृश्यम्।
चायुर्हि धातुर्ननु दर्शनेऽयं तद्दर्शनस्यैव समानरूपम् ॥७०॥

ध्यानं तदेतत् श्रुतितस्स्फुटं च तं ध्यायथात्मानमिति ब्रुवन्त्याः।
द्रष्टव्य आत्मेति तदर्थमेव श्रोतव्य इत्याद्यनुवादवाचः ॥७१॥

उपासनं वेदनमेवमेव ध्यानं तथा दर्शनमित्यथाऽपि।
प्रज्ञानकृत्यं सममेतदूचे भक्तिं तथा सूत्रकृदाह चाद्ये ॥७२॥

आवृत्तिपादे भगवान् स सूत्रे ध्यानं ध्रुवाऽनुस्मृतिरेतदेव।
यत्र स्वयं दर्शनतुल्यतया स्यात् दृष्टे तु तस्मिन्निति मुण्डकोक्तिः ॥७३॥

स वाक्यकारोऽपि तदेतदाह प्रत्यक्षतापत्तिरियं परं तु।
तद्दर्शनं लभ्यमिदश्च तस्य यो वा भवेद्वा वरणीयताढ्यः ॥७४॥

लोके प्रियतमो भूयाद्वरणीयो जनस्य सः।
योऽस्मिन्स्तु नितरां प्रीतः स एवेति न संशयः ॥७५॥

ध्रुवाऽनुस्मृतिरेषैव भक्तिरित्यभिधीयते।
भक्त्या त्वनन्यया शक्यः इति गीतासु वर्णितम् ॥७६ ॥

ध्रुवाऽनुस्मृतिरेषाऽथ कर्मभिश्च मखादिभिः।
साध्येति च यज्ञादिसापेक्षा सेति सूत्रितम् ।७७ ॥

ध्रुवानुऽनुस्मृतिरेषा च विवेकादिभिराप्यते।
सप्तभिस्साधनैश्चेति वाक्यकारेण वर्णितम् ॥७८ ॥

छान्दोग्योपनिषद्भाष्यं वाक्यमित्यभिधीयते।
तत्कर्ता ब्रह्मनन्दी च वाक्यकार इतीड्यते ॥७९ ॥

विवेकः कायशुद्धिस्स्यात् शुद्धाहारनिषेवणात्।
विमोकः कामजेतृत्वं अभ्यासश्चिन्तनं तथा ॥८० ॥

शुभाश्रय इतीर्यस्य हरिरूपस्य सन्ततम्।
पञ्चानामपि यज्ञानां अनुष्ठानं दिने दिने ॥८१ ॥

यथाशक्ति क्रिया प्रोक्ता कल्याणं च दयादयः।
गुणाः अनवसादोऽथ दैन्यादिविहीनता ॥८२ ॥

अनुद्धर्षोऽतिसन्तोषदूरगत्वमितीरितम्।
इति सप्तभिरेवात्र निष्पन्नं भजनं भवेत् ॥८३ ॥

अविद्या सा भवेद्या तु विद्याभिन्ना तदुच्यते।
कर्माऽविद्येति तस्माच्च विद्यानिष्पत्तिरीरिता ॥८४ ॥

अविद्या कर्म तद्वैधं तया भक्तिनिरोधकम्।
पापं मृत्युपदेनोक्तं विद्योत्पत्तिप्रतिबन्धकम् ॥८५ ॥

तरतीति श्रुतेरर्थः ईशावास्ये भवेदथ।
अविद्ययेति यत्रास्ते ऋगियं च मनोहरा ॥८६ ॥

विरोध एवास्ति न कर्मणां धियः प्रमाणमास्तेऽप्यथ कर्मणैव।
विद्याभिनिष्पत्तिरथोपयोगः तस्मात् तथा साधनसप्तकोक्तेः ॥८४ ॥

न केवलं धीरिह साधनं स्यात् कर्माङ्गकं स्यात् भजनम् परं तु।
मोक्षाप्तये साधनमेवमेव सिद्धान्त इन्धे लघुरीतिक्लृप्तः ॥८५ ॥

ज्ञानाख्यवस्तुन्यथ तादृशी सा सामर्थ्यता काचन भाति तस्मात्।
कर्मानपेक्षा भविता मतिस्सा मोक्षप्रदात्रीति मृषामतोक्तिः ॥८६ ॥

महतैव प्रबन्धेन वर्णनीया यतस्ततः।
महानथ भवत्यत्र पूर्वपक्षोऽस्य वर्णनात् ॥८७ ॥

॥१२॥ महापूर्वपक्षे वर्णिता विषयाः।

१. ब्रह्मेव भूयात् परमार्थमेकं; २.मिथ्या तदन्यः सकलः प्रपञ्चः।
३. कथं पुरो भाननमस्य? तच्चाऽविद्याविलसादिति तत्स्वरूपम् ॥८८ ॥

४. सा चाप्यविद्या भजते विनाशं त्वद्वैतमत्यैव न चास्ति पन्थाः।
अन्योऽत्र ५. मिथ्येति कथं प्रपञ्चः प्रत्यक्षलभ्यो भवतोच्यतेऽयम् ॥८९ ॥

प्रत्यक्षबाधा ननु शास्त्रतोऽत्र प्राबल्यमस्यैव मिथो विरोधे।
६. शास्त्रे तथा चोत्तरमेव भूयात् मिथो विरोधे प्रबलम् ततश्च ॥९० ॥

निषेधशास्त्रस्य विधेरपेक्षा यतस्तस्स्यात् तस्य तदुत्तरत्वम्।
तस्मान्न मानं सगुणश्रुतिस्स्यात् ७. सत्यं तथा ज्ञानमनन्तमित्थम् ॥९१ ॥

समानभूताधिकृतौ भजेरन् यथाऽन्वयं तस्य पथः कथाऽथ।
९. विशेषणैस्तत्प्रतिकोटिभूतप्रतीपता ब्रह्मण उच्यते सा ॥९२ ।

इत्यत्र सर्वस्य च लक्षणेयं शास्त्रज्ञगोष्ठ्या किल लालितैव।
१०. एवं भवद्भ्रान्तिपथेन गत्वा प्रत्यक्षगृह्यो भवति प्रपञ्चः ॥९३॥

इतीरितं वस्तुत एव तत्र सन्मात्रमेवास्ति समक्षगृह्यम्।
११. निरूपितुं नैव हि पारयेस्त्वं भेदं पदार्थं बहुयत्नतोऽपि ॥९४॥

१२. सन्मात्रमुक्तं किल गृह्यमाणं समक्षमेषा त्वनुभूतिरिष्टा।
१३. सिद्धा स्वतस्सा ह्यनुभूतिरिन्धे १४. स्वयं प्रकाशात्वनुभूतिरेषा ॥९५॥

तथाऽनुमानात् १५. अथ सा च नित्या १६. नानात्वमस्या न कथाऽपि भूयात्।
ज्ञातृत्वमस्या न च युज्यते १७. तत् ज्ञातृत्वमास्ते न हि चात्मनोऽथ ॥९६॥

१३. ॥ महापूर्वपक्षवपाभूतस्सङ्ग्रहः ॥

प्राप्यं परं ब्रह्म तु निर्विशेषं प्राप्तं च नित्यं स्वयमेव यत्तत्।
तत्प्राप्तये तेन न साधनं स्यादुपासनं वस्तुसमर्थतेयम् ॥९७॥

अज्ञानमास्ते तु मृषामयं यत् निवार्यमेतत् मतितो न चात्र।
तस्याः परं किञ्चिदपेक्षितं तत् समर्थतैवं ह्यपरा विभाति ॥९८॥

वाक्याभिजन्या फलदायिनी यत् मिथ्याभिबन्धस्य भयप्रदातुः।
निवर्तिकेयं मतिरैक्यधीस्सा न कर्मणाऽऽप्येति समर्थताऽन्या ॥९९॥

वस्तुसामर्थ्यमित्येवं त्रिधा भाति; विचारधीः।
कर्म नाऽपेक्षते तस्मात्तद्विचारो न पूर्वजः ॥१००॥

१४. ॥ महासिद्धान्ते वर्णिता विषयाः।

(१) न शब्दो नाऽऽनुमानं वा नाऽपरोक्षमथाऽऽपि नः ॥
निर्विशेषस्य कस्याऽपि बोधने पटुतां भजेत् ॥१०१॥

प्रमाणाभासवादेन प्रतारणकथाऽन्यथा।
निर्विशेषं परं ब्रह्म निष्प्रमाणमिति स्थितिः ॥१०२॥

(२) नित्यं परं ब्रह्म समीरयन् तत् स्वयंप्रकाशं भवतीति घुष्यन्।
तदेकमित्यत्र समीरयन् च तन्निर्विशेषं वदतीति हास्यम्॥१०३॥

सविशेषं परं ब्रह्म स्वसिद्धान्तेऽपि चास्य तत्।
निर्विशेषं परं ब्रह्म वदतोऽस्य ततस्स्फुटम्॥१०४॥

(३) निर्विशेषपदेनापि सर्वधर्मविहीनता।
नोच्यते निर्धनो लोकेऽक्रममाणो यथा तथा॥१०५॥

निर्विकल्पकमेव स्यात् अग्निमे ग्रहणं त्विति।
पिण्डे कथनश्चापि समानार्थकमेव तत्॥१०६॥

(४) भेदाभेदकथा चापि जातिव्यक्तिसमुत्थिता।
व्यक्त्यात्मनाऽत्र भेदोऽस्ति जातितो न भिदा परम्॥१०७॥

इति वादेन जाता सा प्रसङ्गात् विनिवारिता।
धर्मधर्मिभिदापूर्णा प्रतीतिर्जृम्भते यतः ॥१०८॥

(५) भेदो दुरुपपादः स्यादिति वादस्य खण्डनम्।
भेदो भवति किं सोऽयं स्वरूपं वस्तुनोऽथवा॥१०९॥

धर्म इत्यपि पृष्ट्वाऽत्र विकल्पं वदता परम्।
स्वरूपं यदि भेदस्स्यात् भ्रम एव न संभवेत्॥१११॥

संशीतिरपि लोकेऽतः स्वरूपकथनं कथम?।
स्वरुपादतिरिक्तश्चेत् गोनिष्ठस्तुरगादितः ॥११२॥

भेदोऽयं गोरभिन्नो वा भिन्नो वा? स वृषाऽग्रिमे।
अश्वादिभेद इत्येव न तद्भिन्न इति स्थितिः ॥११३॥

प्रतीतिर्न तथा तस्मात् भिन्न इत्येव यत् पुनः ॥११४॥

प्रतीतिस्स्थापनायाऽस्याः आश्रयाश्रयितोदितः।
अङ्गीकार्योऽथ भेदस्स्यात् तथा च प्रथमं भवेत् ॥११५॥

प्रतीतिर्न हयोऽयं गौः इति चानन्तरं पुनः।
अश्वभेदो वृषा नाऽयं अश्वभिन्नः परं त्विति ॥११६॥

अश्वभेदो गवीहायं स्वयं सिद्ध्यति वा पुनः॥
भेदतो वा वदेर्धीमन्! अग्रिमे तु भवेत्तव ॥११७॥

आत्माश्रयस्तथाऽन्यस्मिन् अन्योन्याश्रयकिल्बिषम्।
चक्रकं ह्यनवस्था वा भेदान्तररतौ फलेत् ॥११८॥

भेदो दुरुपपादस्तत् इति वाद्यद्य पृच्छ्यते।
स्वरूपं किमयं भेद धर्म इत्यभिपृच्छता ॥११९॥

स्वतन्त्रभेदकल्पोऽन्यो नाङ्ग्यकारि किमु त्वया।
अङ्ग्यकारीति वादे तु भेद इष्टः परं तव ॥१२०॥

न्यूननिग्रहपातस्स्यात् विकल्पन्यूनताकृतः।
कल्पोऽयं नेति वादे स्यादज्ञानमिति निग्रहः ॥१२१॥

अथ कल्पद्वयं वक्त्रा कल्पयोर्भेद इष्यते।
अन्यथा कथमेषा स्यात् विकल्पोक्तिर्बत पण्डित! ॥१२२॥

भेदं स्वयं चेति मतौ दधानः तस्यापलापाय यतिष्यसे त्वम्।
अभेदमादाय विकल्प इत्थं कृते दशा ते भविताऽथ का वा? ॥१२३॥

क्वचित् स्वरूपं भविता हि भेदः येनैव शुक्तौ रजतभ्रमस्य।
निवारणं तद्वदयं पुनस्स्यात्धर्मो घटादिष्विति सत्पथोऽयम् ॥१२४॥

भेदस्स्वपरनिर्वाहपाटवं वहति स्वयम्।
इति सिद्धान्त इन्धेऽयं यतिराजप्रदर्शितः ॥१२५॥

(६) सन्मात्रं प्रत्यक्षगृह्यं वदति यदिह तत् शास्त्रमार्गप्रतीपं
लोके या नः प्रतीतिः व्यवहृतिरपि ते पुष्यतो नाऽस्य पक्षम्।
(७) संस्थानं जातिरन्यत् भवति पुनरतो नैव संस्थानवत्सु
(८) मिथ्या यद्बाधितं तत् भवति पुनरितो लक्षणं नाऽन्यदस्याः ॥१२६॥

(९) अन्येषां स्वानुमेया विषयविशददा ध्यन्तरस्याऽपि लक्ष्या
सोत्पत्तिप्रागभवा स्वयमुभयमियं साधयेच्चानुभूतिः।
(१०) कुम्भादेर्धीरनित्या (११) विषयविरहिता संविदस्तीत्यपष्ठु
(१२) प्राप्तिस्तस्यासुषुप्ताविति मतमपि च तथा युक्तियुक्तं न भूयात् ॥१२७॥

(१३) सुषुप्तिकालेऽप्यहमर्थसिद्धिः (१४) नाना तथा स्युस्त्वनुभूतयोपि।
(१५) अथानुभूतेरपि सत्स्वरूपनिरूपणं (१६) तद्भ्रमसंसहत्वम्॥ १२८॥

(१७) स्यादात्मा संविदेवेत्यपि तु मतमिदं नैव युक्तं (१८) यदुक्तं
त्वात्मा धीरेव भूयात् विषयविरहितेत्येतदप्येवमेव।
(१८) भूयादात्माऽहमर्थः श्रुतिकथितपथे यामुनार्योक्तिरेवम्
दीपस्येव प्रभाऽस्य प्रभवति च मतिर्ज्ञानभूतस्य धर्मः ॥१२९॥

(१९) ज्ञानं द्रव्यं तथा स्यात् गुण इति च यथा सप्रभस्य प्रभा सा
(२०) शीर्णा दीपप्रतीकाः दधति पदमिमे तत्प्रभाणामितीयम्।

उक्तिस्तुच्छा न युक्ता श्रुतिकुलसरणेः दूरगा तैत्तिरीये
ह्यन्तोदात्तस्वरं यत् प्रविलति पदं ज्ञानमित्यात्मवाचि ॥१३०॥

(२१) यस्माद्धर्मी सदाऽऽत्मा भवति निजधिया वेदवित्संप्रदाये
आत्मा न स्यात् जडोऽ (२२) तस्तन्मतमपि वितथं ज्ञातृताध्यासवादि।
(२३) ज्ञातृत्वे विक्रियत्वं त्विति न च घटते (२४) तच्च तस्य स्वभावः
(२५) नित्या धीधर्मभूता भजति मतिमतः कर्मणो ह्रासवृद्धी ॥१३१॥
(२६) मुक्तौ स्याच्चानुवृत्ता मतिरहमिति यथा वामदेवानुभूतौ
(२७) भिन्नोऽहङ्कारतत्त्वात् अहमिति कथितः प्रत्यगात्मा ध्रुवं नः।
(२७) ब्रह्मान्यत् स्यान्मृषेति प्रकथनफलं शास्त्रमिथ्यात्व (२८) मस्मात्॥
सत्यस्य ज्ञानं न लभ्यं भवति न मृषा सत्यसिद्धिं ददाति ॥१३२॥

(२९) सत्यास्स्वाप्नाः पदार्थाः प्रविदधति ततस्सूचनं सत्यमेव
(३०) शास्त्रं सत्यं धियः प्राक् उदयत इति तत् कस्य साधोरभीष्टम्?।
(३१) वेदे घुष्टं विशिष्टं (३२) परमथ पठितं ब्रह्म तच्चाद्वितीयं
त्वेकं विश्वस्य हेतुत्रियमिति मतिं दातुमेवं किलोक्तिः ॥१३३॥

शाखास्सर्वा मतौ यत् सकलसुगुणं तत्त्वमस्यादिवाच्यम्
सद्विद्यायां (३४) गुणानां कथनमपि तथा निर्गुणोक्त्या न बाध्यम्।
प्राजापत्ये व्यवस्था वचसि विषयजात् भेदतो दर्शितेत्थं
(३५) भीषाऽस्माद्वाक्यमेतत् विशदयति गुणे सादरत्वं श्रुतीनाम्॥१३४॥

(३६) वाक्यं यस्यामताद्यं ह्ययविषयममिमं वक्ति मत्या न चैव
ब्रूते सर्वप्रकारैरविदित इति वै (३७) तद्वदन्या न दृष्टेः।
इत्येषा ज्ञातृतां तामपलपति न वै ब्रह्मणो जीवभक्तिं
त्यक्त्वा ब्रह्माऽऽनमेस्त्वं त्विति वदति परं युज्यते ह्यर्थ एषः ॥१३५॥

(३८) आनन्दाद्यं च वाक्यं कथयति परमं ब्रह्म सानन्दमेव
(३९) नाना नेहेति वाक्यं न पृथगिह ततस्सिद्धमस्तीति वक्ति।
ब्रह्मान्यन्नैव सत्यं त्विति न कथयते (४०) चोदरं त्वन्तरादि
ध्याने विच्छेदतस्तां भियमिह भजतां नैव भेदेन भीतिम्॥१३६॥

(४१) पुराणवाक्येष्वपि नैव सिद्धिः तन्निर्विशेषस्य परस्य तस्मात्।
तद्वस्तुसामर्थ्यकथा परास्ता सर्वैः प्रमाणैरिति सिद्धमेतत्॥१३७॥

(४२) अनुपपन्नमिदं त्विति दर्शयन्मतमयं यतिशेखर एधते।
अनुपपत्तिकुलाचलवर्णनैः सदसदित्यभिवर्णनदूरगे॥१३८॥

(१) आश्रित्य ज्ञानमात्रं प्रभवति नटनं तेन नाश्या त्वविद्या
कर्तुं नैवाऽ; (२) थ सूर्यं तम इव परमं ज्ञानमात्रं कथं वा।
आच्छाद्यैषा विहर्तुं प्रभवति तु (३) तथा तत्स्वरूपेऽथ सत्ये
द्वैतं स्यादन्यथा चेत् भवति हि परमं ब्रह्म दोषोऽथ नाश्यम्॥१३९॥

(४) सद्वाऽसद्वेति वक्तुं पटुरिह न भवेत् कोऽपि तेनास्त्यविद्याऽ-
निर्वाच्या सेति चोक्तं न तु घटत इदं सत्प्रतीतिप्रतीपम्।
(५) भावाज्ञाने प्रयोगस्त्वनुमितिविषये वर्णितो दुष्ट एवं
शब्दो नाऽत्रानुकूलस्त्विति न भवति पुनः किञ्चिदत्र प्रमाणम्॥१४०॥

(६) अस्याः कुर्यान्निवृत्तिं श्रुतिगणपठितं ज्ञानमैक्यस्य चेति
ब्रूषे तत्राथ यत्तत् श्रुतिकथितमिति स्वप्रलब्धं धनं तत्।
(७) ऐक्ये सिद्धे मुमुक्षुर्भजति च विलयं कस्स्वनाशं विदन् तां
मुक्तिं काङ्क्षेत् ततस्ते न भवति महितस्तन्निवर्त्यश्च पश्येः॥१४१॥

वस्तुसामर्थ्यवादस्य भञ्जनानन्तरं त्विति।
सिद्धवस्तु हि शब्देन नैव बोध्यं भवेदतः ॥१४२॥

शास्त्रारम्भो वृथेत्येवं वादी मीमांसकः स्थितः।
सिद्धवस्तुनि शब्दस्य समार्थ्यं परिदर्शयन्॥१४३॥

तद्वादध्वंसनं तन्वन् सूत्रकारो विराजते।
आदिमाऽधिकृतिस्सेत्थं भाषिता यतिशेखरैः ॥१४४॥

***

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ अथ ईक्षत्यधिकरणम् ॥

सामवेदोत्तमाङ्गेरितं श्रूयते गौतमस्सूनवे शासकं वर्णयन्।
''सौम्य! सत्त्वेकमेवाग्रतो निस्समं हीदमासैक्षत स्यामहं तद्बहु ॥१ ॥

इत्यतस्तेज उत्पादयामास; तत् शम्बरं सृष्टवच्चेक्षणादीदृशात्।
वारि तत् सृष्टवच्चान्नमेतादृशं स्थावरं चाण्डजं स्वेदजं जीवजम् ॥२ ॥

यत् समं दृश्यते तत् त्रिभिर्बीजवत् एभि ''रित्याह'' तन्नामरूपान्वितम्।
जीवदेहं त्रयं ह्याविशत् कल्पयेत् '' अत्र सत्शब्दितं वादिभिः कापिलैः ॥३ ॥

आनुमानाख्यया वर्णितं स्यादिदं युज्यते स्त्रीपदेनेरितं पिण्डकम्।
सौख्यदं जानये मोहदं कामुके चान्यपुंस्याधिदं तस्य कान्तान्तरे ॥४ ॥

स्त्रीजने; सौख्यमोहाधि सञ्जायते सात्त्विकाद्राजसात्तामसात्तद्गुणैः।
तत् त्रिभिर्मण्डितं कारणं कापिलं पूर्वपक्षोदयस्त्वैवमत्रोच्यते ॥५ ॥

ईक्षतिर्धातुरत्रेरितश्श्रूयते यादृशं त्वीक्षणं तेन संवर्णितम्।
अत्र तद्वीक्षणं चेतनेऽन्यादृशे युज्यते तत्क्षमे सर्ववित्पूरुषे ॥६ ॥

सर्वतस्सृष्टिसंवर्णने चेक्षणं तत्कृतं युज्यते पुंसि तत्-शब्दतः।
सूक्ष्मचिच्चेतनाहीनसद्देहकः कारणं कार्यतां सोऽथ संपद्यते ॥७ ॥

स्थूलचिच्चेतनाहीनसद्देहकस्सुष्ठु तत् कथ्यते पूरुषे हेतुता कार्यता।
ईक्षणे गौणता नो स आत्मेति गीः श्रूयते भूयसी गौतमेनेरिता ॥८ ॥

वृष्टितो बीजवत् हर्षमापेतिवत् गौणतामात्मवाक् सर्वथोत्सारयेत्।
तत् त्रिकं तत्प्रवेशोर्जितं वस्तुतां प्राप्य रूपादिभाक् चेति मुख्यार्थता ॥९ ॥

ध्यानतः कारणस्याश्रुते मोक्षमित्यादि वाग्विद्यते; गौतमेनाऽभणि।
ध्यानमेवाऽत्र विज्ञातइत्यादिभिः; वेद चाऽऽचार्यवान् पूरुषस्तं त्विति ॥१०॥

सूनुरस्याऽपि तं ज्ञातवानित्यदोघट्टगा वाक्ततिर्भूयसी श्रूयते।
भक्तियोगार्थिका ध्यानवाक् ज्ञानवाक् वेदमूर्ध्नीति तत् स्पष्टतरस्थापितम् ॥११॥

कापिलध्यानतश्चेतनाहीनता तत्क्रतुन्यायतः केन वा वार्यते।
कापिलध्यानतो मुक्तिरित्युच्यते नाऽपि तत्तन्त्रगैस्तत्त्वयं न स्फुटम् ॥१२॥

हेयता स्मार्तगा नाऽपि सा वर्णिता वेदमौल्यन्तरे या स्फुटं वर्णिता।
एकविज्ञानतस्सर्वविज्ञानमित्यादिसन्धाऽपि सा हीयते चेतने ॥१३॥

कापिले कारणे घोषिते चेतनोत्पादकं हा! पुनस्सत् कथं तद्भवेत्?।
स्वाप्ययो वर्णितः पूरुषो यत् सति स्वात्मनीहाऽश्रुते स्वप्नजं तं लयम् ॥१४॥

या निरुक्ताऽऽख्यया ऽलङ्कृतिस्तां भजन् स्वाशयं गौतमो व्यक्तमेवाब्रवीत्।
कारणे लीनता कार्यगा सङ्गताऽचेतने चेतनस्यात्मनस्सा कथम्? ॥१५॥

सर्ववेदान्तवर्गः परं श्रीपतिं ह्येकमेवाऽतुलं प्राह नारायणम्।
कारणं सर्वथा सामवेदान्तवाक् तत्समां वा गतिं हा! कुतो नो भजेत् ॥१६॥

श्रूयते सर्ववित् चेक्षणात् सत् परं तादृशादेशवाक् शास्तृतामाह च।
सद्भूतं सत्स्थितं वर्णितं यत्समं चात्मता गीयते सद्गुणाः कामिताः ॥१७॥

तत्र सन्तीति वाक् वर्तते तेन वै निर्णयस्सत्परो लभ्यते।
ध्येयता कारणे व्याप्तिमत्यस्ति सा कालतो देशतस्साम्यतस्स्थापिता ॥१८॥

ध्येयता वर्णिता सत्स्थिता यत्ततो हेतुता चाऽपि सा व्याप्तितो लभ्यते।
पौरुषं सूक्तमप्याह तं श्रीपतिं लिङ्गभूयान्वितं तैत्तिरीयश्रुतौ ॥१९॥

जैत्रसत्स्रग्विणीमालया कल्पिता ब्रह्मसूत्रोदिता नीतिरित्थं मया।
वेदमौलीडिते हेतुतासन्मतेः *ईक्षतेरक्षतिः पुण्डरीकेक्षणे ॥२०॥

स्रग्विणीवृत्ततो योपदा कल्पिता स्रग्विणीर्वृत्ततस्स्वप्रजाः कल्पयन्।
स्रग्विणीं साहितीं स्वोक्तिभिर्भाति यः प्रीयतां श्रीनिधिर्मद्गुरुस्सोऽनया ॥२१॥

***

---

*ईक्षतेरक्षतिः पुण्डरीकेक्षणे ॥ इति चरमं पादं वहता श्लोकेन तत्सूचित-वृत्तकल्पितया अनतिपञ्चविंशतिकश्लोकात्मिकया कृत्या एतत्पादसूचित-सिद्धान्तवदधिकरणं श्रीभाष्यश्रुतप्रकाशिकासारांशजुष्टं देयमिति १९९४- तम संवत्सरे श्रीवात्स्यवरदेशिकविद्वत्सदसि अस्मदाचार्यपादैः दत्तायाः समस्यायाः पूरणाय त इमे श्लोका रचिता इत्यवधेयम् ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥अथ आनन्दमयाधिकरणम्॥

१. मङ्गलाचरणम्

आनन्दाख्यविमानान्तस्तिष्ठतो मेऽपि दैवतम्।
आनन्दमयमीडेऽहं मालोलं मुम्बईपुरे॥१॥

सुपर्णगोत्रे यतिनश्शठारेः सन्दर्शनाश्लेषसहोषितैर्यः।
प्रियश्च मोदश्च तथा प्रमोदं पक्षद्वयं प्राप्य विराजतीह॥२॥

तस्यैव सम्यमिपतेरथ भूमिकाभिः आनन्दपूर्ण इति विश्वजनीनमेतत्।
तासामियं लसति तित्तिरिसंहितायाः पट्टे प्रपाठकगतां दधतीह सङ्ख्याम्॥३॥

स्वाज्ञानमस्याः पुरतः प्रदर्श्य पात्रं दयायाः परमं भविष्यन्।
दयाकरो नाम शिशुस्तनोति कानीनशास्त्रे कविताविहारम्॥४॥

रामानुजार्यदृष्टेन मार्गेण कृपया पितुः।
आनन्दमयतत्त्वार्थविचाराय यते यते!॥५॥

२. सङ्गतिः

तस्माच्च विज्ञानमयाद्विभाति शारीर आत्माऽन्य इति श्रुतोऽस्ति।
आत्मा स चाऽऽनन्दमयो भवेत् कः इत्यद्य कुर्मश्श्रुतिभावचिन्ताम्॥६॥

जिज्ञासुवृत्तौ भृगुनामधारी ब्रह्माऽस्य जन्मादि यतस्तदेतत्।
आनन्द एवेति हि निश्चिकायेत्यग्रे विचार्या श्रुतिगीरपीह॥७॥

गते नये यत् प्रकृतिं हि लोकः शीघ्रं धियाऽश्लिष्यति तत्ततोऽस्याम्।
हेतुत्वबुद्धिं विनिवर्तयन् सः मुख्यार्थवानीक्षतिरभ्यसेवि॥८॥

मुख्यार्थवानेष च जीवतत्त्वे येनाऽस्य लोकस्य च कारणेन।
सताऽह्यभेदं श्रुतिरेव वक्ति भृगुप्रदृष्टश्च स एव भूयात्॥९॥

इत्याशया तत्र गताऽथ बुद्धिस्तत्पूर्ववाक्येष्वपि सञ्चरन्ती।
आनन्दवल्ल्यामवतीर्य धत्ते विचारमित्यत्र च सङ्गतिस्स्यात्॥१०॥

३. पूर्वपक्षः

शारीरवत्त्वं श्रुतिगीयमानं विश्वस्य हेतोरथ चैक्यवादः।
तस्मादिति स्पष्ट उपक्रमेऽत्र जीवे विना कुत्र रतिं भजेत?॥११॥

४. सिद्धान्तः

शतं शतश्चेति परंपरातः आनन्दमभ्यस्य निवर्तमाना।
परं वदेन्नैव तु जीवमेषा न *पुर्गले नन्दथुरीदृशस्स्यात्॥१२॥

५. पुच्छब्रह्मवादः

षष्ठी तु भेदं प्रकटीकरोति श्लोको न चानन्दमयं स आह।
अज्ञातता नास्ति हि वर्णितस्य मोदप्रमोदप्रियक्लृप्तमूर्तेः॥१३॥

विदेहतत्त्वस्य कथं नु तस्य प्रतीकसङ्गः परिवर्णितोऽयम्।
अन्यात्मवाक् सा परिशुद्धियाश्चा मयट् तदेत सकलं प्रतीपम्॥१४॥

तस्माद्भवेत् ब्रह्म तु पुच्छमेव सूत्रादपि स्यात् श्रुतिरेव मान्या।
इत्यादि मायाकथकोक्तिरत्र तूद्वृत्ति सञ्चारमियं तनोति॥१५॥

---

*पुर्गलशब्दः जीवात्मवाची। तथा च श्रीविष्णुपुराणम्-'' आत्मा च पुर्गलो जीवः यतस्सर्वा प्रसूतयः'' इति। अत्र विष्णुचित्तीयं'' पूरणाद्गलनाद्देहे पुर्गलाः परमाणवः''॥

६. पुच्छब्रह्मवादनिरासः

षष्ठ्यंशमाहाऽत्र न पुच्छमूचुश्श्लोकाः परं कल्पितमेव रूपम्।
तस्यैष आत्मेति निजे महिम्नि तस्य प्रतिष्ठां श्रुतिरत्र वक्ति॥ १६ ॥

शुद्धं नरेन्द्रस्य मनो मयि स्यादित्यादिरीत्या किल शुद्धियाञ्चा।
उपासकेन क्रियते तदेतत् सर्वं स्फुटं वो विवृणोमि भूयः ॥१७॥

मृदा वार्णा च चूर्णेन शुद्ध्यतेऽन्नमयो यथा।
प्राणायामपरिश्रान्त्या शोद्ध्यः प्राणमयस्तथा ॥१८॥

अन्धसा देवपूतेन पूयते तु मनोमयः।
प्रायश्चित्तादिसेवाभिः विज्ञानमयशोधना ॥१९॥

आसृष्टिसन्तता चास्मिन् अपराधगणा यतः।
एतैः कलुषितो नाथः विदुषोऽस्य धिया भवेत् ॥२०॥

शोधना नमसा तस्य प्रपत्त्या ह्युपपद्यते।
शुचिना कोशवर्गेण स्वात्मना चान्वितो हरिम् ॥२१॥

प्रसादयन्नयं वाञ्छेत् प्रपित्सुः परमं पदम्।
उपासीनस्ततो युक्तां आनन्दमयशोधनाम् ॥२२॥

आनन्द एवैष हि मोक्षदोऽस्य तस्मिन् प्रतिष्ठा ह्यभयश्च तस्य।
मानं मुदो वाङ्मनसस्य दूरे इत्यादि वेदे ननु कथ्यतेऽत्र ॥२३॥

प्राचुर्यतेजा रविरेष दृश्य इत्यादिवत् स्यान्मयडः प्रयोगः।
तत् ब्रह्म पुच्छं भविता न चेदं व्यर्थः प्रयत्नो भवतां समोऽयम् ॥२४॥

पुच्छाग्निजिह्वापरिदग्धलङ्कापुरस्य तस्याभिमुखस्य शत्रोः।
प्रच्छन्नबौद्धाः गतिमाप्तवन्तः पुच्छं परं ब्रह्म वदन्त इत्थम्॥२५॥

७. पुनः प्रधानपूर्वपक्षस्तत्खण्डनञ्च

विश्वस्य हेतुः किल जीव एव "तत्त्वंश्रुते" स्तन्नववारपाठात्।
मैवं; प्रकारैर्बहुभिर्विशिष्टं परं वदेत् सेति हि वैदिकेन्द्राः॥२६॥

८. "शारीर" श्रुतेर्मुख्यार्थविवेकाय शरीरलक्षणविचारः

पाण्यङ्घ्रिमस्तादियुतं शरीरं वदन् बुधस्संप्रति पृच्छ्यते सः।
"ग्रावात्मजे व्याप्तिरहो प्रदृष्टा" "प्राणादिमत्त्वे तदिति प्रसाद्यम्॥"२७॥

मृतस्य काये नहि तत्प्रचारः यत् स्थावराणामपि शोधितेऽपि।
चेष्टेन्द्रियार्थाश्रय इत्यनूक्तं सर्वं च दुष्टं प्रतिपक्षिलक्ष्म॥२८॥

द्रव्यं शरीरं किल तस्य तत् स्यात् यच्चेतनस्याऽस्य समस्तरीत्या।
स्वार्थे नियाम्यञ्च तथैव धार्यं स्वभावतः शेषगुणेन पूर्णम्॥२९॥

तस्यापृथक्सिद्धविशेषणं च पूर्वैरिति स्थापितमेतदेव।
श्रुतेर्जनोक्तेश्च विमर्शनेन सर्वाभिनन्द्यं शुभलक्षणं स्यात्॥३०॥

९. शरीरस्य तटस्थलक्षणम्

विनेश्वरं च त*त्तपस्ततटस्थलक्षणं वदेत्।
समं शरीरमित्यतो दृढं **त्ववस्थयाऽऽश्रितम्॥३१॥

---

*तपः- ज्ञानम्। तप आलोचने इतिधातोः। यस्य ज्ञानमयं तपः इति श्रुतिश्च।

**अवस्थया श्रितं-द्रव्यम्। अवस्थाश्रयं द्रव्यमिति लक्षणमादायैवमुक्तिः।

१०. शारीरशब्दार्थः

शारीर आत्माऽत्र ततश्श्रुतोऽयं परो भवेन्नैव तु जीव एवम्।
मूषानिषिक्तद्रवताम्रबिम्ब स्थूला *पवीदारनयाभिवर्ण्यः ॥३२॥

११. विकासमयडः पूर्वपक्षिणोऽपि प्रतिकूलता

विकारशब्देऽपि च जीवतत्त्वे संयोगमारोढुमनर्ह एव।
न जायते वा म्रियते विपश्चित् इत्यादि वेदे बहु गीयते हि ॥३३॥

पाल्यं वदन्ती श्रुतिरत्र जीवं तं पालकं भातितरां गृणन्ती।
आनन्द आकाश इतीह वर्ण्यः तस्मादयं ब्रह्म जगद्विधातृ ॥३४॥

१२. सत्यं ज्ञानमिति ऋचि कश्चन विचारः

ऋक् चाऽपि वर्णैस्स्फुटमेनमेव सत्यं तथा ज्ञानमनन्तमाह।
मुक्तं तु जीवं वदतीति हास्यं आप्नोतिवयैर्थ्यविदां बुधानाम् ॥३५॥

पादव्यवस्था ऋचि चाऽर्थतस्स्यात् तत् ब्रह्मणेत्यस्य सहेन योगम्।
सहामहे नेति वदन्ति केचित् न जानते जैमिनिभावमेते ॥३६॥

यत्रार्थतो वा खलु वृत्ततो वा पादव्यवस्थेति तटस्थवाचः।
मन्त्रो यथा मान्यगणप्रतीतेः ऋगादिभेदश्च तथेति तत्त्वम् ॥३७॥

१३. भोज्यसाहित्ये स्वारस्यम्

क्षीरं शिशुश्शर्करयाऽभिभुङ्क्ते इत्यादिवत् कर्मणि तत् सहो नः।
गुणस्य पारम्ययशश्च तस्य समाश्रये संफलतीति रस्यम् ॥३८॥

---

*आपवी-आपवस्य स्त्री-अरुन्धती इति यावत्। अन्योन्तर आत्मेति शारीर वर्णनं स्थूलारुन्धती न्यायतः। मूषानिषिक्तद्रवताम्रलभ्यबिम्बवच्चेति शङ्करभाष्यम्।

१४. आनन्दमयमात्मानं सङ्क्रम्य...इति श्रुतेर्विचारः

सङ्क्रान्तिरत्रैव च संप्रदृष्टा स्थानप्रमाणादिबलेन चिन्त्या।
प्राप्तिं ब्रवीतीति मयड्समेतः आनन्दशब्दः परमं तमाह ॥३९॥

१५. सिद्धान्तदृढीकरणम्

मुक्तस्य मोदोऽपि च तत्प्रसादात् इत्येव सोऽकामहतादिवाग्भिः।
पृथक् श्रुतः तत्र हि सोऽयमात्मा सङ्कल्पतोऽल्पात् सृजते समस्तम् ॥४०॥

तस्माच्च मुक्तो भविता न हेतुः विश्वस्य चानन्दमयस्य भक्त्या।
स्वानन्दयोगं भजमान एषः उक्तस्तदेतत् स्फुटमुक्तमत्र ॥४१॥

इति न्यायकलापेन ब्रह्माऽनन्दमयो भवेत्।
ब्रह्मानन्दमिदं ज्ञात्वा विन्दते भुवि पण्डितः ॥४२॥

मातुलेनेडितस्येमां मालोलनृहरेः प्रभोः।
उपदामर्पयन् धन्यो बभूव करुणाकरः ॥४३॥

*चापपुरीटृश्रीनिधिसूर्यङ्घ्रिपयःपानबलात्।
चक्र इदं ब्रह्मनये माणवकक्रीडितकम् ॥४४॥

***

* अयमपि श्लोको माणवकक्रीडितकवृत्त एव।
इदञ्च १९७७-तम संवत्सरे मुम्बई नगरे श्रीमदहोबिलमठविद्वत्सदसि विज्ञापनार्थं रचितम्।

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥ अथ सदसिनवकस्रग्धरा ॥

(ईक्षत्यधिकरण-आनन्दमयाधिकरणयोः परामृष्टायास्सद्विद्यायाः सङ्ग्रहभूता)

१. मङ्गलाचरणम्

अभिनवजलधरनीलं करिगिरिनिलयं विभावये वरदम्।
असिनवकसदमृतं तन्मह इह विबुधान् प्रपाययन् रम्यम्॥१ ॥

२. गुरुनुतिपूर्वकः विषयनिर्देशः

श्रीश्वेतकेतुरिव नैजपितुस्सकाशात् संप्राप्तविद्य इह मत्पितरं प्रणम्य।
तस्याऽपि देशिकततिं तमथाण्णयार्यं ''तत्त्वं'' गिरि स्थितमहं विवृणोमि तत्त्वम्॥२ ॥

३. प्रथमतत्त्वमसिप्रकरणम्

सच्छब्द्यात् सर्वहितोः पृथगिह न भवेत् किञ्चन त्वेति सिद्धं
वक्तुं त्वादौ मुनीन्द्रो जडपरमवदज्जीववर्गं तथैव।
वक्ष्यन् स्वापं निरुप्य प्रथयति विलयं स्वापकाले प्रयाणे
सच्छब्द्ये जीवराशेः स्वपितिगिरि नवामर्पयन् स्वां निरुक्तिम्॥३ ॥

सन्मूलास्सोम्य! सर्वास्सति कृतनिलयास्सत्प्रतिष्ठास्तथेमाः
तज्जत्वात् तल्लयनत्वात् तदिति निखिलास्तच्छरीरं प्रजा च।
एवं सत् सूक्ष्ममास्ते सकलमिदमहो! ह्यैतदात्म्यं तु सत्यं
सोऽयं चात्मा समेषां त्वमसि तनय! तत् श्वेतकेतो! किलैवम्॥४ ॥

४. द्वितीयतत्त्वमसिप्रकरणम्

इत्युक्तश्श्वेतकेतुः यदि सति सकलं तत्प्रतीतिः कथं नो
भूयादित्याप्तशङ्कः पुनरपि च वदेरित्यवोचत् स्वतातम्।
नानावृक्षोदितानां मधुकरनिवहैराहृतानां रसानां
एतद्वृक्षस्य सोऽहं त्विति न खलु मतिर्दृश्यते तद्वदेतत्॥५॥

सच्छब्द्यादागतिं स्वं न विदुरपि च तनौ मानमेते वहन्तो
मन्यन्तेऽहं वृकोऽहं मृगपतिरथवा कीट एवाऽस्मि चेति।
एवं सत् सूक्ष्ममास्ते सकलमिदमहो! ह्यैतदात्म्यं तु सत्यं
सोऽयं चात्मा समेषां त्वमसि तनय! तत् श्वेतकेतो! किलैवम्॥६॥

५. तृतीयतत्त्वमसिप्रकरणम्

सुप्तौ लीना भवेयुर्यदि सति त इमे चेतनास्स्वालये
रात्रौ सुप्तः प्रभाते वदति तु शयनादुत्थितोऽस्मीति तद्वत्।
ब्रूयुर्नो वा कथं ते त्विति कलितमतिं बोधयन् स्वीयसूनुं
वाहिन्यस्स्यन्दमाना जलधित इवं तं संविशन्त्यः पुनश्च॥७॥

गङ्गाद्या नैव सर्वा विदुरपि च निजोत्पत्तिसंपत्तिभूमिं
सर्वाश्चेमे तथैवं सति विलयमतो नावगच्छन्ति जन्म।
एवं सत् सूक्ष्ममास्ते सकलमिदमहो! ह्यैतदात्म्यं तु सत्यं
सोऽयं चात्मा समेषां त्वमसि तनय! तत् श्वेतकेतो! किलैवम्॥८॥

६. चतुर्थतत्त्वमसिप्रकरणम्

सुप्तेः पूर्वस्य दृष्टा स्मृतिरिह सुदृढा भाववर्गस्य तद्वत्
जन्मन्यास्ते गतानां स्मृतिरिह न च प्राक्तनानां भवानाम्।
तस्मान्नाशः कथं स्यात् न मृतिरिति सुते मन्यमाने पितोचे
वृक्षोऽयं छिन्नशाखः कथमपि तु लसेत् जीवहानौ हि शुष्येत्॥९॥

देहोऽयं वृक्षतुल्यो मरणमिति भवेत् शोषणं तस्य धर्मो
जीवापेतस्य तस्मात् मृतिरिह न भवेत् नित्यसिद्धे तु जीवे।
एवं सत् सूक्ष्ममास्ते सकलमिदमहो! ह्यैतदात्म्यं तु सत्यं
सोऽयं चात्मा समेषां त्वमसि तनय! तत् श्वेतकेतो! किलैवम्॥१०॥

७. पञ्चमतत्त्वमसिप्रकरणम्

स्थूलोऽयं लोकवर्गः पृथुरतिविततः सूक्ष्ममास्ते हि सत्तत्
भूयाद्धेतुः कथं तत्त्विति च पुनरसौ संशयग्रस्त आसीत्।
न्यग्रोधस्याथ बीजे प्रविदलनमसौ कारयन् तात ऊचे
धाना सूक्ष्मा यथेयं पृथुविटपवटस्यास्ति हेतुस्तथेदम्॥११॥

आस्ते सत् सर्वहेतुश्श्रुतितिकथितस्संशयो नाऽत्र युक्तः
श्रद्धा चैवाऽत्र कार्या भवति च महिमा तादृशोऽयं सतो हि।
एवं सत् सूक्ष्ममास्ते सकलमिदमहो! ह्यैतदात्म्यं तु सत्यं
सोऽयं चात्मा समेषां त्वमसि तनय! तत् श्वेतकेतो! किलैवम्॥१२॥

८. षष्ठतत्त्वमसिप्रकरणम्

हेतुश्चेत् सत् कथं तन्न भवति मतिगतं नोपलब्धिस्तथैवं
शङ्कामुद्वासयन् तां पयसि च लवणं न्यस्य नक्तं प्रभाते।
ऊचेऽ ''स्मिन् सैन्धवं तं मृगय'' ''परमहो दृष्टिलभ्यो न चाऽयं''
''पुत्राचामस्व लेशं'' ''लवणरुचिरहो भाति जिह्वागतेयम्''॥१३॥

आस्तेऽस्मिन् सैन्धवस्तत् पयसि वसतिमान् खान्तराज्ञात एवं
शास्त्राच्चाचार्यवाचा भवति च विदितस्सोऽयमेवंप्रकारः।
एवं सत् सूक्ष्ममास्ते सकलमिदमहो! ह्यैतदात्म्यं तु सत्यं
सोऽयं चात्मा समेषां त्वमसि तनय! तत् श्वेतकेतो! किलैवम्॥१४॥

९. सप्तमतत्त्वमसिप्रकरणम्

आचार्याद्वा कथं तत् भवति च विदितं त्वेवमस्याऽथ शङ्कां
जातां दृष्ट्वाऽथ देशात् सुपिहितनयनो ना वने यो विसृष्टः ।
चोरैर्नीत्वा तमेनं विपुलकरुणयाऽमीलिताक्षं विधाय
कश्चित् श्रीमान् वनेऽस्मा उपदिशति यथा नैजदेशाय मार्गम् ॥१५॥

मेधावी पण्डितोऽयं स्फुटमथ पथिकैस्सङ्गतैर्भाषमाणः
ग्रामाद्ग्रामं च पृच्छन् भजति निजपदं तद्वदस्याऽत्र लब्धिः ।
एवं सत् सूक्ष्ममास्ते सकलमिदमहो! ह्यैतदात्म्यं तु सत्यं
सोऽयं चात्मा समेषां त्वमसि तनय! तत् श्वेतकेतो! किलैवम् ॥१६॥

१०. अष्टमतत्त्वमसिप्रकरणम्

आचार्यादज्ञानमाप्त्वा भजनमथ तथा सत्सु सङ्गेन वृद्धं
कुर्वन् देहप्रपाते विशति निजपदं वर्णितं त्वेवमास्ताम् ।
देवोऽहं नाऽऽहमेवं भवति मतिरियं देहपूर्वैव दृष्टा
निर्देहज्ञानलक्ष्या भवति खलु कथं सत्प्रपत्तिर्जनेषु ॥ १७॥

शङ्कां जातामितीमां शिथिलयति पिताऽसन्नमृत्युं नरं त-
स्येष्टाः पृच्छन्ति चेन्मां वद क इति तदा वक्ति लीनो न चेत् ।
आत्मा तस्यां परस्यां यदि भवति लयो देवतायां न वक्ती-
त्थं नष्टाभिमानो निजजनविततौ तल्लयेऽन्येषु दृष्टः ॥१८॥

कैमुत्यात् भक्तिभाजां भगवति तु लये देहमानोऽपि नश्येत्
इत्येवं निर्णयः स्यात् सुकर इति वै विद्धि वत्सेति चोचे ।

एवं सत् सूक्ष्ममास्ते सकलमिदमहो! ह्यैतदात्म्यं तु सत्यं
सोऽयं चात्मा समेषां त्वमसि तनय! तत् श्वेतकेतो! किलैवम् ॥१९॥

११. नवमतत्त्वमसिप्रकरणम्

देवोऽहं भामि कान्त्या नर इति च भवद्भावना बन्धदात्री
सोऽहं ह्यात्मा यतो मे स इति शुभमयी भावना मोक्षदात्री।
एवं चिन्ताभिभेदात् कथमिव तु भिदा तादृशी स्यात् फलेऽस्मिन्
इत्येवं शङ्कमानं वदति स जनकश्चोरवृत्तान्तपूर्वम्॥२०॥

तस्यैवं शेषभूतो वहति मतिमयं नेति चेच्चोरशङ्क्यः
हस्तौ बद्ध्वा तथाऽस्य प्रवद ऋतमिति श्रीमदाज्ञाधरेषु।
ब्रूते पृच्छत्सु नैवेत्यथ खलु परशुं तप्तमस्मै ददन्ते
दग्धो मिथ्यां वदन् स्यात् स इव भवति ना संसृतौ दह्यमानः॥२१॥

त्वं मेऽहं मे कुतस्तत् तदपि कुत इदं वेदमूलप्रमाणात्
एतच्चानादिसिद्धादनुभवविभवात् इत्यसौ सन् विवादी।
तेनैवं ब्रह्मणा तत् सकलमपि वपुर्ह्यैतदात्म्यं तदीयं
शास्ता चायं समेषां त्वमसि तनय! सश्वेतकेतो! त्वमेवम्॥२२॥

अथो पुत्र! न तेभूयाद्विवादस्तेन चात्मना।
भजेस्त्वं दासभावेन मुक्तिमाप्नोषि बन्धतः॥२३॥

ब्रह्मविद्यां पितुः प्राप्य सदाख्यां करुणाकरः।
श्वेतकेतुरिवाऽऽतेने *श्लोकैस्सर्वमनोहराम्॥२४॥

---

*अयं च प्रबन्धः ग्रन्थकर्त्रा १९९५-तमवर्षे नवदेहलीनगरे स्वसकाशे श्रीभाष्यं सेवमानानां छात्राणां कृते कलितः काञ्चीपुरे श्रीदेवाधिराजस्वामिनः ब्रह्मोत्सव-मध्ये प्रतिवत्सरं श्रीभाष्यविद्वत्सभां चालयन्त्या श्रीभाष्यविद्वत्सदस्समित्या तस्या विंशतितमवार्षिकमहोत्सवे तया नियुक्तेन ग्रन्थकर्त्रा कृते तत्त्वमसि-वाक्यार्थविचारे तत्र सभायां उपस्थितानां पण्डितानां सदसि च विज्ञप्तः।

श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ अन्तरधिकरणम् ॥

प्रणम्याशुकवीनस्मत्तातपादान् दयानिधीन् ।
श्रीनिधीन् तनुवै लीलां शारीरकसमस्यया ॥१ ॥

युवा स्यात् साध्वित्याद्युपरि मनुजानन्दगणनां
मुदां वल्ली कृत्वाऽऽरविनयनवास्तव्यमवदत् ।
प्रकृष्टं शारीरं प्रकृतिपुरुषादुन्नतपदं
प्रपत्त्या शोध्यं प्रणतजनताक्षेमशरणम् ॥२ ॥

अपेक्षामङ्गानां अदधतमिदं बुद्धिकलितं
समं सृष्ट्वा भान्तं सकलकल्याणसुखदम् ।
यजुर्वेदान्तोऽयं परमपुरुषं ब्रह्म महितं
यदाहेतीदं तत् प्रतिभटमहो सामवचसाम् ॥३ ॥

यतश्छान्दोग्येऽस्मिन् कमलदयिते चाक्षिणि तथा
प्रदृष्टः प्रोक्तोऽसौ कनकरुचिराश्मश्रुचरणम् ।
तदक्ष्णोः कप्यासं कमलमपि दृष्टान्त उदितः
समेभ्यः पाप्मभ्यो ह्युदित इति चोन्नामघटितः ॥४ ॥

तथास्यक्सामे ते स्तुतिततिरते चास्य भजनात्
विमुक्तिः प्रोक्ता सकलदुरितध्वंसवचसा ।
इदं चित्ते कृत्वा श्रुतिमतमिदं स्यादिति कथा
भवेत्ते मान्या तदिह निपुणां पश्य सरणिम् ॥५ ॥

इयं विद्याऽध्याये प्रथम इह चिन्त्यपदवीं
अगादग्र्ये पादे भजनफलिते कारणपदे ।
अयोगस्सिद्धान्तिन्! भवदभिमते ब्रह्मणि गिरां
इहस्थानां पश्येः यदिह पुरुषो विग्रहयुतः ॥६ ॥

हिरण्यश्मश्रुश्चानखमुखमसौ काञ्चनरुचिस्-
त्विति प्रोक्तो जीवः तनुघटिततया श्रौतवचनात्।
शरीरी कर्मी स्यात् रुचिरतनुतोऽदभ्रसुकृतः
इमां विद्यां युक्तोऽभजदलभतादित्यवसतिम्॥७॥

अतो जीवः कश्चित् प्रचुरसुकृतः कारणपदे
भवेत् कश्चित्कालं तदनु च परस्स्यादिति वदेः।
श्रुताविथं वर्ण्यं न हि हरसि चेद्दोषयुगलं
श्रुतत्यागः क्लृप्तिः त्वकथितपदार्थस्य भवति॥८॥

अचिच्चिच्चेति प्रथितयुगलादन्यकथनं
गुरुत्वं दद्यात् नयसरणिगास्तत्प्रजहति।
इति प्राप्ते ब्रूमस्तनुरिह भवेत् सत्त्वकलिता
पवित्रा तन्त्रे या भगवदुदिते सात्त्वतमते॥९॥

श्रुता भूयोभूयः द्रमिडमुनिना चाऽपि विवृता
स्वभक्तानां तृष्णां शमयितुमिह प्रोद्धरति याम्।
विभुश्श्रीमान् प्रीत्या तदिह पठितं शुद्धललितं
पृथासूनोस्सूतस्स्वयमपि भवन्नाह स इदम्॥१०॥

अतो ग्राह्यो भावश्चरितजनिता नास्ति हि तनुः
विभोर्लीलार्थं सा भवति मनुमयी भूतकलिता।
भवेन्नेति श्रुत्याः भगवत इदं मुक्तिफलदं
शुभं रूपं ध्येयं सकलदुरितोन्मोचनमपि॥११॥

फलेदेते धर्मा इति भगवतस्तद्दिनमणौ
तथा नेत्रे तिष्ठन् कनकपुरुषो ब्रह्म न पुनः।
स जीवात्मा स्यात् सकलदुरितादुत्थिततया
स नैसर्गात् हेयप्रतिभट इति प्रेक्ष्य भज तम्॥१२॥

यदुन्नामात्रोक्तं तदपहतपाप्मेति गदितं
हतिर्ध्वंसो नाशः भवति परमश्लेषकथने ।
फलं तं पापानां स्पृशति न कदापीति कथितं
तदेतत् तच्छक्तिं परममहितां दर्शयति नः ॥१३॥

स पापैरश्लिष्टो विजरमरणश्शोकरहितः
नचाऽस्य क्षुत्तृष्णेऽनृतसुबहुभोगास्पदपदः ।
स्वसङ्कल्पात् सर्वं त्ववितथमस्येति पठति
श्रुतिर्यं सेतुं दिवसरजनीलक्ष्यमखिलम् ॥१४॥

शुभं चान्यत् तत् तरति न तथा कर्म दुरितं
तदन्यद्वा वृद्धौ पतन इति वा वेशयति तम् ।
इति प्राहान्यं तं दिनमणिमुखात् जीवनिचयात्
स्वंय ब्रूतेऽरण्यं बृहदपि ततो ब्रह्म परमम् ॥१५॥

रवौ योगीक्ष्यं स्यात् कमलनयनं पापनिचयं
हरत् भक्तानां शं वितरदपि तां मुक्तिमनघाम् ।
इति स्यात् सिद्धान्तः श्रुतिनयपथे तत् स भगवान्
विधत्तामामोदान् उदिति गदितः पद्मनयनः ॥१६॥

इत्यन्तर्नयस्याह सारमत्र दयाकरः ।
समस्यापूर्तिरिषा स्यात् सतां प्रीत्यै महीयसी ॥१७॥

मुनीन्द्रजामातृतया स इन्धे यदङ्घ्रिजा-मातृतया स जह्नुः ।
यदूरुजामातृतया पुरर्गीः यदास्यजा मातृतयाऽह वात्स्यम् ॥१८॥

***

---

*इदं १९८७ तमवत्सरे श्रीमदम्मात्सदसि श्रीमदाचार्यपादैः दत्तायास्समस्यायाः पूरणाय कृतम् ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥अथ ज्योतिरधिकरणम्॥

द्युतिरस्ति सामशिरसि श्रुता यया जगदुत्तमं ततमनुत्तमं दिवः।
परतस्थितेह जठरे सुरूपतां श्रुततामुपास्यविभवा तथेप्सुभिः ॥१॥

नहि तत्र भाति रविचन्द्रतारकं न च विद्युदग्निविहृतेः कथा कुतः?।
अथ तद्द्युतेरिह समं विभाति तत्त्विति विश्वहेतुमधिकृत्य मुण्डकम्॥२॥

द्युतिशब्दवर्णित इहार्थ एष तद्रविमुख्यभोत चिदचिद्विलक्षणः।
परमादिभूतसकलज्ञसर्ववित् पुरुषोत्तमोऽमितरुचिस्तथेरितः ॥३॥

यदिति प्रसिद्धिरिह सूच्यते ततः परमस्स एव भवितेति चेन्न भा।
जठरस्थितस्य किरणैस्समन्ततः त्वपि युज्यमानवितितेस्स्ववाक्यगम्॥४॥

जगतस्समस्तविधकारणान्वयि प्रथितं न किञ्चिदिह लिङ्गमस्ति तत्।
गतसूत्रयुग्मसरणिर्न युज्यते गगनं निवार्य मरुतश्च या कृता॥५॥

द्युतिरेव विश्वजनतामतिस्थिता जगतां निदानमिह वन्द्यतान्विता।
जगतां निदानगुणभूतदीप्तिभिः परिमण्डितेति न परोऽत्र कथ्यते॥६॥

प्रकृतिप्रजातरुचिरेव कुक्षिगा रविमुख्यकान्तिरपि सैकजातिगा।
पुरुषस्य वक्त्रजनिताविति श्रुतेर्ननु विप्र एव खलु वह्निरुच्यते॥७॥

इति पूर्वपक्षरचना यतीश्वरैरपि रूपवर्णनमतो दरं फलम्।
बहुलोकवास इति हेतुमण्डलं परवर्णितं तदुदयेऽत्र पेशलम्॥८॥

द्युसमन्वयाप्तविभवा प्रभा तु सा पुरुषोत्तमोऽत्र किल पूर्ववाक्यतः।
अपि भूतजातमखिलं श्रुतं प्रभाचरणाभिधानघटितं समीक्ष्यते॥९॥

पुरुषस्य सूक्तमिह सूत्रकृन्मुनिः स्पृशतीति निश्चय; इदं कुतः पृथक्।
न विचारितं यदिह संशयः क्वचिन्न हि संभवत्यपि रमेशवैभवे ॥१०॥

अत एव चेतरदपीति चेत्तथा ननु भूयसां बलमितीति मन्दधीः।
प्रकृतिं च जीवमपि कारणं वदेदिति हि प्रवृत्तिरिह सूत्रकृन्मुनेः ॥११॥

अवभासकार्यमिह कान्तिवाचकं त्वपि तित्तिरिश्रुतिगतं परात्मनि।
उदरस्थितैक्यवचनं फलार्थिनां ननु चान्तरात्मविधयेति युज्यते ॥१२॥

अपि गायति स्म भगवानहं तनाववविवाहनोऽस्मि भविनामिति स्वयम्।
ननु वृत्तमेव पठितं श्रुतावयं महिमा तदस्य परमात्मनो न तत् ॥१३॥

सदृशो हि वृत्तत इति प्रभुर्धिया भजनीय एष भगवान् स्थिरां श्रियम्।
अभिवाञ्छतेह विपुलामिति श्रुतं सदृशे सदृक्षवचसोक्तिरिष्यते ॥१४॥

मरुदग्निसूर्यशशिवारिपञ्चकं श्रुतिनेत्रचित्तवचनास्यपञ्चकम्।
दशतो विराजि समतां प्रदर्श्य तां इति चान्नमत्ति तदितीरितं यथा ॥१४॥

सकलं हि भूतमिह वृत्तमेव वागथ वाक्तनुश्च परमो हि गायति।
हिततद्विभिन्नवचसा च रक्षति सदृशत्वमेवमुभयोरिति स्फुटम् ॥१५॥

इति भूतपाद इह वर्णितो द्युतेः अपि गानरक्षणविधाद्वयं ततः।
पृथिवी हि वृत्तमिति वर्णनं परस्सकलं यदत्र किल संप्रतिष्ठितम् ॥१६॥

अतिवर्तितुं हि पृथिवीं न चेशते पृथिवीति पाद इह वर्णितः प्रभोः।
सकलस्थितित्वमनवर्त्यतेति तत् द्वितयं विधाकृतमिहोच्यते ततः ॥१७॥

पुरुषे शरीरमपि पाद उच्यते यदिहानजातमखिलं प्रपूर्वकम्।
अतिवर्तनेन रहितं किल स्थितं तदियं च पाद इति वर्णनार्हता ॥१८॥

हृदये नरस्य भविताऽथ पादता हृदयेऽभिदास्ति परमस्य वृत्ततः।
सकलं किलान इह तत्प्रपूर्वकं परितिष्ठतीति च विधाद्वयं ततः ॥१९॥

इति भूतभूमितनुभिर्हृदा तथा परमेऽथ पादजलधिर्यथा ऋचि।
अपि षड्विधेति तुलना षडक्षरैः समनन्तरं च महिमा ऋचस्तु सः ॥२०॥

परमेऽथ खेऽस्य भविता त्रिपात् सुधा परिशुद्धभृत्यजनभूषणैरिति।
हृदयं चतुर्थ उपवर्ण्यते ततश्चरणो ह्युपास्यविधयाऽथ तत्स्तुतिः ॥२१॥

क्रियते बहिःस्थगगनेन साम्यता हृदयस्थदभ्रगगनस्य वर्ण्यते।
इति वेद योऽत्र परवृत्तसाम्यतां चरणाब्धियुग्रसविधाक्षराश्रितः ॥२२॥

लभते स्थिरां श्रियमखण्डितां नरो भजने फलं त्विति समीरितं ततः।
अथ यस्तुरीय इह पाद एधते हृदयं परस्य सुषयस्तथाऽस्य च ॥२३॥

अपि पालकाः फलततिश्च वेदने पठिताः क्रमेण समनन्तरं द्युतिः।
इति भूतपादकथनोचितेस्तथा दिवि वा दिवस्त्विति समार्थताबलात् ॥२४॥

पुरुषस्स एव परमो द्युतिर्भवेत् द्युतिविग्रहः स्वशुभसूक्तवर्णितः।
वरवत्सदेशिकमुखात् प्रकाशनं महितं श्रुतस्य कलितं त्विदं वरम् ॥२५॥

चरणाभिधानसमभूतपाठतः पुरुषाभिधानचरणारणा वयम्।
इति भाष्यमर्मणि रथस्य स*चरणाभिधानचरणारणा वयम् ॥२६॥

***चरणाभिधानचरणारणा वयम्** ॥ इति चरमं पादं वहता श्लोकेन तत्सूचित-वृत्तकल्पितया अनतिपञ्चविंशतिकश्लोकात्मिकया कृत्या एतत्पाद-सूचितसिद्धान्तवदधिकरणं श्रीभाष्यश्रुतप्रकाशिकासारांशजुष्टं देयमिति १९९६-तम संवत्सरे श्रीवात्स्यवरददेशिकविद्वत्सदसि अस्मदाचार्यपादैः दत्तायाः समस्यायाः पूरणाय त इमे श्लोका रचिता इत्यवधेयम्।

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः॥

॥अथ वैश्वानराधिकरणम्॥

"यन्मुण्डके वेदशिरस्यधीतं अद्रेश्यमित्यादि तदक्षरन्तु।
मालोलदेवः किल तद्गुणोक्तेः" पप्रच्छ चैनं प्रति सोऽथ शिष्यः॥१॥

"तादृग्रूपेण तत्र द्युक इति कथितः श्रीनृसिंहात् कथं स्या-
दन्यस्तस्मादसौ स स्फुटमिति भगवान् सूत्रकारो बभाषे।
तादृग्रूपस्य तस्मिंस्त्वथ समविषमव्याप्तिभावप्रदर्शी
पश्चादेताञ्चकारेत्यधिकृतिमिह तत्सङ्गतिः स्पष्टदृष्टा॥२॥

विशेषतश्शब्दमुपागताच्च वैश्वानरं श्रीनृहरिं वदामः।
तन्मुण्डकोदीरितरूपमत्र संस्मर्यमाणं किल लिङ्गमस्मिन्॥३॥

न जाठरो नाऽपि तु देवता स्यात् कथं भवेत् भूततृतीय एषः।
त्रेताग्निता चाहुतिकल्पना च त्वित्थं भजेरित्युपदेश एव॥४॥

पुंस्त्वन्तु मालोलगतं श्रुतौ च प्रसिद्धमन्येषु न मुख्यताऽस्य।
विश्वानरो ह्येव विभाति शब्दः वैश्वानरत्वेन निजार्थ एव॥५॥

विश्वे नरा एनमितस्तश्च नयन्ति भक्त्या नृहरिं मठस्थम्।
वैश्वानरं ह्येनमथो जगाद छन्दोगवाणी त्विति चाऽपि रम्यम्॥६॥

यथाऽग्निहोत्रं कुरुते द्विजेन्द्रः तथा करोत्येव स विद्ययेति।
संपत्तिसंभावनया तदेषा संवर्ण्यते दासजनेन विद्या॥७॥

सुपर्णगोत्रं शठजिन्मुनीन्द्रसन्मानसं चाऽरुणिभावनाञ्च।
संमण्डयन्तौ शरणं प्रपद्ये मालोलपादौ पृथिवीति वर्ण्यौ॥८॥

बौडिल्यदैवं किल वारि यत्तत् वस्तिस्तवेदद्रयिरित्युदाहुः।
मालोल! तं त्वां शरणं प्रपद्ये सेवां रयिन्ते सततं प्रयच्छ॥९॥

श्रीशार्कराक्ष्याभिमतं तवाहुः सन्देहमन्याभिमतं न तन्मे।
श्रीशार्कचन्द्राक्ष! विभो! विधेहि सन्देहहानिं तव पादलाभे॥१०॥

प्राणः पृथग्वर्त्मतया प्रसिद्धः तं तेऽभजद्यो मुनिरस्य नाम।
यस्याऽभवत्तस्य हि हस्तिराजः कृते त्वरा सा मम रक्षणेऽस्तु॥११॥

प्रत्यक्षमेवं भवते भवानि परोक्षमन्यस्तव नेत्रनाम्ना।
पुरोधसा साम्यमुपेयिवांसं श्रीसत्ययज्ञाभिमताक्ष! रक्ष॥१२॥

मूर्धा भवेयं तव दासदासदास्ये स्थितानामिति वाञ्छयाऽहम्।
द्युलोकमूर्धन्! शरणं भजेय सुतेजसं सूर्यशतप्रभं त्वाम्॥१३॥

इत्थं तवाङ्गानि विभो! विभान्ति तैरेव चाङ्गित्वमथो गतोऽसि।
अश्नामि किञ्चिद्यदिदं जुहोमि त्वय्यग्निरूपे मयि संस्थितोऽहम्॥१४॥

*श्रीमन्महाशालकुलप्रसूतषण्णां मुदे श्रोत्रियपूजितोऽसौ।
सद्विद्यया चाऽनुगतस्सदाऽदोविद्येव भाति स्म स मातुलो मे॥१५॥

---

* १९७१-तमसंवत्सरे बम्बाय् नगरे चेम्बूर्मठे श्रीदेवनार्विलागं श्रीमदलगियसिङ्गर् यतीश्वराणां सप्ततितमश्रीनक्षत्रमहोत्सवोऽचलत्। ते च ग्रन्थकर्तुर्मातुलपादाः। तदानीं विद्वत्सभायां विज्ञापनायाऽयं सन्दर्भो रचितः। अत्र षष्ठं श्लोकं श्रुत्वा महावैयाकरणाः सरलकविबिरुदविभूषिताः पादूर् श्रीराघवाचार्यस्वामिपादाः ''रत्नमिदं पद्य''मिति प्रशंसितवन्तः। अनेन पञ्चदशेन पद्येन वैश्वानरविद्यायाः श्रीदेवनार्विलागं श्रीमदलगियसिङ्गर् यतीश्वराणां च श्लेषोक्तितस्साम्यं वर्ण्यते। तेषां सहजाः षट्। सोदर्यश्चतस्रः सोदरौ द्वाविति। ते महाशालकुले जाताः। सद्विद्यया चानुगताः। वैश्वानरविद्या च षण्णां महाशालानां मुदे भवन्ती

श्रीरुक्मिणीनेत्रसुखप्रदत्वात् रामानुजत्वं यतिनाथभावात्।
सदुत्तराषाढजहृद्यभावात् स्यालत्वयोगादपि वात्स्यसूरेः ॥१६॥

यस्याऽभवत्तत्सप्ततिसत्क्षणेऽसौ बम्बाय्-पूरी भाग्यपुरी बभूव।
तस्मादहं भाग्यपुरीनिवासः पुरीमिमां संप्रति संसिषेवे। १७॥

श्रीवीरराघवशटारिसहोदरीजः श्रीवासराघवकवेः पदवारिपानात्।
लब्धागमान्तहृदयस्सदसीति तेने मुक्कूर्मुनीश्वरमुदं करुणाकराख्यः ॥१८॥

***

सद्विद्ययानुगता च छान्दोग्ये। षोडशसप्तदशश्लोकयोः एतेषां श्रीरामानुजैः साम्यमुच्यते। श्रीरुक्मिणीति मातुलपादानां मातुर्नाम। तस्या नेत्रसुखप्रदत्वं तत्सुपुत्रत्वात्। तेन रामानुजत्वम्। बलरामस्य अनुजो यतः कृष्णः रामानुजः स च रुक्मिणीदेव्या नेत्रसुखप्रदः। यतिनाथत्वादपि रामानुजत्वम्। भगवद्भाष्यकारत्वं इति यावत्। भाष्यकारास्सदुत्तराषाढजातयामुनमुनेर्हृद्याः। इमे च सदुत्तराषाढज-श्रीरङ्गशठारिमुनेर्हृद्याः। भाष्यकाराः वात्स्यस्य महाकारुणिकसूरेः (ग्रन्थकर्तुः कुलकूटस्थस्य) स्यालभूताः। ते च (महाकारुणिकस्य पुत्रं) निजभागिनेयं वरदविष्णुं (नडादूराळ्वान् इति प्रसिद्धं) नैजश्रीभाष्यासिंहासनप्रदानेन संमानितवन्तः। इमेऽपि वात्स्यसूरेः ग्रन्थकर्तुपितुस्स्यालभूताः। तदात्वे ग्रन्थकर्ता भाग्यपुरीमावसत्। तदिदं सप्तदशे श्लोके सूचितम्॥

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ द्युभ्वाद्यधिकरणम्॥

ब्रह्मा देवप्रधानस्समभवदथ स ब्रह्मविद्यां वरिष्ठां
विद्याभ्योऽदात् समाभ्यः प्रथमतनुभुवेऽथर्वनाम्नेऽङ्गिरेः सः ।
भारद्वाजाय सोऽस्मादलभत स मुनिस्तां ततश्चाङ्गिरास्तं
नत्वा श्रीशौनकाख्यो विधिवदथ मुनिर्मुण्डकाख्यां समाप्नोत्॥*

इक्षुं षट्खण्डरम्यां मधुरसुमधुरां ब्रह्मविन्मोददात्रीं
विद्यां श्रीभाष्यटीकाग्रथितगुरुपथे तां वयं शीलयामः ॥१ ॥

श्रीमच्छ्रीरङ्गरामावरजमुनिवरः षष्टिसद्ग्रन्थकर्ता
टीकाटीकागतं तं व्यतनुत कृपया मूलपाठं विशुद्धम्।
आचार्यश्श्रीनिधेस्तं द्रुतकविनृपतेस्सद्दयालम्बनोऽहं
प्राप्यैतत्संस्तवं वश्श्रुतिमधुरमृदुस्रग्धराभिर्दधानि ॥२ ॥

कस्मिन् ज्ञाते तु सर्वं विदितमिह भवेदित्यसौ शौनकस्तं
पप्रच्छाचार्यवर्यं स च गुरुरथ तं वेदितव्ये हि विद्ये ।
द्वे इत्यूचे परैका भवति तदितरा चेति तेनोक्तमेवा
**नूक्तं तद्व्यासपित्रा महितमिति हरिप्रापकं ज्ञानयुग्मम्॥३ ॥

---

*श्लोकोऽयं षडङ्घ्रिः ।

**''आह च भगवान् पराशरः- तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने। आगमोत्थं विवेकाच्च द्विधा ज्ञानं तदुच्यते ॥'' इति श्रीभाष्यम्॥

पूर्वा प्रत्यक्षतुल्यं प्रवितरति हरेर्दर्शनं भक्तिरूपा
साऽन्या शास्त्रैस्तदाप्त्यै स्वयमुपकुरुते सप्तभिस्साधनैर्या।
तत् श्लोकैर्यत्तदाद्यैर्मतियुगविषयं तत्स्वरूपं त्रिभिर्नः
दृष्टान्तादूर्णनाभेश्चिदचिदिति समं विश्ववाच्यं तदुत्थम् ॥४॥

प्रोक्तं तद्वर्धमानं बहुभवनमतेर्ज्ञानमूचे तपोऽस्य
श्लोके तुर्येऽग्रभागे सकलमपि तथा भोग्यभूतं ततोऽन्नम्।
प्राणादिस्वर्गमोक्षादिकमपि सकलं साधयच्चैतदुक्तम्
कर्तुं सर्वज्ञ शक्तिं तदवितथमतिं पञ्चमे सञ्जगाद ॥५॥

अग्रे खण्डं तदित्थं परिपठितमिदं ब्रह्म सत्यं मुनीन्द्रः
सिंहालोकेन नीत्वा निरुपधि तदिदं कामयन्ते हि ये तत्।
प्रोच्यैतान् सत्यकामान् तिरफललभानिस्स्पृहान् मोक्षकामान्
स्तोकाशान् वै तदन्यान् श्रयणमथ गुरोः प्राह वैधं मुमुक्षोः ॥६॥

भूयस्सत्यं परं तं मृगगणपदृशा संमृशन् शौनकाय
प्राहैनं भूतयोनिं विधु-रवि-नयनं विश्वरूपं पुमांसम्।
अग्निं मस्तं तदीयं चरणयुगमथो भूमिरित्यादि चोक्त्वा
सर्वेषामन्तरात्मा स्फुटमखिलजगत्सृष्टिकर्ता स चेति ॥७॥

तुर्ये खण्डेऽथ तस्मिन् रतियुतमनसां योगिनां सन्निकृष्टं
शिष्यानाहूय चोक्त्वा धनुषि मनुमये सन्निधायात्मबाणम्।
लक्ष्यं तत् ब्रह्म कृत्वा स्थिरतरमनसा वेधनं चोपदिष्टं
साम्ना ज्याघोषवन्तं धनुषि ऋचि तथा बाणवन्तं यजुर्भिः ॥८॥

पूर्वं संवर्ण्य भक्त्या निशितपृथुशरं चेतसा भावगेन
"लक्ष्यं सोम्याक्षरं तत् किमिदमिति मतिं विध्य बाणे वितन्वम्।"

इत्थं शिष्याय चोक्त्वा स्वयमथ स गुरुस्स्वानुसंधानतुष्टः
स्वात्मारण्याञ्च योगात् प्रणवमनुयुतात् देववह्निप्रलब्धिम् ॥९॥

उक्त्वा शिष्याय भूयोऽवददपि पृथिवी चान्तरिक्षं तथा द्यौः
तस्मिन्नोतं मनोऽन्यत् सकलमपि तथा प्राणवर्गेन्द्रियादि।
जानीतैनं किलैकं त्वमृतवितरणे सेतुरेषोऽस्ति चात्मा
मान्या धन्या अनन्या भजत वदत तं मुञ्चतास्माद्गिरोऽन्याः ॥१०॥

नाड्यो नाभौ रथेऽरा इव किल सकलास्संहता भान्ति चाऽस्मिन्
अन्तश्चाऽसौ चरन् स्यात् बहुविधमपि सञ्जायमानस्तदित्थम्।
ओमित्येनं भजध्वं तमस इत परं पारमात्मा नयेद्वस्-
सर्वज्ञस्सर्ववित्सः क्षितिविपुलयशाः व्योम्नि दिव्ये वसन् च ॥११॥

ग्राह्योऽयं शुद्धचित्तैः प्रभुरपि च तथा प्राणदेहप्रदानात्
अन्नोत्थादन्नवाच्ये वपुषि विहृतिमान् तत्र चित्तं विधाय।
तद्ज्ञानाद्भक्तिरूपात् मुदममृतमिता ते धियाऽस्मिन् रता ये
साक्षात्कुर्वन्ति धीरा इति विशदमदस्साधनं प्राह योगम् ॥१२॥

दृष्टप्राये च तस्मिन् सकलपरजनास्तेऽवरे सन्ति यस्मात्
सर्वं पारम्यरम्यं त्ववरमपि तथा यत्तनुत्वं विधत्ते।
यो वा पारम्यपूर्णोऽप्यवर इव चरेत् सर्वमन्यद्यतोऽल्पं
योगो योगेऽथ पूर्णे सकलमघकुलं नाशमाप्नोति तूर्णम् ॥१३॥

लोके देदीप्यमाने निधिनिलयसमे शुद्धसत्त्वैकभूमौ
स्वाङ्ग्या कान्त्या ज्वलन् स प्रलसति तदिदं ह्यात्मविद्वेद्यमस्ति।
तस्मिन् दीप्ते न सूर्यो न विधुरपि तथा तारका विद्युतो वा
नैवाग्निर्भान्ति सर्वे तमनु हि सकलं भासमानं विभाति ॥१४॥

वाता वा वान्ति नोऽस्मिन् रविविधुवपुषोः न प्रकाशस्सुराणां
अन्येषां का कथाऽस्मिन् विरजसि विमले दीप्यमानेऽत्र हेतौ।
दृश्यं सर्वासु दिक्षु प्रविदितवरणं ब्रह्म विश्वं तदोकश्-
चाऽस्मद्देहे महत्तत् सरसिजकलिकासाम्ययुक्तं हृदेव ॥१५॥

तुर्यः खण्डस्तदेवं गत उपनिषदि तत् पञ्चमे खण्ड इत्थं
ब्रूते शिष्यं मुनीन्द्रस्तनु-तरुग-खगौ द्वौ तयोरेक आस्ते।
मोहात् शोचन् द्वितीयं निजकृतिमुदितं तस्य सञ्चिन्त्य शक्तिं
पङ्के मग्नो व दृष्ट्वा सुहृदमभिगतं स्वोद्धृतौ तुष्यतात् सः ॥१६॥

पश्यो दिव्याञ्च मूर्तिं भगवत इव संप्रेक्षमाणोऽथ योगे
पुण्यात् पापाच्च मुक्तः प्रविगलितभवः तत्परं साम्यमाप्ता।
क्रीडार्थं नाऽस्य वाञ्छोपवनतरुततेश्चन्दनस्त्रक्सुमानां
रत्यर्थं नाऽपि वाञ्छा; फलरतिरहितः कर्म नैजं स कर्ता ॥१७॥

ब्रह्मज्ञो नाऽतिवादी भवति च नितरां प्राणमेनं विजानन्
सोऽयं सत्यैकलभ्यो भवति सुविपुलस्तस्य मार्गोऽर्चिरादिः।
सूक्ष्माद्यस्सूक्ष्मभूतः परमपदगतो भाति सूर्येऽन्तिके नः
योगीन्द्राणां हृदीत्थं त्विति खकुलमिमं ज्ञातुमिष्टे न चैव ॥१८॥

ज्ञानाख्यस्य तस्य प्रसदनफलितं ध्यानमाप्त्वा किलैनं
दृष्टप्रायं च योगे कलयति नितरां तत्प्रसादान्हि मुक्तिः।
तस्मादैश्वर्यकामो मम कृतिषु रतस्सोऽस्तु मोक्षप्रदाते-
त्येवं भक्त्या तमेनं भजति शुभमतिश्शुद्धचित्तस्सदैव ॥१९॥

षष्टेऽथ प्रीतिमान् यो भवति हि परमे तेन लभ्यस्स आत्मा
लिङ्गैश्च स्वाश्रमार्हैरपि च बलमुखैस्सद्गुणैर्यस्तु युक्तः।

अब्धौ नद्यः पतन्त्यो दधति हि समतां नामरूपे विहाया-
प्त्वा दिव्यं तं तथैवाऽनुभवति परमं साम्यमेषोऽपि नित्यम्।।२०॥

दृष्टप्राये तदस्मिन् भगवति भजने ब्रह्मसाम्यं लभेतो-
पास्ता शोकं तरेत्तत्कुल इह भविता ब्रह्मवित् सर्व एव।
नित्यं नैमित्तिकं तत् सकलमपि च ये श्रद्धया तन्वतेऽतो
बद्धश्रद्धा मुनौ नो निरुपमविभवे ग्रन्थमर्हा इमं ते ॥२१॥

इत्थं षट्खण्डविद्यां शुनकतनुभुवे तामृषिः प्रोच्य तुष्टो
ग्रन्थप्राप्त्यङ्गभूतं व्रतमपि कथयन् मुण्डनं तेन नाम।
अस्या आस्ते तदेवं त्वुपनिषदपि परं ब्रह्म पूर्णा वदन्ती
मीमांसां ब्रह्मकाण्डे त्वधिकृतियुगले लक्षणे प्राप चाद्ये ॥२२॥

द्युभ्वाद्याधारभूतो न तु स परमो जीव एवेति नीत्या-
माद्यायां तत्तृतीये चरणमधि कृते पूर्वपक्षेऽथ चाऽत्र।
सारावल्यां हि दृश्याः समुचितमखिलं हेतुवर्गं दधत्यः
श्रुत्यन्ताचार्यदत्ता विवदनविजयस्रग्धरास्सार एवम्॥२३॥

ब्रह्म स्पृष्ट्वाऽक्षरोक्त्या प्रकृतिमथ मुनिस्त्वक्षरं प्राह पश्चात्
तस्याः स्यात् यः परस्तत्परत इति पुनस्तत्परं ब्रह्म चाह।
पश्चादात्मेति चोचे तनुकृतचरणं प्राणचेतोभिरोतं
नाडीसंघप्रतिष्ठाक्षितिमपि बहुधा जायमानं तदाह॥२४॥

प्रक्रान्तोच्छित्तिरेवं त्ववर इति कथा चात्मशब्दे न युक्ता
प्राप्यो मुक्तैस्स आत्मा ह्यमृतवितरणे सेतुरित्यादि चोक्तम्।
चिह्नान्येतानि जीवे न दधति निलयं सर्वदेहान्तरात्मा
नाडीप्राणादिभर्ता जगदवनकृते क्लृप्तनानावतारः॥२५॥

ब्रह्मास्ते ह्यक्षराख्यं विभु महितगुणैरुज्ज्वलं श्रेष्ठ आत्मा
सर्वज्ञस्सर्वनेता फलरतिरहितैः कर्मभिस्तर्प्यमाणः।
मुक्त्याप्त्यै सत्यकामैः प्रकृतिपरपरस्सर्वलोकान्तरात्मा
मान्या! धन्या! अनन्या! भजत वदत तं मुञ्चतास्माद्गिरोऽन्याः ॥२६॥

अस्यार्थान् विपुलानतीवमहितान् अन्यद्वपुस्संवहन्
अक्लिष्टं कलयन् अनन्तसुखदान् अस्मीति भाष्यार्थदः।
अम्बाचार्यतनूरभूदपि यतीट् अस्याथ वाणीतनूं
अंहोभारहरां अमेयविभवां अम्बां रमामाश्रये ॥२७॥

पयोधेर्भाष्यसङ्कीर्त्यात् अयो नः प्राप्यते यतः।
पयोदो हस्तिशैलस्थपयोदायाऽस्तु स श्रियै ॥२८॥

***

---

*इदं श्रीमदाचार्यपादैः १९९३ तम वर्षनडादूरम्माल्विद्वत्सदसि दत्तानां समस्यानां पूरणाय ग्रन्थकर्त्रा विरचितम् ॥

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ चमसाधिकरणम् ॥

॥१. मङ्गलाचरणम् ॥

आशाजनन्यौ चमसावभूतां कोलावतारे नरसिंहरूपे।
अर्वाग्बिलं यस्य शिरस्तदासीत् पिपासतोऽरिक्षतजं भजे तम् ॥१ ॥

॥२. पूर्वपक्षः ॥

अजेति शब्दात् प्रकृतिः खलूक्ता सा कापिली सृष्टिकरी स्वतन्त्रा।
स्वस्मै फलत्कर्मणि दृष्टतादृक्शानच्प्रयोगात् सृजधातुसक्तात् ॥२ ॥

॥३. सिद्धान्तः ॥

अर्थात् प्रकरणाच्चैव बुध्यते यौगिकं पदम्।
शेषवाक्यविशेषेण चमसेन शिरो यथा ॥३ ॥

तदजापदतो न न कार्यमियं भवितेति दृढं चमसार्थ इव।
विभुते जगतामुदयं वदतस्समरूपऋचो निगमस्य बलात् ॥४ ॥

अजताजनिते कथमेकगते इति चेत् भवतो ननु सूक्ष्मदशाम्।
अनुजातविभक्तदशेव रवेर्मधुतैकलते मधुजित्कृपया ॥५ ॥

॥४. निगमनम् ॥

इत्थं नारायणात्मप्रकृतिभवमिमं लोकमाहुर्हि वेदाः
तव्द्याप्त्यैश्वर्यपादे स्फुटमिति कथितं व्याप्तिनिर्धारकेशे।
श्रीमन्मालोलदेवे सततमनुरतश्रीमतां पादमूले
तत्तादृग्वैभवश्रीनिधिगुरुकृपया लब्धसत्ताधनेन ॥६ ॥

* इदञ्च १९७०-तम संवत्सरे मुक्कूरुक्षेत्रे श्रीमालोलविद्वत्सदसि विज्ञापनाय क्लृप्तम्।श्लोकाश्च श्रीमदभिनवदेशिकस्वामिभिः श्रुताः। अभिनन्दिताश्च।

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ संख्योपसङ्ग्रहाधिकरणम् ॥

हस्ते पंञ्चजनासुरो हत इति प्राप्तश्रियं वारिजं
तद्वर्णं वपुषि स्वयञ्च कलयन् वाजी मुखे दीव्यति।
योग्यां मूर्तिमिमां वदन्ति विबुधाः शास्ता बुभूषंस्तु यां
धत्तेऽस्माऽण्णयदेशिकेन्द्रवपुषा सञ्जीवयन्नस्समान्॥१ ॥

यदजेति गिरान ज़गताञ्जननी हिक़ापिलिकेति पतं तदसत्।
धृतसंख्यमिदं स्फुटमस्ति वचो ननु पञ्च तु पञ्चजना इति तत्॥२ ॥

समूहसंभूतसमास एषः पुल्लिङ्गभावश्श्रुतिवैभवेन।
सङ्ख्यागतेष्वादरतोऽन्यथा वा पपाठ चाकाशमियं पृथक् तम्॥३ ॥

श्रीदेवहूतीसुततन्त्रबाह्यं ब्रह्माऽत्र वेदे नहि पठ्यते वः।
सा सप्तमी तत्र पुमांसमेव वक्तीति पूर्वः खलु पक्ष एवम्॥४ ॥

नानाविधानीह भवन्ति तानि तत्त्वानि कल्पेत कथं वु तेषाम्।
उपाधिसाम्येन विना समूहस्समाससिद्धेरयमार्थविघ्नः ॥५ ॥

अथाऽपि सिद्धे भवतां समासे शाब्दार्थदोषावतिरिच्य चाऽत्र।
आकाशयच्छब्दकृतस्ततस्स्यात् सङ्ख्यातिरेकस्स कथं समर्थ्यः ॥६ ॥

तथाऽपि सिद्धे भवतां समासे मूकेत्कथं ब्रह्मणि वा श्रुतिस्सा।
आकाशशब्देन परां विभूतिं आत्मेश्वरं यत्पदतो वदन्ती ॥७ ॥

यथा तथा वा भवतां समासे सिद्धेऽपि साङ्ख्यानि न वर्णितानि।
स्वातन्त्र्यहीनानि पृथग्विधानि ह्युक्तानि तत्र स्फुटमेतदेव ॥८ ॥

वस्तुतस्तु समासोऽयं संज्ञापर इति स्फुटम्।
शाक्तिवाक्ये तथा भाति "सप्त सप्तर्षयोऽमलाः" ॥९॥

ज्ञानेन्द्रियाणां किल यो गणोऽस्ति स एव वेदे पठितोऽत्र वाक्यैः।
सत्रा स्थितैरेष तु वेद्य एवं प्राणस्त्वचं वक्ति परोक्षतश्च ॥१०॥

जिह्वा च नासा च तथान्नशब्दे ह्यन्तर्गते पञ्चजनत्वमेवम्।
काण्वेऽन्नशब्दं न हि दृश्यते चेत् ज्योतिः पदं तत्र तु पूरकं स्यात् ॥११॥

इत्थं नारायणात्मप्रकृतिभवमिमं लोकमाहुर्हि वेदाः
तं देवानाञ्च भान्तं प्रभुमपि बलदं योजयन्तञ्च कार्ये।
तद्व्याप्त्यैश्वर्यपादे तदिह निगदितं तादृशे दैवते नः
प्राचार्याचार्यपूज्ये सततमनुरतिश्रीमतां पादमूले ॥१२॥

मृगं हि शीर्ष्णीह भजद्गुरोर्नः तारस्य नामाऽपि तथा बभूव।
तारे रतानां क्रतुवत् फलं नः घुष्यच्छ्रुतिस्सा प्रबला समिन्धे ॥१३॥

गीतोपदेष्टुः किल संपदक्षे रामानुजस्यैष जगद्विवेश।
अस्यापि तद्भाष्यकृताविरासीत् रामानुजार्यो ननु संपदक्षे ॥१४॥

तां विल्पुरं नस्समया वसन्तीं जातापराधे जननीव बाले।
भूया इति स्तौति गुरुस्तथैव नाविल् पुरस्था मयि वस्सभाऽस्तु ॥१५॥

कविनाथकृपालम्बी करुणाकरबालकः।
स्थायमानीं चकारैवं भवतां क्षान्तिमद्भुताम् ॥१६॥

***

* इदञ्च १९७१ - तमसंवत्सरे श्रीमति नावल्पाके श्रीमदण्णयार्यमहादेशिक-विद्वत्सदसि विज्ञापितम्।

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ प्रकृत्यधिकरणे अभिन्ननिमित्तोपादानविचारः ॥

"उपादाननिमित्तत्वे नैकनिष्ठे" "कुतो" यतः ।
उपादानं न यत्तत् स्यान्निमित्तमिति लक्षणात्" ॥१ ॥

लक्षणस्याऽस्य भङ्गश्च समावेशेन दृश्यते ।
स्वसुखज्ञानभूत्यादि स्वप्रवृत्तिफलं भजन् ॥२ ॥

समवायित्वयुक्तःस्यादानुकूल्यकृतेरसौ ।
आश्रयः पुरुषो येन निमितत्त्वञ्च संश्रयन् ॥३ ॥

मूर्तद्रव्येण संयोगं विभुरीशःस्वयं दधत् ।
स्वसङ्कल्पसमायुक्तः इष्यते तार्किकैस्सृजन् ॥४ ॥

व्यभिचार इति प्राप्तो लक्षणे दृश्यते ततः ।
पाकचिन्तामिमामूचे कवितार्किककेसरी ॥५ ॥

लोकवेदाविरुद्धं च लक्षणं किञ्चिदिष्यते ।
निमित्ततानवच्छेदिधर्माविच्छिन्नतायुते ।
उपादानत्वमित्याहुः कुशाग्रमतिभूषिताः ॥६ ॥

तादात्म्यसंबन्धनिरूपितं वा तस्याऽपृथक्सिद्धिनिरूपितं वा ।
कार्यं भवेद्यस्य तदेव तस्य भूयादुपादाननिदानभूतम् ॥७ ॥

तस्याऽनवच्छेदकधर्मलभ्यं यत्कारणं तत्तु निमित्तभूतम् ।
तस्येति युग्मं च तुलाधिरूढमानत्वमेयत्वकथैव सुष्ठु ॥८ ॥

आं गीरसस्त्वेष गुरूत्तमानामाङ्गीरसे ये तु तुलामधीह।
सदुत्तरप्रोष्ठपदाऽभिजातास्तेषां द्विषष्ट्युत्सवसत्सभायाम्॥९॥

विल्लूर्कवीशस्य कृपाकटाक्षैर्विद्यावता तस्य तनूद्भवेन।
*दयाकरेणेति कृतो विहारो दयां समाश्रित्य बुधोत्तमानाम्॥१०॥

---

*अयञ्च श्रीवलयपेट्टै श्रीनिवासमहादेशिकानां १२०-तमश्रीनक्षत्र-विद्वत्सदसि काञ्चीपुरे विज्ञप्तः।

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

।।अथ पशुपत्यधिकरणम्।।

(पूर्वरङ्गम्)

भवप्रवृद्ध्यै भवक्लृप्तमार्गाः भवाय नैवति वदन्नयेन।
भवर्क्षजाचार्यमुदे यथाऽहं भवानि याचे करुणां तथा वः।।१।।

गङ्गाधरप्रोक्तरजोवचोभिः गङ्गापदश्रीपतिदूरगानाम्।
गङ्गासपत्नीतनयेन सूत्रैः गङ्गेव शुद्ध्यै कलितो नयोऽयम्।।२।।

(सङ्गतिः)

कपिलस्य कणादस्य सुगतस्यार्हतस्य च।
मुमुक्षूणां न हि पन्थानो भवेयुरिति निश्चितम्।।३।।

अथाऽऽगमतामात्रेण सात्वतस्पर्धया युता।
पशूनां पदवी पत्युः परीक्षां भजतेऽधुना।।४।।

सत्त्वासत्त्वविरोधेन सप्तभङ्गजिना यथा।
परस्परविरोधेन पार्वतीपरतास्तथा।।५।।

निश्श्रेयसपथाद्दूरे निक्षिप्ता इति दर्शयन्।
जिनभङ्गनयादूर्ध्वं न्यस्तस्सूत्रकृता नयः।।६।।

तत्त्वेप्युपास्तौ नितरां दवीयानाचार इत्यादिविमर्शनेन।
पत्युः पशूनामपि तन्त्रसङ्गं व्यासः स्वयं पञ्चममेव मेने ॥७॥

(मुख्यसूत्रार्थः)

पत्युः पशूनां पदवी परं सा त्वाचारतत्त्वादिविपर्ययेण।
समञ्जसो नेति वदन् स मुख्यं सूत्रं ततानाऽत्र नये महर्षिः ।।८।।

स्मृत्या श्रुतिःसङ्कुचिता क्वचित् स्यात् श्राद्धे यथा मांसविधिस्तथेति।
जल्पो न युक्तस्स तु रोचनाय श्राद्धे तथा वैदिकसंप्रदायः ।।९।।

वेदोदिता शम्भुरतिस्तु नेया जुह्वा जुहोतीति यथा वचांसि।
पर्णप्रशस्त्यर्पकवाक्यपुञ्जैः नारायणाख्ये रतये परस्मिन्।।१०।।

पतीरितो महेश्वरो निमित्तमात्रकारणम्।
श्रुतिरितः परः पुमान्तु कारणद्वयं स्वयम्।।११।।

(गुणसूत्रार्थाः)

स्वतन्त्रतर्कैरनुमीयमाने महेश्वरे दोषगणो महान् स्यात्।
सूत्रत्रयेणार्थमिमं नयज्ञस्संस्थापयत्युत्तरतो मुनीन्द्रः ।।१२।।

शास्त्रयोनिनये पूर्वं स्थापितस्याऽद्य वर्णनम्।
चर्वणं चर्वितस्येति चोद्यमत्र न सङ्गतम्।।१३।।

तं त्वौपनिषदं त्वेति श्रुतिरेव विचारिता।
तत्राऽत्र तु निमित्तेशोऽनुमानस्य हि दूषणम्।।१४।।

ईशानुमानं यदि दुष्टमेतत् कथं स्वयं सूत्रकृता प्रयुक्तः।
मृत्कुम्भनीतिं प्रति चेतनाद्यहेतुत्वतर्को रचनाविचारे।।१५।।

प्रतिप्रयोगः किल स प्रयुक्तः प्रसाधितो नाऽपि परश्च तत्र।
स्वेच्छानुमानेन न सूत्रकारैः तस्माद्विरोधो नहि शङ्कनीयः ॥१६॥

स्वतन्त्रतर्के किल कुम्भकारदृष्टान्तलभ्यो भवतीह चेशः ।
देहाद्यधिष्ठेयमधिष्ठितस्सन्नदेह ईशः खलु वर्णितोऽस्ति ॥१७॥

अदेह एवाऽस्ति तु जीववर्गः भोगाय देहे करणादियुक्तः ।
दृष्टश्च सृष्ट्यादिकृते स ईशः तथेति चेद्भोगमुखं च सर्वम् ॥१८॥

ईशस्य भूयात् स च जीववत् स्यात् अज्ञोऽन्तवान् सन् भवमज्जितश्च ।
सर्वज्ञक्लृप्तेष्विति तन्मतेषु सर्वज्ञतावर्जित एव ईशः ॥१९॥

पूर्वं मीमांसितो ह्येषः विरोधे त्वनपेक्षकम् ।
पुनरुक्तिरियं तस्या इति चोद्यं न सङ्गतम् ॥२०॥

वेदप्रतीपं परिवर्जनीयं तत्रेरितं त्वत्र परं मतस्य ।
पत्युः पशूनामरितां श्रुतीनां प्रदर्शयन् तन्नयतो युनक्ति ॥२१॥

चत्वारो निगमाः परन्तु महितान् त्यक्त्वा द्विषन्तो हरिं ।
तानेते हरसंप्रदायपदवीं स्वेच्छागमैर्जृम्भिताम् ।
चत्वारः किल संभजन्ति तमसा ग्रस्ता नयर्षेः क्रुधा
तत्वाचारसृतेश्च्युतास्तु नितरां भ्रान्ता जुगुप्सावहाः ॥२२॥

एतान् मुक्तिपथे रतिं वहति यो सर्पं यथा दूरतः
संदृष्ट्वोद्विजते जनस्स तथा संवर्जयेत् सर्वदा ।
इत्येवं श्रुतिमौलिसूत्ररचनाचातुर्यपूर्णो मुनिः
तेने सूत्रचतुष्टयेन तमिमं न्यायं सतां प्रीतये ॥२३॥

(श्रीमदण्णयार्यमहादेशिकनुतिः)

यत्पादांबुजसेवनस्य महिमा सारावलीव्याकृतौ
तादृक्-श्रीशठकोपदिव्यकविताश्रीदेवभाषातनौ ।

पीयूषाधिकतृप्तिदायिनि सतामस्मत्पितुर्वाङ्मयेऽ-
प्यस्माकं परिदृश्यते तमनघं सेवेऽण्णयार्यं गुरुम् ॥२४॥

(श्रीनारायणसोमयाजिस्वामिनां कीर्तिः)

नारायणार्यान् नमसा युनज्मि वेदे रतिर्यद्वचसा सदा मे ।
अस्मत्पितुश्श्रीजनकस्य वाचस्स्मरन्त आसन् मयि सन्नते ये ॥२५॥

(श्रीदेवनाथमहादेशिकस्वामिनां कीर्तिः)

श्रीदेवनाथार्यगुरूत्तमानां पादाब्जरेणून् प्रणमामि भक्त्या ।
अत्राऽपि मुक्ता इव ये बभूवुः देवानुचर्यासु यदुत्सवेषु ॥२६॥

इदञ्च नावल्पाके १९८९-तमवर्षे कर्कटकमासि मृगशिरसि श्रीमदण्णयार्य-सोमयाजिनारायणार्य-महादेशिकयोः, आर्द्रायां श्रीदेवनाथार्यमहादेशिकस्य च श्रीनक्षत्रमधिकृत्य सञ्चालितायां विद्वत्सभायां विज्ञापितम् ॥ २४, २५, २६-तम पद्येषु तेषामाचार्याणां महिमोत्कीर्तनं ततः क्रमशः कृतम् । अण्णायार्य-महादेशिकाः ग्रन्थकर्तुराचार्यस्य प्राचार्यभूतानां सारावल्यादिव्याख्यातॄणां विल्लूर्नडादूर-महामहोपाध्यायसुन्दरराजमहादेशिकानां आचार्यभूताः ।

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः॥

॥अथ फलाधिकरणम्॥

चतुर्वेदस्तुतं ब्रह्म चतुर्वर्गफलप्रदम्।
चतुस्सूत्रमिदं भाति फलाधिकरणं वदत्॥१॥

कल्याणकारुण्यगुणाभिरामं दोषाद्यदुष्टं परमं तदेतत्।
तत्त्वं यतस्सर्वफलं जनानां लभ्येत यज्ञादिनमस्क्रियाभिः॥२॥

अचेतनं तत् क्षणनाशि कर्म कथं फलं नः प्रददाति विद्वन्!।
तस्मादसौ सर्वजगत्प्रभुर्नः फलं ददातीत्युपपत्तिभूमा॥३॥

अजं प्रभुं तं श्रुतिराह देवी वसुप्रदं मोक्षदमन्नदञ्च।
आनन्ददायीति च सर्वमेतत् भवन्मतच्छेदकरं विभाति॥४॥

आयामशब्दादखिलाधिवासः वाय्वादिदेहो वितनोति तृप्तः।
फलं भजत्भक्तगणाय सर्वं श्रौतोऽयमेव स्फुटमस्ति मार्गः॥५॥

मैवं वदेः किञ्चिदधीत्य वेदान् क्षीबोऽर्थवादस्स तु न प्रमाणम्।
स्वार्थे न तात्पर्यमिहास्ति यस्य तद्वाक्यजातेन न साध्यमस्ति॥६॥

य आत्मदा इत्यथ तादृशैश्च मन्त्रैर्न साध्यं तु फलप्रदत्वम्॥
मन्त्रः पुनः कर्मणि संप्रयुक्तः क्रियान्वयेनैव कृतार्थ आस्ते॥७॥

क्षीणो हि यागः कथमस्य कर्तुःस्वर्गस्य लाभस्त्विति चेद्वदामः।
अपूर्वमत्राध्वरतःस्वयं तत् समुत्थितं स्वर्गफलाय भूयात्॥८॥

स्वर्गो हि साध्योऽस्य च साधनञ्च यागस्त्वितीह श्रुतिवाक्यजातम्।
अनेन बाध्यं न भवेदपूर्वद्वारेण यागो हि फलं ददाति॥९॥

अहो भवान् कोऽयमपूर्वबुद्धिः मन्त्रार्थवादेषु विधित्वबुद्धिम्।
घृते पशौ विश्वसितीह नैव घृतस्य चोरे पशुपाललीले ॥१०॥

विश्वस्य नाभिं सुफलप्रसूतिं विहाय चान्यत् परिकल्पयंस्त्वम्।
त्यक्त्वा श्रुतं चाश्रुतमुल्लिखंश्च विचारमूढः प्रतिभासि सत्यम् ॥११॥

चापपुरीट्श्रीनिधिसूर्यङ्घ्रिपयः पानबलात्।
चक्र इदं ब्रह्मनये माणवकः क्रीडितकम् ॥१२॥

*महदाह्वयसूरेश्च समया जन्मकाश्यपीम्।
महतां तृप्तये भूयात् वेदान्तकविता मम ॥१३॥

---

*अयं च सन्दर्भः श्रीतिरुक्कुडन्तैश्रीमदाण्डवन् श्रीचरणैः १९७३-तमवर्षे महदाह्वयदिव्यसूरेः अवतारस्थलं समया आल्वार्पेट्टै-आश्रमे चालितायां पादुकाविहारविद्वत्सभायां विज्ञापनाय क्लृप्तः, तदिदं अत्र सूचितम् ॥

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ पुरुषार्थाधिकरणम्॥

(स्रग्धरायाम्)

विद्या नाना किमेकात्विति निपुणतरं वेदचूडाश्रुतास्ता
आलोड्यासामथाङ्गं विशदयितुमथाऽत्राङ्गिता वाऽङ्गतेति।
छेत्तुं संशीतिमग्रे रचयति भगवान् सूत्रकारो विचारं
विद्यातस्स्यात् पुमर्थः पर उत फलदं ध्यङ्गकं कर्म वेति ॥१ ॥

ब्रूते शब्दस्स्वयं तत् परममिह फलं तत्तु विद्यात आप्यं
आप्नोति ब्रह्मवित्तत् परमिति यतस्तैत्तिरीयश्रुतिस्सा।
वेदाऽहं पूरुषं; ना विदमृत इह तं; नान्य आस्ते च पन्थाः;
विद्वान् त्यक्त्वा स्वसंज्ञामिति परममिति श्रूयते मुण्डके च ॥२ ॥

भूयाद्यूपो यथा वा रविरिति वचनं स्तोत्रमात्रस्ववृत्ति
प्रत्यक्षप्रत्यनीकं तदिव भवता वर्णितश्शब्दसंघः।
व्रीह्या वा प्रोक्षणादिर्भवति खलु यथा तत्परार्थैक एवं
चाद्ये काण्डे चतुर्थे स्फुटविवृतिरभूत् ह्यर्थवादस्य तत्त्वम् ॥३ ॥

वेदानां देहभिन्ने बहुविधकरणे दक्षजीवे हि दृष्टिः
तस्माद्ब्रह्माभिवेत्ता भवति खलु परं स्वात्मतत्वस्य वेत्ता।
लोके सर्वैश्च कर्म स्वयमिह सुदृढं साधनं स्वीकृतं यत्
तस्याङ्गं ज्ञानमिष्टं तदिह सुमतिभिर्ध्यङ्गकं कर्म बोद्धयम् ॥४ ॥

साक्षादाह श्रुतिस्सा तुरगिनिगमगा विद्यया यत्करोतीत्-
येवं तस्मादिदं वै श्रुतिमतमिति सन्निर्णयो युज्यते नः।

तं विद्या कर्म चेति स्वयमनुगतिकृत्त्वेन घुष्टे तथैव
लब्ध्वा विद्या गुरोर्ना गृहमित इह सन् धार्मिकाण्येव कुर्वन्
कर्माण्याप्नोति मुक्तिं त्विति चरमवचस्सामवेदस्य मस्ते ॥५॥

यत्कर्तुं कर्म वर्षाण्यथ शतमिह ना जीवनेप्सां दधीते-
त्याद्युक्तेर्वाजिवेदे श्रुतिमतमिति चेन्नैव जीवात् परोऽन्यः।
शास्ता तद्ज्ञानमुक्तं स्थिरपरफलदं वैनतेयाग्रतःस्यात्
यन्नृत्तं मक्षिकाणामिव ननु भविता जीवविक्रान्तिरेषा ॥६॥

ब्रह्मज्ञास्त्यक्तकर्मानुचरणरतयः वेदगीश्श्लाघिताश्च
यत्कुर्याद्विद्ययेति प्रथितमपि मतं केवलोद्गीथनुत्याम्।
धीकार्योक्तौ मतिःस्वे प्रभवति करणं क्षेत्ररत्नक्रयाय
प्राप्तस्वांशं शतं तत् शतयुगकलिते मूल्य एवं त्विहाऽपि ॥७॥

वर्णानां सा ग्रहीतिर्न तु भजनमतिस्सामशीर्षण्युपात्ता
कर्तुं कर्माशया स्यात् शतमपि समा जीवनेच्छेति योक्ता।
विद्यानिष्पत्तये स्वाश्रमसमुचितसत्कर्म कर्तुं किलाशा
सेत्युक्ते का तु हानिर्भवति वद यतस्सर्ववेदाविरोधः ॥८॥

गार्हस्थ्यत्यागशीला अपि किल बहवः ब्रह्मविद्याभियुक्ताः
स्वेच्छातो वर्णितास्तत् कथमिव घटतां कर्मशेषत्ववादः।
विद्या सा चोपमर्दं श्रुतिपरिपठिता कर्मणां संतनोती-
त्येवं सन्न्यासिनां चाऽधिकृतिवचसा नाङ्गिता कर्मणःस्यात्॥९॥

सन्न्यासाख्याश्रमोऽयं श्रुतिषु न गणितो मैवमुक्तिस्त्रयस्ते
धर्मस्कन्धा इतीन्धे न खलु विधिरयं धारणे चाग्निहोत्रे।
यः पन्था वैधसिद्ध्यै भवतु स इह धीस्साधनं मुक्तयेऽस्या
*अङ्गत्वं कर्मणां यत् कथयति भगवान् सूत्रकृत् सांप्रतं तत् ॥१०॥

---

*अङ्गत्वं कर्मणां यत् कथयति भगवान् सूत्रकृत् सांप्रतं तत् ॥ इति १९९५-तम श्रीवात्स्यवरददेशिकविद्वत्सदसि आचार्यपाददत्तसमस्यापूरणाय ग्रन्थकर्त्रा लिखिता इमे श्लोकाः।

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ पुरुषार्थाधिकरणम् ॥

(उपजातौ)

१. पीठिकाश्लोकः (परकालवृत्ते)

*पुरुषार्थचतुष्टयप्रदो यः परकालमुखैस्तुतो मुखेऽर्वा ।
पुरुषार्थनयं पुरोऽस्य वक्ष्ये परकालमुनेश्च तत् प्रणम्य ॥१ ॥

२. स एवाऽथ मालभारिणीवृत्ते

पुरुषार्थचतुष्टयप्रदो यः परकालादिमुनीडितो मुखेऽर्वा ।
पुरुषार्थनये पुरो विहारः परकालाख्यमुनीशितुश्च मे तत् ॥२ ॥

३. प्रथमसूत्रार्थवर्णनम्

प्राप्नोति विद्वान् परमित्यथाऽपि विद्वान् प्रमुक्तो भवतीह नाऽन्यः ।
मार्गोऽयनायेति यथाऽब्धिमाप्तास्स्वनामरूपे जहतीह नद्यः ॥३ ॥

विद्वान् तथा कर्मजनामरूपैर्वियुज्यते चेति वदन्ति वेदाः ।
शब्दात्ततो मोक्षफलाय विद्या कर्माङ्गिकेत्यत्र न संशयोऽस्ति ॥४ ॥

---

*२००३-तमवर्षे श्रीपरकालमठसदसि इदमधिकरणमिमे श्लोकाश्च विज्ञप्ताः । तत्रायमादिमः श्लोकः मालभारिणीवृत्तस्य विषमपादैरेव कल्पिते समवृत्तविशेषे रचितः । अस्य वृत्तस्य लक्षणं ग्रन्थकर्तुर्दृष्टिपथे नाऽभवदिति अस्य वृत्तस्य लक्षणमेवं ग्रन्थकर्त्रैव व्यलेखि । ''सगणस्सगणोऽथ जोऽथ गू यत् परकालमठे दयाकरस्य । अपि विश्रममष्टमे भजन्ती परकाल इति प्रथान्विता वाक्॥ '' अस्य वृत्तस्यपरकालवृत्तमिति नामाऽप्यदायि । मालिभारिण्यां अयमेव विषयो द्वितीयश्लोकतया दत्तश्च ।

सिद्धान्तमित्याह हि बादपूर्वः स रायणाख्यो मुनिराप्तधुर्यः ।
सिद्धान्तमेवं मुखसूत्र एव ब्रूते निशम्य स्वमतं मुनीन्द्रः ॥५॥

स जैमिनिः प्रत्यवतिष्ठमानः मीमांसमानेषु वरिष्ठभूतः ।
षड्भिस्तु सूत्रैः परिशील्य भूयो विद्याङ्गकं कर्म फलस्य मूलम् ॥६॥

४. द्वितीयसूत्रादारभ्य सप्तमसूत्रपर्यन्तं विद्यमानानां पूर्वपक्षसूत्राणां भावः ।

कर्ता हि जीवःकिल कर्मसङ्गे स्ववेदनं तस्य हि संस्कृतिःस्यात् ।
एवं स संस्कारमवाप्य विद्वान् कर्ता भजेताऽथ निजाधिकारम् ॥७॥

फलानि यान्यत्र तु वेदनस्य तान्यर्थवादत्वमथो भजेरन् ।
द्रव्यं क्रिया संस्कृतयश्च वैधाश्शेषा अमीषां फलमर्थवादः ॥८॥

काण्डेऽग्निमेयं निपुणं विचारो नीतश्च सिद्धान्तमिमं तुरीये ।
अध्याय एवं प्रथमे नयेऽङ्घ्रौ तथा तृतीये किमु विस्मृतं तत्? ॥९॥

द्रव्यं यथा पर्णतरोस्तु दारु जुह्वाश्श्रुतेस्संविनिवारणाय ।
श्लोकस्य पापस्य परं क्रियायाः द्रव्यं तु शेषः फलमर्थवादः ॥१०॥

वृङ्क्ते रिपोर्नेत्रमिति श्रुतो यः स्तुतस्स संस्कार इतीत्थमेव ।
द्विषोऽभिभूत्यै सृतिमाश्रयन्निमां प्रयाजपूर्वान् विदधाति वेदः ॥११॥

तत्राऽपि चोक्तं फलमर्थवादः तथाऽऽत्मविद्याफलवर्णनि च ।
इदं कथं ब्रह्म हि वेद्यमुक्तं जीवस्ततोऽन्यो ननु वेदवाग्भिः ॥१२॥

तत्त्वं तथा सर्वमिदं तदेव भिदा ततो नेति समञ्जसं स्यात् ।
श्रीवाजिरूपद्युमणेरवाप्तवेदस्य चर्षेर्वचसा शरीरे ॥१३॥

श्रीकाशकृत्स्नस्य मतेन चाऽपि जगत्तनुःस्याद्धरिरस्य चाऽऽत्मा।
अभेदवाचामिदमस्ति मूलं इत्यादि न स्यात् किल लिङ्गपुष्टेः ॥१४॥

कर्माङ्गभूतोपनिषत्स्थविद्या प्रमाणनिष्ठस्य भवेन्मतं तत्।
स यक्ष्यमाणः किल केकयोऽभूत् स्थेयं यमाप्तो विदुषां गणोऽभूत् ॥१५॥

ज्ञानाश्रयो यागततौ रतोऽभूत् केशिध्वजश्चेति पुराणरत्ने ॥१६॥

ते कर्मणा सिद्धिमवाप्तवन्तः वैदेहमुख्या इति पार्थसूतः।
वक्त्येवमाचार इहाऽस्ति यस्मात् कर्माङ्गभूतेति मतिं वदामः ॥१७॥

लिङ्गं त्विदं किं नु ततो भवेन्नः प्राप्तिं वदेरित्यभिमन्यसे चेत्।
यदेव वेदो ननु विद्ययेति करोति चेत्यादि वदन् विभाति ॥१८॥

विद्या च कर्म स्पृशतो यतस्तं सहेति साहित्यपरा श्रुतिश्च।
ततोऽङ्गभूतेति मतिं वदामः कर्माऽङ्गि चैवं क इहाऽस्ति दोषः? ॥२९॥

अधीत्य वेदान् समवाप्य विद्यां शुश्रूषणाद्यैर्गुरुकर्म कृत्वा।
शुचौ तु देशे गृहवान् करोति कर्मेति सामश्रुतिमौलिवाक्यम् ॥२०॥

शतं समा जीवनकामनाढ्यः कर्माणि कर्तुं त्विह सुष्ठु भूयात्।
इत्येव दृष्टो नियमश्च कश्चित् स संहितान्ते किल वाजिवेदे ॥३१॥

५. अथ सिद्धान्तः

इति स्थिते वक्ति तु बादपूर्वः स रायणो पक्षमिमं विमृश्य।
सन्दर्शयन् जैमिनिवादवर्गे दोषान् स्वसूत्रैरथ पंक्तिसंख्यैः ॥३२॥

जीवात् परो योऽधिक एव तस्मात् जीवाधिपस्तस्य च वेदनेन।
फलं वदन्ती श्रुतिरस्ति तत्र कथं तु कर्तुर्भविता स्वचिन्ता ॥३३॥

खद्योतकल्पः खलु खाधिपोऽयं कल्पान्तसूर्यस्स च खाधिपेशः।
पाप्मादिदूरस्सकलज्ञ आस्ते सर्वस्य शास्ता सुगुणैकभूमिः ॥३४॥

तत्प्राप्तिरूपं ह्यमृतत्वमाहुः तत्सेवनं साधनमस्य चेति।
तत्भृत्यसांराज्यपदस्थजीववार्ताऽपि नास्तीति तदेव हास्यम् ॥३५॥

लिङ्गं निरस्तं भवदिष्टमत्र विना तु कर्माऽपि यतो यतीन्द्राः।
उपासते तं त्विति वेदवाक्यं द्वेधा तदाचार इहास्ति बोध्यः ॥३६॥

मिथो विरुद्धं कथमाचरेयुः सकामकर्मत्यजनं परं तत्।
अकाममेतत् कुरुते मुमुक्षुः विद्याङ्गबुद्ध्येति समञ्जसं स्यात् ॥३७॥

कर्माङ्गभूता यदि धीः कथं वा लोपेऽङ्गिनोप्यस्ति फलस्य सिद्धिः।
त्यागोऽथ यस्याः फलकांक्षया सा क्रियाऽङ्गभूतेति समञ्जसं स्यात् ॥३८॥

यदेव कुर्यात् खलु विद्ययेति तत्रान्वयो न स्वरसप्रतीतः।
यद्यत्तु कुर्याच्च धियैव तत्तत् कुर्यादिति स्यात् कथमन्वयोऽत्र ॥३९॥

सर्वत्र विद्यां क्रतुशेषभूतां न वै श्रुतिर्वक्तुमियं समर्था।
सापेक्षमास्ते यदियं ततश्च निजस्थलस्थां धियमेव वक्ति॥ ४०॥

उद्गीथविद्या किल सोमयागे तदङ्गभूतेति धियोऽङ्गताऽऽस्ताम्।
अन्यत्र कर्मस्वपि चाऽङ्गताऽस्या भवेत्कथं वाऽन्यधियां तथाऽपि ॥४१॥

क्षेत्रं च रत्नं च ददौ क्रयेण शतद्वयं मूल्यमिहेति चोक्ते।
शतं तु रत्नाय शतं तु भूम्यै भवेदिति स्याद्धि विभागरीतिः ॥४३॥

विद्या स्वकीयं फलमस्य दत्ते कर्माऽपि भागं भजतीति बोध्यम्।
योगात्मिकेयं ननु धीरिहेष्टा निष्पत्तयेऽस्या भवतीह कर्म ॥४६॥

अधीत्य वेदानथ कर्म कुर्यात् इत्युक्तितः कर्म तदङ्गि विद्या।
तदङ्गमित्युक्तिरसाधुरन्या वेदार्थविज्ञानमतेरुपास्तिः ॥४७॥

कर्माणि कुर्वन्निति वाक्यतो वा विशेष इष्टो भवतां न सिद्ध्येत्।
विद्याङ्गभूतानि हि तानि कुर्यात् निष्पत्तयेऽस्या इति धर्मवृद्धाः ॥४८॥

सङ्गो न यस्याऽस्ति नरं तमाहुः फले न सङ्गस्तव चेन्नरस्त्वम्।
कुर्वन् च कर्माणि न लिप्यसे तैः माहात्म्यमेतत् भजनस्य सत्यम् ॥४९॥

ईशेति विद्यास्तुतये प्रवृत्ता श्रुतिर्विशङ्कं त्विति वक्ति कुर्वन्।
शतायुरप्येष जिजीविषाढ्यः कर्मेति तस्याऽनुमतिं प्रदत्ते ॥५०॥

गार्हस्थ्यकर्म त्यजताञ्च सूक्तं केषाञ्चिदास्ते श्रुतिषूपदिष्टम्।
तव प्रतीपं तदिदं यदङ्गिलोपः कथं स्यात् श्रुतिशासनेष्टः ॥५१॥

अङ्गेन सोऽयं भवतां मते स्याद्ध्वंसोऽङ्गिनो वेदवचोभिरुक्तः।
कर्माङ्गभूतं भजनं त्वितीदं सङ्गच्छते किं वद सावधानः ॥५२॥

सन्यासिनोऽग्नीन्धनकर्म नास्ति तस्याऽप्युपास्तावधिकार इन्धे।
तुर्याश्रमो नाम न कश्चिदस्तीत्येवं न वाच्यं श्रुतिमध्य एव ॥५३॥

प्रव्राजिनो भान्ति हि वर्णितास्ते सन्यासिनस्तेन च कर्म नाङ्गि।
विद्याङ्गकं तद्विमृशन् वदेस्त्वं सङ्गच्छते किं तव वादनृत्तम् ॥५४॥

तदग्निहोत्रं जुहुयाच्च यावज्जीवं नरोऽयं त्विति शासनं तत्।
च्युतं भवेदित्यपि शङ्कयाऽलं विरक्तिहीनस्य कृते तदिन्धे ॥५५॥

ओङ्कारतो ब्रह्म भजेदितीदं वक्तुं प्रवृत्ता किल सा श्रुतिस्तु।
त्रयो भवन्तीति च धर्मशाखाऽभिवर्णनं तत् विधिरस्य नास्ति ॥५६॥

स्मृत्यादिभिर्वा भवितेति न स्यात् वेदप्रतीपं न हि किञ्चिदीष्टे।
विधातुमन्यत् यदिमे तु वेदे वीरघ्नशब्देन च दूष्यमाणाः ॥५७॥

गृहीति वर्णीति च नाऽऽश्रमाणां विधानमेतन्नहि वेदवाचि।
परामृशेनेति समानमेव सन्यासधर्मे किमति प्रकोपः ॥५८॥

विधीयतेऽयं तु लडाऽश्रमोऽपि मीमांसकानां पथि चिन्त्यमाने।
समित् भवेत् ऊर्ध्वपदे स्रुचस्सा वेदार्हकर्मस्विति निर्णयेन ॥५९॥

***

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ पारिप्लवार्थाधिकरणम् ॥

*१. उत्सवनायकवन्दनम्

मीनावतारो धृतमन्दरागः क्षमोत्तरश्रीवचनाभिरामः।
नृसिंहमूर्तौ कलितानुरागः काव्यैकलक्ष्यं कलयन् चरित्रम् ॥१ ॥

समाचरन्नर्जुनदेशिकोक्तं रामानुजार्यार्हणलक्ष्यभूमिः।
वस्विष्टभार्योदय एष नूनं कृष्णःस्वनाम्ना कलिकल्मषघ्नः ॥२ ॥

श्रीविल्लिपुत्तूर्मुनिवंशयोगादस्मासु तादृक्षरतिं दधानः।
बाल्येन चेत्यस्य निदर्शनं सन् मयि प्रसादं तनुतां महात्मा ॥३ ॥

शताब्दपूर्तौ कलिता सभाऽस्य पारिप्लवस्सर्वनयेषु यस्य।
पारिप्लवार्थाधिकृतौ ततोऽत्र विज्ञापना दासजनस्य युक्ता ॥४॥

श्रुतोऽश्वमेधे विधिरेवमस्ति पारिप्लवं शंसति पार्थिवाय।
सामात्यपुत्राय समस्तमत्र शंसन्ति चाऽऽख्यानसमूहमेव ॥५ ॥

---

*श्रीमदुभयवे. एन.एस.विश्वप्रसिद्धविदुषां नावल्पाकं रामानुजताताचार्यस्वामिनां पितृपादानां श्रीकृष्णतातयार्यमहादेशिकानां शतमानमहोत्सवाङ्गभूतविद्वत्सदसि १६-०३-०४ तमदिने ग्रन्थकर्त्रा विज्ञापितमिदम्।

तत्र प्रथमद्वितीयश्लोकाभ्यां उत्सवनायकानां दशावताराणाञ्च श्लेषतस्साम्योक्तिः। १. मीनावतारो- मत्स्यावतारः। पक्षे मीनमासि कृतावतारः इति। २. धृतमन्दरपर्वतः कूर्मः धृतमन्दरागः। पक्षे-मन्देषु च रागो धृतो येन सः। ३. क्षमाया उत्तरभूतश्रीवचनैरभिरामो वराहपुराणवक्ता वराहः क्षेमोत्तरश्रीवचनाभिरामः। पक्षे-क्षमया श्लाघ्यमुत्तरं दधतं तेन श्रीवचनेनाऽभिरामः इति मृदुभाषिणउत्सवनायकाः। नृसिंहमूर्तौ कलितः अनुरागः नृसिंहावतारे भगवात्। पक्षे- श्रीनृसिंहताताचार्याणां निजाचार्याणां मूर्तौ कृतानुराग उत्सवनायकः। काव्यैकलक्ष्यं निजचिकीर्षितं दधानो वामनः।

पूर्वपक्षः

समस्तशब्दोऽत्र समानि वक्ति श्रुतौ चरित्राणि समीरितानि ।
वेदान्तभागेषु कथाः श्रुताश्च प्रतर्दनश्शक्रपदं गतोऽभूत् ॥६ ॥

जाये अभूतां-सितवेददर्शिमुनेस्तथाऽऽसीत् सितकेतुनामा ।
इत्यादिकास्ताश्च ततोऽश्वमेधे पारिप्लवेऽर्हा विनियोगमेताः ॥७ ॥

काव्यःशुक्राचार्यः । पक्षे-काव्यैकलक्ष्यभूतं चरित्रं दधान इति । अर्जुनदेशिकः-दत्तात्रेयः । तदुक्तं समाचरन् भार्गवरामः अर्जुनमवधीत् । तथा हि दत्तदत्तो वरोऽर्जुनस्य । पक्षे-अर्जुनदेशिकः पार्थसारथिः तदुक्तं गीतासूपदिष्टं समाचरन्नुत्सवनायकः । रामानुजो-लक्ष्मणः । तदादीनां अर्हणलक्ष्यभूमिः श्रीरामः । पक्षे- रामानुजादीनां पुत्रशिष्याणां अर्हणलक्ष्यभूमिः । वसोरिष्टा भार्या रोहिणी तस्यामुदयो यस्य सः-बलभद्रः । वसुरिति वसुदेव उच्यते । तथा च श्रीसहस्रनामभाष्ये भट्टपराशरार्याः- ''तत्र लक्ष्मीजन्भूमौ वसतोऽपि वसौ-वसुदेवे मनः अस्येति वसुमनाः । देवदत्तो दत्तः, सत्यभामा भामा इतिवत् वसुर्वसुदेव इति महाभाष्यविदः ।'' इति । पक्षे वसूनामिष्टमभिमतं भं नक्षत्रं वस्विष्टभं । श्रविष्ठा नक्षत्रं वसवो देवता इति हि श्रुति । तस्मिन् भे कृत आर्य उदयो येन सः वस्विष्टभार्योदयः ।

श्रीकृष्णतातार्यमहादेशिकानां जन्मनक्षत्रं श्रविष्ठा । कृष्णस्स्वनाम्ना इति कृष्णावतारः । कलिकल्मषघ्नः इति कल्क्यवतारः । पक्षे स्पष्टार्थाविमौ । तृतीये श्लोके- श्रीमदण्णयार्यमहादेशिकानां प्रियशिष्येष्वन्यतमभूताः श्रीविल्लिपुत्तूर् स्वामिन इति प्रसिद्धाः रङ्गनाथयतीश्वराः । तेषां संबन्धतः ग्रन्थकर्तुः कुले रतिं दधान आसीदुत्सवनायकः । इतीदं सूच्यते ।

तुरीये श्लोके सर्वेषु शास्त्रेषु परिप्लुत्य परिप्लुत्य शंसनमिति पारिप्लवशब्दः उत्सवनायकस्य सर्वेषु शास्त्रेषु सामर्थ्यं ब्रूते । तथा च भावप्रकाशिका- ''परिप्लुत्य परिप्लुत्य शंसन''मिति पारिप्लवशब्दस्य शस्त्रे उपपत्तिः ।

ततः आख्यानसाध्ये शस्त्रेऽपि पारिप्लवशब्दः प्रयुज्यत इति । तदिदमवलम्ब्य ग्रन्थकतुरिव प्रयोगः ॥

इत्येवमूचे किल पूर्वपक्षी कयाऽपि रीत्या श्रुतिमौलिविद्याम्।
अधि स्थितानामपि कर्मणोऽङ्गभूतत्वसंस्थापनक्लृप्तबुद्धिः ॥८॥

परार्थ्य उद्गीथ इति श्रुतश्च स्तुतिं वदन् यो वितथप्रयत्नः।
दृष्टिं तथा कर्तुमयं विधिःस्यात् इत्युक्त इत्थं यतते पुनश्च ॥९॥

शुक्रं प्रविध्येति वचो विचार्य प्रत्यूहशान्त्यै ग्रहणेषु पाठ्यम्।
विद्याङ्गता नेति वदन्नयोऽस्ति प्रतीपरीत्याऽस्य कुतोऽत्र वादः ॥१०॥

यज्ञेषु सर्वेष्वयमेव पूर्वस्त्वन्येन पश्चाद्यजनं यदुक्तम्।
सङ्कोचमत्राऽन्यपदस्य पूर्वकाण्डे नयो भाति निवारयंश्च ॥११॥

स च क्रमाध्यायगतस्ततश्च शास्त्रैक्यवादं भजता त्वया तु।
विस्मर्तुमर्हो न कदाऽपि तस्मात् पारिप्लवार्था हि कथास्समस्ताः ॥१२॥

सिद्धान्तः

उपक्रमे सर्वपदश्रुतिर्या विशेषितत्वात् खलु केषुचित् सा।
सङ्कोचमर्हेदिति सिद्धमित्थं सर्वस्य लिप्सेतिवचोविचारे ॥१३॥

या हारियोजनपरा श्रुतिरस्ति तस्याः ऋत्विक्षु सङ्कुचितरीतिरिहाऽपि तद्वत्।
ग्रावस्तुतोऽपि भविता किल हारिभक्षः यच्छेषलक्षणगतो नय एवमूचे ॥१४॥

सर्वाः कथा इत्यपि तद्वदेव स्वाकांक्षितं तत्र समीरितैश्च।
प्राप्नोति सङ्कोचमथाऽऽप्य शक्त्या ह्युत्सर्गवृत्तेरपवाद एषः ॥१५॥

एवं न चेद्रौप्यसमर्पणस्य निषेधसिद्ध्यै पठिता कथा सा।
रुद्रस्य रुद्रत्वपरा च तत्र पारिप्लवार्थं भविता कथं न ॥१६॥

विधेस्समीपे पठिता यथा स्युस्तदर्थवादा विधिवाक्यशेषाः ।
विद्यासमीपे पठितास्तथा स्युस्तद्वाक्यशेषा इति राजमार्गः ॥१७॥

मध्येविद्यं मामुपाःस्वेति वाचः उक्ताख्यानेनैकवाक्यत्वसिद्धिः ।
तस्मादाख्या नैव पारिप्लवार्था तत्राऽऽकांक्षा वाद्यशेषेण शान्ता ॥१८॥

शास्त्रसाहितीवल्लभेरितं कृष्णसूरिसत्संसदीह वः ।
कृष्णसूरिजान् पण्डितान् तथा तत्समान् समान् तृप्तये नयेत् ॥१९॥

***

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ अग्नीन्धनाद्यधिकरणम्॥

१. सभानायकवन्दनम्।

सङ्गीताक्षाङ्घ्रिसच्छास्त्रवेदवीक्षादिवारिधेः।
वीक्षाऽक्षरास्यगोष्ठ्यां मे तन्यादृक्षां यतीशितुः ॥१॥

२. सभावन्दनम्।

अग्नीन्धनादिनिरपेक्षमुपास्य यां ते दूर्वादयोऽपि पदमुन्नतमाप्तवन्तः।
तस्या विहारसदसीह सतां प्रसक्त्या अग्नीन्धनादिनिरपेक्षनये विहारः ॥२॥

३. पूर्वपक्षः।

यदूर्ध्वरेता इति वर्णितस्य वेदस्थशब्दैः परिपठ्यमाना।
विद्याऽस्ति तस्मात् न च कर्म भूयात् तयाऽङ्गवत् सा तु भवेत्तदङ्गिका ॥३॥

इत्युक्तमत्र पुनरस्ति हि संशयो नः यज्ञेन वेदनमुदीरितमस्ति यस्मात्।
आधानपूर्वकमुपासनमेव चाङ्गि सन्यासिनां तु न हि वह्निरतोऽङ्गि न स्यात् ॥४॥

च शब्दतस्सूत्रकृताऽत्र सूत्रे सन्देहवापोऽक्रियतेति टीका।
समुच्चयश्चाऽपि तथा कृतोऽत्र वर्ण्याश्रमस्येति च दर्पणोक्तिः ॥५॥

नयद्वयं मध्यगतं तथाऽपि नयेन चाद्येन सुसङ्गतत्वम्।
वदन् नयस्याऽस्य स शङ्करोऽपि संपिण्डितोक्त्यै नयमेतमाह ॥६॥

युक्त्यन्तरं यदि भवेत् खलु पूर्वपक्षे तेनाऽपि किञ्चन फलान्तरमाप्यते चेत्।
न्यायान्तरस्य रचना ह्युचिता भवेत् सा श्रीभाष्यकारसरणौ न परस्य चेति ॥७॥

टीकेरितं दीक्षितसार्वभौमः युक्तं स मेने विवृतौ लिलेख।
श्रीकण्ठभाष्यस्य च पूर्व काण्डसंदृष्टमार्गेण स पूर्वपक्षम् ॥८॥

एतत्सभानायकनामदाता टीकेष्टमेवेति हि तं च भावम्।
प्रकाशयामास निजोक्तटीकाटीकासु तादृक्षविशालचितः ॥९॥

षष्ठेऽष्टमे चिन्तितमस्ति यज्ञानङ्गक्रियाजातकृतेऽधिकारे।
वह्नौ जुहोति त्रिभिरेष मन्त्रैः वर्णी भवन् इत्यपि यो विधिस्सः ॥१०॥

होमं करोत्याहवनीयवह्नौ वयुर्भवन् एव ततो हि वह्नेः।
आधानमिष्टं भविता ततश्च तदर्थमस्योपयमोऽपि भूयात् ॥११॥

इत्येवमापातत एव दृष्टेः भूयात्ततो दारपरिग्रहोऽपि।
धर्मार्थमस्येति ततश्च भूयः कृत्वा परामर्शमिदं किलाहुः ॥१२॥

होमो भवेत् लौकिक एव वह्नौ स्थपत्युपात्तेष्टिवदेव यस्मात्।
आधानकर्मण्युचिताश्च ये ते क्रियाप्रकारा ननु वेदविद्याम् ॥१३॥

विनैव वर्णीभवतः कथं स्युः ज्ञानञ्च तेषामिति चिन्तनीयम्।
जायापती यत्कुरुतां इतीतः जायासमेतोऽधिकृतस्ततःस्यात् ॥१४॥

स्नायादधीत्येति विधेश्च तस्याः पाणिग्रहो वेदपरिग्रहस्य।
अनन्तरं स्यादिति च श्रुतं तत् दारक्रिया कर्मण एवमेका ॥१५॥

प्रजार्थमन्येति च निर्णयो नो धर्माय सैवाऽपि भवेत् प्रजायै।
यत् सोमपानेन लभेत यष्टा जायां द्वितीयामिति वेदवाक्यम् ॥१६॥

सन्तानधर्मान्यतरानवाप्तौ जायां द्वितीयां पुरुषो भजेत।
अनाहिताग्निः पितृयज्ञकर्ता यथा तथा दारसमन्वितःस्यात् ॥१७॥

स्नानं विना चेति विधेरभावात् दारक्रिया नाऽस्य वटुर्भवन् तत्।
स लौकिके पावक एव वैधान् होमान् करोतीति नयस्स आस्ते ॥१८॥

तत्रेव चाऽत्रापि हि पूर्वपक्षः यज्ञार्थदारैस्सहितो यतिःस्यात्।
स ऊर्ध्वरेताः कथमेष भूयात् देवव्रतश्शान्तनवो यथा सः ॥१९॥

स्नात्वाप्य दारान् पितुरेव तृप्त्यै भीष्मोऽभवत् सोऽथ तदूर्ध्वरेताः।
धर्मार्थमेवाऽस्य तु दारजातं यद्यप्यभूत् पूर्वमिदं किलाऽस्य ॥२०॥

४. सिद्धान्तः।

धर्मप्रजार्थं त्विति सङ्गृहीतं भीष्मव्रतात् धर्मकृते बभूव।
तद्वत् यतीनामिति चेन्न युक्तं विद्या यतस्संयमिनां गणेषु ॥२१॥

तदाश्रमाचापरैश्च धर्मैः साङ्गेति वेदैः किल दर्शितोऽस्ति।
स्मृतौ च तद्वत् पठितं ततश्च यज्ञाद्यपेक्षा यतिनां न भूयात् ॥२२॥

मोक्षाश्रमाख्या यतिधर्म एव तस्मात् स्थितास्तत्र हि मोक्षमर्हाः।
इत्यादिशङ्काभिरलं तदाख्या भूयोगुणैर्नाऽन्यनिवारणाय ॥२३॥

सारावलीग्रन्थ इदं किलोक्तं प्रासङ्गिकं चात्रमयेरितं वः।
सर्वाश्रमाणामपि मोक्षविद्या तदीयधर्मैर्भविताऽङ्गपूर्णा ॥२४॥

५. निगमनम्।

अग्नीन्धनं चाऽत्र विना ततस्स्यात् विद्येति तेषांअधिकार आस्ते।
सन्यासिनां स्वाश्रमधर्मतोऽन्यत् नाऽपेक्षते वर्णिगणे च विद्या ॥

रङ्गलक्ष्मणप्रीतितो भवन् शास्त्रसाहितीवल्लभो जनः।
ब्रह्मवेदने केवलं मखस्याङ्गता नहीत्येतदैरयत् ॥

***

*इदं २००४-तमवर्षे श्रीपादुकाविहारसदसि विज्ञापितम् ॥

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ सर्वापेक्षाधिकरणम्॥

सर्वापेक्षित- विद्याजुष्ट -श्रीमुष्णोदित-मुनिवर-सदसि।
सर्वापेक्षाधिकृतौ विहृतिं कुर्वे श्रीनिधि-गुरुवर-कृपया॥१॥

मीमांसमाने निगमोदितानि वाक्यानि शास्त्रे चरमेऽथ काण्डे।
साध्यद्विके साधन-लक्षणेऽङ्ग-परे तुरीये पदि पञ्चमीयम्॥२॥

(अधिकृतिरिति यावत्।)

विद्यासहायो वदने हयो नः विद्याप्रसाध्यो गमने हयो व।
विद्यात्र कर्मापि शफत्रकादि विद्यात् श्रुतं सर्वमथाश्रमार्हम्॥३॥

*सर्वापेक्षा-शब्दस्सूत्रे शंकररीत्या तात्पर्यं स्यात्।
सर्वोपेक्षाऽस्येति च पश्यन् विद्वान् को वा तृप्तिं भजताम्॥४॥

हले न युज्येत यथा तुरङ्गमः परं रथे तद्वदिहापि कर्म।
विद्योदयायैव भवेदपेक्ष्यं नापेक्षते सा फलसिद्धये तत्॥५॥

वेदितुमिच्छन्तीति किलोक्तं विद्योत्पत्तौ तस्माद्ब्रूयात्।
कर्मापेक्षेत्युक्तेरर्थश्शंकरभाष्ये कथितश्चास्ति॥६॥

विद्यासाधनमिति चाप्युक्तं इच्छायोगाद्विद्योत्पत्तेः।
कर्म स्यात् साधनमिति चोक्तं शंकरभाष्ये द्वेधैवेत्थम्॥७॥

द्विधोक्ततः केचन शङ्करस्य पक्षे स्थितास्तस्य तु भाव इष्टः।
कर्म स्पृहा साधनमेव भूयात् इत्येव वक्तव्यमितीरयन्ति॥८॥

*शंकरभाष्ये ''विविदिषा- संयोगाच्चैषां उत्पत्ति-साधन-भावोऽवसीयते। विविदिषा-संयोगात्तु बाह्यतराणि।''इत्युक्तम्।

तदाग्रह-च्छेदन-सूत्रभाव- सन्दर्शने तन्त्रत एव कर्तुम्।
तदीय-रीत्या किल पूर्वपक्षी श्रुत्यर्थ-वक्तेति यतीन्द्रभाष्यम्॥९॥

श्रुतिर्विविदिषन्तीति यज्ञाद्यैश्च यदाह तत्।
स्वर्गकामो यजेतेति वचनेन समं भवेत्॥१०॥

जिगमिषति हयेनाऽयं भट इति वचने हयेन साध्यं तत्।
गमनं स्यादथवा सा गमनेच्छा वेति चिन्त्यतां संयक्॥ ११॥

प्रकृतिप्रत्ययमध्ये प्राबल्यं प्रत्ययस्य यत् प्रोक्तम्।
उत्सर्गत एवैवं त्वपवादःस्वर्गकाम इत्यत्र॥१२॥

यद्भेषजेनैष बुभुक्षतीति दृष्टान्त उक्तो न च साधयेत् सः।
पक्षं त्वदीयं ननु भोजनेच्छा सिद्धा हि तस्य प्रतिबन्धकस्य॥१३॥

रोगस्य शान्त्यै किल भेषजस्य सेवां तनोतीति हि तत्र युक्तम्।
तद्भेषजे भोजनसाधनत्वं यज्ञादिकं चाप्यघशान्तये स्यात्॥१४॥

*श्रुतिर्विविदिषन्तीति लकारं पञ्चमं स्वयम्।
पठतीति भवेत् शास्त्रसंमता प्रक्रियाऽथवा॥१५॥

**''धातोः कर्मणि'' सूत्रात् इच्छार्थे सन् विधीयमानोऽयम्।
प्राधान्यमिष्यमाणे न निवारयतीति शास्त्र-सरणी स्यात्॥१६॥

---

*विनियोजकवाक्यरूपम्:- विविदिषाकामो वा वेदनकामो वा यज्ञदानादिना फलं भावयेत् इति परमार्थभूषणोक्तिः।

**धातोः कर्मणस्समान-कर्तृकादिच्छायां वा। इति अनुशासनमभिप्रेतम्।

*भूषाकर्मकिरादीत्यपि वार्तिकमतेन दृष्टोऽयम्।
कर्मस्थे कर्तरि या प्रकृतिस्सैव प्रधानतायुक्ता ॥१७॥

व्युत्पत्तिरीत्येति समर्थितं वः तर्के विकल्पं न सहेत पक्षः।
यदा करोत्येष मखादि तस्य सोपासनाशा किमुतास्ति नो वा ॥१८॥

यद्यस्ति सिद्धं ननु साधयेत् सःउपासनायां न रतो यदि स्यात्।
उपासनाशाप्यत एव तस्य न स्यादितीदं किमु वर्णनीयम्॥१९॥

सन्- प्रत्ययत्याग इहास्ति दोषः वेदोक्तवर्णेषु समो हि पूज्यः।
जिज्ञासितव्यादिपदेषु वेदे परिग्रहः किं भवतां सनोऽभूत्॥२०॥

गत्यन्तराभावत एवमासीत् तदैव चात्रेति सुखी भव त्वम्।
क्रियायुतं ब्रह्मविदां वरिष्ठं वदच्छ्रुतेश्चापि च तादृशीभ्यः॥२१॥

यज्ञादिभिःस्वाश्रमधर्मसंघैः निष्पन्नविद्यः परिशुद्धिमाप्य।
संप्रीणयेत् श्रीपतिमेष विद्वान् प्रयाणपर्यन्तमितीह तत्त्वम्॥२२॥

विद्याप्रतीपं न भवेत्तु कर्म विद्याभिनिष्पत्तिकरं यदेतत्।
निजाश्रमार्हाणि समानि कुर्वन् प्रसादमृच्छेत् कमलाप्रियस्य॥२३॥

वेदानुवचनेनेति प्रथमाश्रमकर्मणाम्।
यज्ञदानक्रियाभ्यां च द्वितीयाश्रमकर्मणाम्॥२४॥

तपसेति पदेनाथ तृतीयाश्रमकर्मणाम्।
अनाशकपदेनाथ त्वष्टग्रासोपयन्त्रितम्॥२५॥

अशनं सूचितं चेति तुरीयाश्रमकर्मणाम्।
वर्णनं याज्ञवल्क्योऽधात् गृही जनकभूपतौ॥२६॥

---

*भूषा-कर्म-किरादि-सनां चान्यत्रात्मने पदात्।

उपदेष्टा गृही शिष्यः कर्मणा सिद्धिमास्थितः ।
इति गीतस्तथाप्यूचुः कर्मत्यागपरामिमाम् ॥२७॥

मृषावादिमते केचित् श्रुतिं क्रीडा कलेरियम् ।
इति सन्दर्शयामासुः रामानुजपथे स्थिताः ॥२८॥

विद्यासहायो वदने हयो नः विद्याप्रसाध्यो गमने हयो व ।
विद्यात्र कर्मापि शफत्रकादि विद्यात् श्रुतं सर्वमथाश्रमार्हम् ॥२९॥

*रङ्गलक्ष्मणप्रत्तयाख्यया शास्त्रसाहितीवल्लभस्सुधीः ।
तत्सभागतः पद्ममालया कर्मणाङ्गिनीं भक्तिमैरिरत् ॥३०॥

***

*इदञ्च २००६ - तमवर्षे श्रीपादुकाविहारसदसि विज्ञप्तम् ।

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ शमदमाद्यधिकरणम्॥

१. स्वाचार्यवन्दनम्।

श्रीतातपादान् प्रणमामि भक्त्या येषां प्रसादान्मम वस्तुतेयम्।
यया सभायां विदुषां प्रवेशः पद्यैश्च भाष्याधिकृतौ विहारः॥

२. सभाध्यक्षवन्दनम्।

शमो दमो वोपरतिस्तितिक्षा समैरिति स्यात् सहितो हि विद्वान्।
नयं त्विति स्थापकमद्य वक्ष्यन् सभापतीन् नौमि समैर्युतान् तैः॥

३. सभ्यवंन्दनम्।

तीर्थर्क्षजातसमतीर्थकुलाभिवन्द्यश्रीवासयोगिसदसीह नमामि सभ्यान्।
गोपालपण्डितवरैरभिकल्पितेऽद्य गोपालदेशिकदयापरिवर्धमाने॥

४. अधिकरणस्थलादि।

विवक्षितोऽयं नय एधते मे शारीरके साधननामभाजि।
अध्याय एवं चरणे चतुर्थे षष्ठो दधानः किल सूत्रमेकम्॥

५. सङ्गतिविशयौ।

विद्वान् गृही स्वाश्रमकर्मजातं यज्ञादि कुर्यात् भजनस्य सिद्ध्यै।
शफत्रकादीव हयस्य यात्रा-सुसाधनस्यैतदपेक्षितं यत्॥

इत्यत्र पूर्वाधिकृतौ कृताच्च सिद्धान्ततस्संशय एष जातः।
शमादिमान् स्यादिति वक्ति शास्त्रं विद्वान् यतोऽन्यत्र परं तथैव।

शमस्तु खानामथ चान्तराणां व्यापाररोधात्मक उच्यतेऽयम्।
दमश्च खानामपि बाह्यकानां कर्माऽथ तद्व्यापृतितो हि साध्यम्॥

६. पूर्वपक्षः।

तस्मात् गृहस्थस्य कथं विधेयं शमादिकं नैव मिथो विरुद्धाः।
एकत्र सान्निध्ययुता भवेयुः गृहिण्यतो नास्य विधेः प्रवृत्तिः॥

७. विचारः।

इत्यत्र पक्षः किल पूर्व एष प्राप्तस्ततस्तत्र विचार इन्धे॥
विधीयमाने ह्यपवादवादः युक्तो न कर्तुं सहसाऽपरीक्ष्य।
वैधेषु कार्येषु निजेन्द्रियाणि व्यापारवन्तीह दधत् गृही स्यात्॥

मुमुक्षुबृन्दस्य यदेव कर्म शरीरयात्रापदवीदवीयः।
काम्यादि व तत् फलशून्यमत्र खानां विहारोपरतिश्च भूयात्॥

इति व्यवस्था विषयानुरूपा कार्या परं तत्र च वासनातः।
शमाद्दमाद्वा च्यवनाभिशङ्का दूरे यतस्तत् किल कर्मजातम्॥

आराधनं तत् परमस्य पुंसः नाम्ना हृषीकेश इति स्तुतस्य।
तस्य प्रसादादथ वासनाऽपि शमादितोऽस्य च्यवनाय नालम्॥

८. निर्णयः॥

तस्माद्गृही स्वाश्रमकर्मजाते श्रुतिस्मृतिभ्यां विहिते नितान्तम्।
व्यापारशीलैरपि चेन्द्रियैस्स्वैः अन्यत्र शान्तैर्भजनं भजेत॥

९. भाष्यान्तरतुलनम्।

भाष्यान्तरे नैव पृथक् कृतोऽयं नयस्त्विदं पूर्वनये द्वितीयम्।
अभाषि सूत्रं च मखादिवाक्ये लडस्ति तस्मान्न विधिर्मखादेः।

स्तुता हि विद्याऽथ तथाऽपि विद्वान् शमादिमान् स्यादिति वक्ति सूत्रम्।
विधिस्तु तत्रेति तदन्तरङ्गं स्यात् साधनं तानि मखादिकानि।
विद्यास्पृहोत्पादनसाधनानि बाह्यानि चेति प्रतिपादितश्च।
यज्ञाद्यवश्यं च शमादिवच्चेत् शङ्का विरोधादुभयोर्भवित्री।
युक्तस्तथाऽपीत्यपि सूत्रखण्डस्तस्मादयं नैव तु सूत्रभावः॥

वैधानि कर्माणि निजाश्रमाय विद्याऽभिनिष्पादनसिद्धये स्युः।
अङ्गत्वबुद्ध्या सकलं च कर्म कुर्यादिति स्थापनमेकतस्तत्॥

अन्येषु कर्मस्वथ नैव सक्तः शान्त्यादियुक्तो भजमान एषः।
भूयादिति स्थापनमन्यतश्च न सङ्करश्शाङ्कर उक्त इन्धे॥

१०. निगमनम्।

*देशिकदर्शनचूडामणिना करुणाकरेण क्लृप्तेयम्।
कृतिरिह बिरुदं दातुः प्रीत्यै गोपालदेशिकाख्यऋषेः॥

***

*इदञ्च २००५-तमवर्षे परवाक्कोट्टै श्रीमदाण्डवन् सदसि विज्ञप्तम्।

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥अथ विहितत्वाधिकरणम्॥

१. मङ्गलाचरणम्।

सहितं विबुधैः पादूसदसीह सभापतिं प्रणम्य।
विहितत्त्वाधिकृतौ वाग्विहृतिं तनवै गुरोः प्रसादेन ॥१॥

२. सङ्गतिः।

विद्याङ्गभूतानि यदाश्रमाणां कर्माणि वैधानि दृढं मुमुक्षोः।
भूयासुरित्युक्तमतो विचारोऽप्यनुष्ठितावन्यजनस्य तेषाम्॥२॥

३. मध्ये किमिति अधिकरणयुगप्रवेशः?

शमादिकानां तु विधौ स्थिते सा यज्ञाद्यपेक्षा कुशलेन हीना।
आहारशास्त्रं तथेति बुद्धेरपोहनार्थं नययुग्ममासीत्॥३॥

अनन्तरं किं विदुषां तु तेषां अनुष्ठितिःस्वाश्रमकर्मणां सा।
विद्याप्तये स्वाश्रमसिद्धये च वारद्वयं स्यादिति तद्विचारः ॥४॥

४. टीकादर्शितः फलफलिभावः।

विद्यादवीयस्यपि कर्मजातं तदाश्रमाङ्गत्वधिया यदि स्यात्।
नित्यानि भूयासुरथाश्रमाङ्गकर्माणि तानीति फलस्य सिद्धिः ॥५॥

कर्मान्तरतया चैषां विनियोगापृथक्तया।
नित्यानित्यसुसंयोगो विरोधः फलति ध्रुवम्॥६॥

अमुमुक्षोरतस्तानि नाऽनुष्ठेयानि सांप्रतम्।
केवलाश्रमधर्माणि कर्माणीति फलेन्मतम्॥७॥

कर्मान्तरत्वं यदि नेष्यतेऽथ शेषत्वसंज्ञापकचोदनायाः।
पार्थक्यसिद्धिर्भविता ततश्च न सङ्करो नित्यतदन्ययोःस्यात्॥८॥

५. टीकायामाक्षिप्तः पूर्वतन्त्रन्यायः।

अप्पैय्यक्लृप्ते नयरश्मिमालाग्रन्थेऽत्र रामानुजभाष्यमार्गे।
यः खादिरो यूप इति प्रकृत्य प्रोक्तोऽथ रस्यो विषयस्तु कश्चित्॥९॥

सभापतेर्नाम यदीयमेव तेनाऽत्र सर्वज्ञमहाशयेन।
टीकाकृदाक्षिप्त इतीरितोऽयं काण्डेऽग्निमे न्याय इहोच्यतेऽद्य॥१०॥

दध्ना स्यादग्निहोत्रप्रकरणमधि तद्धोम इत्यस्ति वाक्यम्
यो वा स्यादिन्द्रियार्थी स तु दधि जुहुयादित्यपि श्रूयतेऽत्र।
क्रत्वर्थत्वञ्च दध्नः कथितमपि तथा पूरुषार्थत्वमेवं
वाक्ये संयोगवाच्ये पृथगिह भवतश्चैकमेवं द्वयेद्धम्॥११॥

ज्योतिष्टोमेन कुर्याद्यजनमिह जनःस्वर्गकामस्त्वितीर्य
यागोऽयं को भवेदित्यथ नयति शमं संशयं तत्र जातम्।
सोमेनाऽयं यजेतेत्यपि पठितमिदं शेषमेवं तथाऽत्र
स्यान्नो दध्नस्स्वरूपं न मखवदिह तद्वेदमात्रैकवेद्यम्॥१२॥

मीमांसापादुकामार्गे भवेतां कल्पिते मया।
पादुकापरिषद्विद्वद्धृदये स्रग्धरे इमे॥१३॥

दध्नः परं स्यादुभयत्वमेवं काम्यत्वनित्यत्वमितीरितं तत्।
तथाऽऽश्रमार्हं सममत्र कर्म विद्याङ्गमेवञ्च निजाश्रमाङ्गम्॥१४॥

६. श्रीभाष्यरीत्या प्रथमसूत्रार्थः।

कर्माणि विद्याङ्गतयेरितानि निजाश्रमार्हाण्यमुमुक्षुभिश्च।
अनुष्ठितव्यानि यतो निमित्तं तज्जीवितं तेष्विति नित्यतैषाम्॥१५॥

७. श्रीभाष्यरीत्या द्वितीयसूत्रार्थः।

कर्माऽथ विद्याजनने सहायं करोति यत्तत् सहकारिताऽस्य।
प्रयोजके जाग्रति तत्प्रमाणे नित्यत्वकाम्यत्वरणं कुतःस्यात्?॥१६॥

जीवनमधिकृत्योक्तं स्वर्गायैकं यथाऽग्निहोत्रं स्यात्।
उभयार्थं तद्वदिदं कर्मेत्यत्राऽपि को विरोधस्स्यात्?॥१७॥

काम्यो नैमित्तिको वाऽपि नित्यं कर्माऽधिकृत्य वै।
निविशेतेति नीत्याऽत्र प्रयोगे न भिदा भवेत्॥१८॥

काम्यं नित्यविधेरेतत् बाधमानन्तु केवलम्।
प्रयोजकत्वमात्रं तु निविशेतेति न क्षतिः॥१९॥

राजन्यवैश्यौ यदि सोमभक्षकामौ प्रदद्यात्तिमिनीर्वटस्य।
संपिष्य चोन्मृज्य च दध्नि भक्षं न सोममित्यस्ति विधिस्तु ताभ्याम्॥२०॥

विकृत्यैवं निवेशेन न सोमाऽनित्यता यथा।
तथा विद्याङ्गतायाश्च कर्मणां नित्यताऽक्षता॥२१॥

८. टीकायामत्र भास्करपक्षविमर्शनम्।

सहकारिपदं सूत्रे विवृण्वन् भास्करोऽवदत्।
समं समुच्चयं विद्याकर्मणोर्मोक्षसाधनम्॥२२॥

सहकारिपदेनाऽस्य समत्वं कथमिष्यते।
अङ्गभावः परं युक्तः प्रमाणानि दृढं तथा॥२३॥

नान्यः पन्थेति घोषश्च श्रुतौ जृम्भति तत् कथम्? ।
तत्प्रतीपपथे सूत्रव्याख्यानं क्रियतेऽपटु॥२४॥

९. श्रीभाष्यरीत्या तृतीयसूत्रार्थः ।

मासाग्निहोत्रं वदता च वेदवाक्येन भिन्नं प्रथिताग्निहोत्रात् ।
संज्ञायते कर्म तथा प्रमाणं नैवास्ति कर्मान्तरता कथं स्यात्? ॥२५॥

स्वरूपे न भिदा वेदे नाम्नि यज्ञमुखान्यथ ।
सर्वथाऽपि तु तान्येव कर्माण्युभयथा ततः ॥२६॥

१०. टीकायामत्र शङ्करपक्षविमर्शनम् ।

उभयेति पदेनोचे सूत्रकारश्श्रुतिस्मृती ।
इति शङ्करभाष्योक्तेः वरं श्रीभाष्यभाषितम् ॥२७॥

उभयेति पदेनाऽत्र श्रुती द्वेधा स्थिति इति ।
समानबलयोरत्र कथनं सङ्गतं यतः ॥२८॥

११. श्रीभाष्यरीत्या तुरीयसूत्रार्थः ।

दिने दिने वेदजपादियज्ञाः अनुष्ठिताश्चित्तविशुद्धये स्युः ।
प्रकृष्यमाणा तदुदेति विद्या कर्माणि तान्येव तथोभयत्र ॥२९॥

१२. श्रीभाष्यार्थदर्पणे विचारविशेषः ।

इह सूत्रचतुष्टयमस्ति नये प्रथमेन तथा चरमेण परम् ।
चरितार्थतया भविता तु वृथा ननु सूत्रयुगं नयमध्यगतम् ॥३०॥

नैवं यतस्सूत्रयुगेन भेदः कर्मस्वरूपे न ततश्च भूयात् ।
तन्त्रेण नित्यस्य तथैव चेति काम्यस्य चानुष्ठितिरत्र सिद्धा ॥३१॥

दध्यादीनां तु काण्डे प्रथम इह यतो नित्यता काम्यता च
प्रोक्ता तस्माद्घटेते कथमिह पुनः स्वाश्रमार्हेषु चैषु।
तत्त्वे शङ्काविचारौ दधिपरवचने निश्चितस्तात्पदार्थः
सामान्योक्त्या मखानां यदिह विविदिषोत्पत्तिरुक्तेति चिन्ता ॥३२॥

१३. ॥निगमनम्।

विहितत्त्वाधिकृतौ ये निहिता अर्था मनागिवैवोक्ताः ।
महिताः विबुधाः कृपया न हि तान् गणयन्तु मेऽत्र वाग्दोषान् ॥३३॥

रङ्गलक्ष्मणप्रत्तया ज्वलन् शास्त्रसाहितीवल्लभाख्यया।
तत्सभागतः कर्मणाञ्जगौ नित्यतां तथा भक्तिशेषताम् ॥

***

* इदञ्च २००७- तम वर्षे पादुकाविहारसदसि विज्ञप्तम् ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥श्रीनिधये वात्स्य श्रीनिवासराघवाचार्यमहादेशिकाय नमः ॥

॥ करुणात्रिवेणी ॥

तत्र संस्कृतवाङ्मयभूतम्

॥ गङ्गास्रोतः ॥

तत्र तृतीयो विभागः

॥३. इतिहासपुराणपरप्रबन्धाः ॥

तत्र

॥१. श्रीरामायणयथावस्थिततात्पर्यसङ्ग्रहः ॥

श्रीवासराघवपदोदितधूलिरेषः वाल्मीकिपद्मजनितोदितवागहल्याम् ।
तादृक्-शतक्रतु-समाकुलितां धिनोति न्यायप्रवीणमहितां पुनरेव साध्वीम् ॥१ ॥

तात्पर्यनिर्णयकृते कृतिनः पुमांसः लिङ्गानि षट् किल सदा शरणं भजन्ति ।
रामेऽपि लिङ्गरततां वदतीह योऽसौ लिङ्गानि तत्र तु परं शरणं न वृङ्क्ते॥ २ ॥

वेदान्तदेशिककृते ह्यभयप्रदानसारे च रामचरितस्य स सार उक्तः ।
लिङ्गैश्च षड्भिरतिविस्तरतस्स एव तात्पर्यनिर्णयविधौ शरणं बुधानाम् ॥३ ॥

ध्वन्यध्वनीति बहुधा वदता परं सा तत्रोचिता सरणिराद्रियते कथं न ।
मीमांसमानपदमेष चरन्कवीनां काव्येषु हन्त! कथमत्र पराङ्मुखोऽस्मिन् ॥४ ॥

ध्वन्यर्थतः प्रपदनं पुरुषोत्तमे नः कैङ्कर्यराज्यफलदं किल वर्णितं यत् ।
चक्षुर्निमील्य नहि पश्यति चेद्भवान् तत् मोहाञ्जनस्य महिमा महितोऽयमेव ॥५ ॥

आरण्यकाण्डमधि वर्णितमस्ति सर्गे त्वेकादशे मुनिजनैरपि सिद्धपुंभिः।
देवा उपासत उपेत्य मुनिं सदेति कुम्भीसुतं कबलितासुरपुङ्गवं तम् ॥६॥

सर्गेऽनुयायिनि तथा रघुपुङ्गवेन स्थानानि सप्तदश निर्जरपङ्क्तिगानाम्।
ब्रह्माग्निविष्णुशतमन्युभगादिकानां दृष्टानि सप्तदशवर्णविदीडितानाम् ॥७॥

यद्यायजूकमहितः कलशीसुतस्तत् हुत्वाऽग्निमस्य मुनिरेष ददौ च भक्तम्।
इत्यादि वर्णनबलात् परमत्र सेव्याः देवा इमे न च मुनेरथ सेवकास्ते ॥८॥

तत् पूर्वसर्गकथिता ननु केचिदन्ये तत्सेवका इति वरः किल मार्ग आस्ते।
रुद्रस्तु तामस इति प्रददौ न चैष स्थानं तु सप्तदशपूज्यसुरेषु तस्मै ॥९॥

तस्मान्मखिन्! स्फुटमिदं भजतां स रुद्रः तत्सेवकेषु हि सुरेषु पदं स्वकोणे ॥१०॥

श्रीराजसूयमखमाचरितुं प्रवृत्तः वाचं निशम्य भरतस्य ततो निवृत्तः।
तस्यानुजाच्च हयमेधमखप्रभावं आख्यानपूर्वकमथ श्रुतवान् स रामः ॥११॥

मच्चित्ततुष्टिकर एष मखोत्तमो मां तद्वाजिमेधमखतः प्रयता यजध्वम्।
नारायणेन कथितं यदिदं तदुक्तौ काव्येऽत्र वर्णितमपि स्फुटमस्ति दृश्यम् ॥१२॥

रामस्तदुक्तमखिलं ह्यविगानपूर्वं श्रुत्वा ततश्च चरितान्तरमाशशंस।
यस्मिंस्तु शम्भुजनितादपि शोकवेगादुत्तारणं तुरगमेधमखेन चोक्तम् ॥१३॥

यज्ञेन तोषणमुमारमणस्य चाऽत्र मामेव वाजिमखतो यजतां स वज्री।
तं पालयामि वचनं त्विति वैष्णवं तत् तत्रोदिदं च विशदं परिशीलनीयम् ॥१४॥

प्रारम्भकाण्डपठितो हयमेध एकः श्रीरामताकलितः चरमेऽत्र काण्डे।
रामाश्वमेधचरितश्च विभाति तत्र भागाय सर्वविबुधाः प्रथमं समेताः ॥१५॥

नारायणस्तु चरमं श्रुतिवर्णितेन मार्गेण तस्य परता ध्वनिता च काव्ये।
श्रीकौशिकोऽपि रघुनाथगुरुर्यदाऽह श्रीलक्ष्मणस्य वचने मधुवैरिवाक्यम् ॥१६॥

रामाभ्युपेतमिति सर्वमिदञ्चपश्येः तद्वाजिमेधविधिना परिपूज्यमानः।
लक्ष्मीपतिस्त्विति न संशयलेशगन्धः वाजीष्टिनीतिसरणेरपि सिद्धमेतत् ॥१७॥

वेदे परं तु बहुशः किल यज्ञ एव विष्णुस्त्वितीरितमयं हयमेधयज्ञः।
रुद्राहुतेरुपरि कर्मणि तत्र तत्र स्पृष्ट्वाप एव समनन्तरकर्म कार्यम् ॥१८॥

एवं विमृश्य रघुपुङ्ववाक्यभावं श्रुत्वा वचोऽस्य मुनिभिर्भववन्दनञ्च।
सिक्तं यथा भवति मूलमगस्य शाखास्सर्वा भवन्ति सरसा अथ पुष्टिपूर्णाः ॥१९॥

इत्यादिदर्शनपरं त्विति बालकोऽपि शक्नोति सारमिह वेत्तुमितीदमास्ताम्।
तीर्थोऽपि सर्वसुरनन्दथुसिद्धिलभ्यां ब्रूते प्रतुष्टिमथ नैव भवस्य पूजाम् ॥२०॥

शत्रुघ्नमाह भवशूलधरे मधोस्त्वं पुत्रे न मोचय ममाऽस्त्रमिति प्रभुर्यत्।
सत्यां विधातुमिह भृत्यजनस्य वाचं तीर्थोऽपि भावमिति वर्णयति स्फुटं नः ॥२१॥

रुद्रस्सनन्दिरिति पाठमतिप्रसिद्धं रुद्रस्सविष्णुरिति हन्त! पठन् स्वयं यत्।
आकाशपद्ममकरन्दमुदाऽतितृप्तः विष्णुः श्रियेति पठितं स्मरतात् कथं वा ॥२२॥

पूर्वं प्रसादमकरोदिति रामवाक्यं रामेश्वराख्यशिवलिङ्गकथापरञ्च।
नेतुं पुराणवचनैर्यतमान एषः वेदोपबृंहणबलाबलतो निरस्तः ॥२३॥

कूर्मादितामसपुराणवचोबलेन रामस्य रुद्रभजनं भवताच्च सिद्धम्।
नम्यस्स्वयं नमति रुद्रमुखाँश्च देवान् मायाविहाररसिकः परमः पुमान्नः ॥२४॥

तेनैव रुद्रपरता न भवेत्तु सिद्धा तेषामपि श्रुतिशिरःसरणिप्रतीपा।
रामायणस्य च कथं भवतीदमेव तात्पर्यमित्यथ महत् खलु हास्यमेतत् ॥२५॥

सूर्यस्तुतिश्च कलशोदितवर्णिता या प्रक्षिप्तसर्ग इति तां सुधियो वदन्ति।
वाल्मीकिवाक्यमिति वा भवतात्तथाऽपि सूर्यान्तरस्तु भगवान् ननु वारिजाक्षः ॥२६॥

सङ्कल्प एव हि महान् परमेश्वरस्य हेतुर्जटायुदनुसूनुकपीश्वरणाम्।
सीतापहारविषयस्फुटवागभावे इत्यादि मूलरहिता तव कल्पनेयम्॥२७॥

नारायणे श्रुतिशतैः परमेश्वरत्वं वेदोपबृंहणपरैर्मुनिभिश्च गीतम्।
अङ्गीकृतं यदि तदा परमेश्वरस्य सङ्कल्पहेतुवचनं तव साधु भूयात्॥२८॥

गङ्गा पपात हरमूर्धनि तेन साऽभूत् पुण्येति कल्पनमिदं खलु चित्रमेव।
हस्तेन किंन्विति पदेन परं शिवस्तां धर्तुं न यत्नमकरोदिति पश्यतां नः॥२९॥

पूजार्हदेवपदतीर्थमिति प्रणम्रः मूर्ध्ना दधार परया सलिलं स भक्त्या।
देवादयोऽपि वसुधातलमाप्य गङ्गास्नाता इति प्रथितमस्ति किलात्र मूले॥३०॥

अन्याङ्गसङ्गकलुषे तु जले महान्तः स्पृष्टेऽशुचित्वमतयः किल शास्त्रतो ये।
ते चाऽपि विष्णुपदतीर्थधिया स्पृशन्ति तोयं भवाङ्गपतितं त्विति सूचितं तत्॥३१॥

यो नन्दिनं वदति तं पवमानसूनुं पौलस्त्यभीषणकृतेऽनृतवादिनश्च।
सीतासमाश्वसनसद्विनयाभिरामवाचस्तु सारमपि वेत्तुमयं न शक्तः॥३२॥

वित्रासनं यदि भवेद्धनुभूषलक्ष्यं शक्राम्बुजोदितशिवैस्सह माधवश्च।
किं नाह मारुतिरिरिति स्वधियाऽभिवीक्ष्य पश्यन्तु दीक्षितमुधाग्रहणं बुधेन्द्राः॥३३॥

यद्रोषरामवचनं त्विति तन्न सत्यं ब्रूषे पराजयमहो हरिणा शिवस्य।
सत्येऽपि तत् शिववरादिति मन्यसे वा द्वेधाऽपि वेदवचसा विहता कथा ते॥३४॥

नारायणे त्वयि न मृष्यति वैदिकः कः इत्याह यामुनमुनिस्तदिमे वयं स्मः।
इत्येव दीर्घशरणागतिवेदभूततात्पर्यमित्यहह किञ्चिदिमे लिखन्ति॥३५॥

सीतापतिश्श्रुतिशिरस्सु परः प्रगीतः तत्पादयोः प्रपदनं परमं हितं नः।
कैङ्कर्यराज्यसमवाप्तिरियं पुमर्थः प्राचेतसस्य वचसामिति सार एषः॥३६॥

प्राचेतसस्य परमस्य कवेर्वचस्सु भावं निजं तु बहुधाऽभिनिवेशमोहात्।
संन्यस्य पुस्तकचयान् प्रलिखद्भ्य एवं श्रीरामभद्र!
करुणा तव पातु भक्तान्॥३७॥

श्रीवासराघवकवेः करुणाकटाक्षात् वेदान्तयुग्मविहृतौ पटुतां गतेन।
प्राचार्यजन्मदिनमङ्गलजुष्टकाले पद्मामुखे धनुषि काव्यमिदं प्रतेने॥३८॥

इत्यदोहि प्रबन्धः॥

***

श्रीमदप्पैयदीक्षितैः श्रीमद्रामायणसारसङ्ग्रहः इति शीर्षकः पद्यात्मकः ग्रन्थः लिखितः यत्र श्रीमद्रामायणे शिवपारम्यमेव प्रोक्तमिति वर्णितम्। तदनुपपत्तिप्रदर्शकपद्यात्मकग्रन्थरचनायै श्रीवैष्णवसुदर्शनपत्राधिपप्रार्थितैः ग्रन्थकर्त्राचार्यपादैः आदिष्टेन ग्रन्थकर्त्रा अयं प्रबन्धः श्रीमुखवर्षे मार्गशीर्षमासि व्यलेखि। प्राचार्यपादश्रीनक्षत्रदिने अर्थात् श्रीमुखधनुषि उत्तरप्रोष्ठपदायां पूर्तिं नीतश्च। तदिदमवसानपद्ये सूचितम्॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥श्रीनिधये वात्स्य श्रीनिवासराघवाचार्यमहादेशिकाय नमः ॥

॥२. नाथगुणादर्शः ॥

(श्रीमद्भागवतमहापुराणे प्रतिस्कन्धं प्रकटितेषु भगवतो गुणविशेषेषु प्रधानभूतानां गुणानां आदर्शः।ः

१. प्रथमस्कन्धे

त्यक्त्वापि स्वप्रतिज्ञां निजजननिगमं पालयेत् भक्तिवश्यः

२. द्वितीयस्कन्धे

ब्रह्मद्वारा पुराणप्रवचनमपि तत् लोकभद्राय कुर्यात्।

३. तृतीयस्कन्धे

छिन्द्यात् बाहुं स्वकीयं निजपदरतिमत्प्रातिकूल्ये प्रवृत्तं

४. चतुर्थस्कन्धे

अर्भं कर्तुं कवीन्द्रं प्रभवति कृपया कम्बुसंस्पर्शतोऽपि ॥१॥

५. पञ्चमस्कन्धे

योगाद्भ्रष्टस्य रक्षां कलयति बहुधाऽऽमुक्ति तस्मिन् रतस्सन्

६. षष्ठस्कन्धे

भक्तं भक्तेऽपराद्धं ह्यपि निजकृपया शीघ्रमेवाऽभिरक्षेत्।

७. सप्तमस्कन्धे

सत्योक्तीन्नैजभृत्यान् कलयति सततं चित्रसंस्थानरम्यः

८. अष्टमस्कन्धे

भिक्षुत्वं चाऽपि धृत्वा शरणमुपगतान् पालयेत् श्रीपतिस्सन् ॥२ ॥

९. नवमस्कनधे

भक्तानां रक्षणं तत् तदविदितपथे जागरूको विदध्यात्

१०. दशमस्कन्धे

भक्तानामन्वयाढ्यं दधि घृतमिति तत् वस्तु सर्वं तदिष्टम् ।

११. एकादशस्कन्धे

पादू दत्वोपदेशं निजचरणरतौ विस्तरेणैष दद्यात्

१२. द्वादशस्कन्धे

लोकान् सर्वान् शिशुस्सन्नघटितघटको दर्शयेत् स्वोदरेऽसौ ॥३ ॥

निगमनम्

इत्थं कीरास्यलब्धात् हरिगुणजलधेः रत्नभूतान्यमूनि
तद्भक्तप्रीतयेऽदात् कविकुलनृपतेः श्रीनिधेरात्मजातः ।
तच्छ्रीपादूदपानात् प्रथितमतिरसौ वेदवेदान्तवेदी
*विज्ञानं विश्वविद्यास्वपि भजत इति श्लाघितः पण्डितेन्द्रैः ॥

***

---

* १९७६ तमवर्षे विजयदशमीदिने श्रीमहामहिमोपाध्याय श्रीपद्मविभूषण श्रीमदण्णङ्गराचार्यैः ग्रन्थकर्त्रे कृतमाशासनं अत्र सूचितम् । तेषां पद्यमयमाशासनमित्थम्:-

*सर्वतोमुखविज्ञानसमृद्धाय मनीषिणे ।
करुणाकरनाम्नेऽस्तु नित्यश्रीर्नित्यमङ्गलम् ॥

॥ श्रीः ॥

॥श्रीमते रामानुजाय नमः ॥

॥ करुणात्रिवेणी ॥

तत्र संस्कृतवाङ्मयभूतम्

॥ गङ्गास्रोतः ॥

तत्र चतुर्थो विभागः

॥४. व्याख्यानप्रबन्धाः

श्रीमदाशुकविसार्वभौमश्रीनिधिस्वामिविरचितश्रीदेवनाथार्य शताभिषेकपञ्चकस्य व्याख्यानभूता ॥

॥ पञ्चकप्रकाशिका ॥

॥ मूलम् ॥

कम्बूत्फुल्लकपोलबालककृतस्तोत्रावलीतोषितः
जम्बूद्वीपकृतावतारनिवहप्राप्तातिकीर्त्युज्ज्वलः ।
अम्बूत्पन्नसमानलोचनयुगश्रीशश्रीनिवासो विभुः
जम्बूपाकनिवासजातपुलको देवस्तनोतु श्रियम् ॥

॥व्याख्यानम् ॥

श्रीदेवनाथार्यशताभिषेकं "विल्लूर" कवीन्दुः कवयांबभूव ।
तद्पद्यभावांस्तनयस्तदीयः सन्दर्शयेऽहं रसिकौघतुष्ट्यै ॥

तत्रभवन्तःश्रीतातपदाः विख्यातविभवानां पण्डितप्रकाण्डानां श्रीमदय्यादेवनाथाचार्याणां शताभिषेकोत्सवं वर्णयितुं आरब्धाः आदौ श्रीदेवनाथाचार्याणां श्रीग्रामे विराजमानं देवं स्तुवन्तो मङ्गलमाशास्ते । "मङ्गलाचारयुक्तानां" इति प्रमाणसहस्रसत्संप्रदायानुष्ठानसिद्धमिदं मङ्गलाशासनम् ॥

कंब्विति ।। कं इति सुखवाचकाक्षरस्य आदौ प्रयोगः एतत्प्रबन्धानुभवसुख-द्योतकः । कं इति वारिवाचकः शब्दः । स च रसानां अपरिमितः प्रवाहः अस्ति अस्मिन् प्रबन्धे इति दर्शनाय । क इति ब्रह्मणो नाम । तेन भारतीपतेरिव प्रबन्धसर्गोऽयं भारतीमुदे च इति प्रदर्शनम् ।।

कम्बुशब्दप्रयोगेण प्रबन्धारम्भः क्रियते । इदश्च विद्याकोशभूतः प्रबन्धनायकः इति द्योतनार्थम् । ''विद्याकोशश्शङ्खः ''इति भगवच्छास्त्रे अस्त्रभूषणाध्याये च दर्शनात् ।।

मगणेन प्रबन्धारम्भः । मगणः गुरुत्रयमण्डितः । गुरु (मुनि) त्रयसंवर्धितस्य संप्रदायस्य महापुरुषो विषयः प्रबन्धस्यास्य । अतः गुरुत्रयारब्धेन शार्दूलविक्रीडितेन प्रबन्धारम्भः । भयसो भागस्य च क्लृप्तिः ।।

कम्बूत्फुल्लकपोलबालकः- औत्तानापादिः ध्रुवः । योऽसावतिशैशव एव नारदोपदिष्टमन्त्रावृत्तितः भगवन्तं प्रत्यक्षीचक्रे। पुरतस्स्थिते च पुरुषोत्तमे स्तोतु-मिच्छुः अनभ्यास्ताक्षरत्वात् स्वस्य, अतीवदूयमानमानसो बभूव । तद्विज्ञाय सर्वज्ञः प्रभुस्तं कपोलदेशे स्वशङ्खेन पशपर्श। स च ध्रुवः ''योऽन्तः प्रविश्य'' इत्यादि-द्वादशभिश्श्लोकैस्तं तुष्टावेति भागवते कथा। सेयं कथा पुराणरत्नेऽपि प्रथमांशे द्वादशेऽध्याये उपात्ता। ''पृथुकवदनशङ्खस्पर्शरीत्या'' इति श्रीदेशिकचरणैरपि पादुकासहस्रावसाने आम्रेडिता । तथा च **कम्बूत्फुल्लकपोलबालककृतस्तोत्रावली-तोषितः** इति भगवतः श्रीनिवासस्य विशेषणम् । यथा ध्रुवे अपरिमितां निजस्वरूप-रूपगुणवर्णनचातुरीं दत्वा, तत्कृतां स्तुतिं श्रुत्वा संमोदतेस्म तथा ममाऽपि प्रबन्धरचनायां शक्तिं दद्यात् । मत्कृतप्रबन्धेन च तुष्टो भूयादिति चाऽभिप्रायः ।

अत्र प्रबन्धारम्भे ध्रुवचरितसूचनस्येदं प्रयोजनम् । ''सर्वेषामुपरि स्थानं तव दत्तं मया ध्रुव!'' इति अस्मिन् लोकेऽपरिमितं भोगं संपूर्णमायुश्च दत्वा परंपरया ध्रुवप्रार्थितं ददौ हरिरिति हि ध्रुवचरितम्। तद्वत् प्रबन्धनायके अधुना शताभिषेकोत्सववति तत्सेवकेषु अस्मासु च प्रसीदतु भगवानिति ।

अम्बूद्वीपकृतावतारनिवहप्रामातिकीर्त्युज्ज्वलः- ''स उ श्रेयान् भवति जायमानः'' इत्याम्नायैरेव उक्तरीत्या अस्मदीये द्वीपे कृतैरनेकैरवतारैः प्राचेतस-पराशर-पाराशर्य-तत्तनयादिभिरनेकैः कविभिः उपश्लोकितविभवः खलु भगवान् ।।

अत्र जम्बूद्वीपकृतावताराणां कथनं प्रबन्धनायकोऽपि भगवतः कीर्तिवर्धकावतारेष्वन्यतमःइत्यभिप्रेत्य। ''यस्याऽसौ भजते कदाचिजहद्भूमा स्वयं भूमिकां'' इति हि श्रीचरणान् प्रतिशिष्याणामनुसन्धानक्रमःस्यात्॥

अम्बूत्पन्नसमानलोचनयुगश्रीः- परदेवतात्वसूचकं श्रुतिवर्णितं ''गाम्भीराम्भ'' इति गम्भीरगीर्भिः श्रीभाष्यकारैः वेदार्थसङ्ग्रहे प्रदर्शितं तत्प्रियभागिनेयपौत्रैरस्मत्कुलकूटस्थैः ''कपिस्त्वादित्यः ''इत्यारम्भ सप्तश्लोक्या तत्त्वसारे विवृतं पुण्डरीकाक्षत्वमुपात्ते। इदश्च साभिप्रायम्। अस्य श्रीदेवनाथाचार्यस्य शताभिषेकदर्शनत एव सफलत्वं अक्ष्णोर्ममाऽपि'' इति भगवदाशयः इति भावः॥

विभुः सर्वत्रवासी। सर्वत्र वसन्नपि विशिष्य एतादृश-महनीय-शताभिषेकोत्सव-रङ्ग-भूत-श्रीग्रामेऽपि स्थितोऽस्मीत्येव संमोदो भगवत इति कृत्वा तुरीयपादे **जम्बूपाकनिवासजातपुलकः** इति विशेषणं धत्ते। ''ईदृशवैभवशाली देवः श्रीनिवासनामा श्रियं तनोतु'' इति। नावल्पाकः इति श्रीग्रामस्य नाम। नावल् इति द्रामिड्यां जम्ब्वाः व्यवहारः॥

तदित्थमस्मिन् श्लोके परिकरालङ्कारः। ''अलङ्कारः परिकरः साभिप्राये विशेषणे''। देवशब्दप्रयोगेण श्रीदेवनाथार्यनाम्नस्सूचनात् मुद्रालङ्कारश्च। ''सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः'' ॥

कम्बू, जम्बू, अम्बू, जम्बू- इति प्रतिपादं वर्णानुवृत्तैः पादानुप्रासालङ्कारश्च। ''वर्णानुवृत्तिरनुप्रासः पादेषु'' इत्याचार्यदण्डी।

श्लेषालङ्कारोऽप्यस्मिन् श्लोके। देवशब्देन श्रीदेवनाथाचार्यस्य ग्रहणम्। ''नामोक्तावर्धोक्तिरपि पूर्णोक्तिकार्यकरी''इति न्यायात्। ध्रुवस्तुतिततितोषितोऽसौ, तस्याः गम्भीरतया रमणीयतया विषयवैलक्षण्याञ्च। ध्रुवस्तुतिरुपलक्षणं तादृशभगवत्स्तुतीनाम्। **जम्बूद्वीपकृतावतारनिवहैः** प्राप्ता या अतिकीर्तिः तद्वदुज्जवलः तथा च भगवत्कीर्तिवदुज्ज्वलः इति **जम्बूद्वीपकृतावतारनिवहप्राप्तातिकीर्त्युज्जवलः** इति यावत्। तृतीयपादे **अम्बूत्पन्नसमानलोचनयुगश्रीश्श्रीनिवासः** इत्येकं पदम्। तदा ''पुण्डरीकाक्षः, श्रियः श्रीः ''इति वर्णितो यो भगवान् तस्य निवासभूतः श्रीदेवनाथार्यः यतस्सदा तं भगवन्तमसौ स्वहृदयकुहरे सदा ध्यायति

इत्यर्थः। विभुः स्वामी। जम्बूपाकनिवासजातपुलकः- "श्रीमदण्णायार्य महादेशिकादि-महतां पादरेणुभूते श्रीग्रामे एव वसेयं, नाऽन्यत्र कस्यचिद्धेतोरपि गच्छेयं" इति दृढसङ्कल्पोऽयं देवनाथसुधीरितीदं सार्वजनीनम्। प्रबन्धावसाने पठिष्यति च कविः-

न्य्याय्यान्मार्गादीषदप्यच्युतो यः
रय्या नेतुं यस्य चेतो न शक्यम्।
"अय्या" स्वामी स्वाश्रमो ब्रह्मवादी
मय्याऽऽनन्द्यो भातु सानुग्रहोऽयम्॥इति च।

रय्या इत्यत्र "रय्या सहस्रपोषसेमौ स्तामनपेक्षितौ" इति श्रुतिप्रोक्तरीत्या "अर्थेन" इथ्यर्थः। स्वाश्रमः- तुरीययुगेऽपि श्रेष्ठत्वेन मुनिभिः प्रशंसितः, स्वनुष्ठितः, सर्वोपकारक्षमः गृहस्थाश्रमः अस्येति असौ स्वाश्रमः इति ज्ञेयम्॥ ईदृशवैभवशाली प्रबन्धनायकस्तनोतु श्रियं इति यावत्॥

एवं प्रथमः श्लोकः श्लेषालङ्कारवान् आराध्यारधकौ तन्त्रेण वर्णयति॥

॥इति प्रथमः श्लोकः॥

॥अथ द्वितीयः श्लोकः॥

(अवतारिका) अथ द्वितीयेन मुद्रालङ्कारतः उत्सवकालं निर्दिश्य स्तौति प्रबन्धनायकम्। प्रथमेन उत्सवदेशः अनेन उत्सवकालश्च वर्णितौ इति चमत्कृतिः॥ श्लोकश्चः-

कोऽद्राक्षीन्नलभामिनीं विरहितां मातुर्भगिन्या गृहे?
वाल्मीकिश्शुचिराततान स च किं? कुत्र स्थितस्सुन्दरः?।
किं तेने स दयारसार्द्रहृदयो देवार्थमंभोनिधौ?
यः प्रश्नोत्तरमध्यवर्णघटितस्तस्मै नमस्कुर्महे।।

क इति। अयं च श्रीशताभिषेकमहोत्सवः नलसंवत्सरे कर्कटकमासि आर्द्रानक्षत्रे समुल्लसति। अयं विषयः मुद्रालङ्कारतः अस्मिन् श्लोके कथ्यते। नलभामिनीत्यत्र नलसंवत्सरस्सूचितः। शुचिराततान इत्यत्र शुचिशब्दः मासं सूचयति। "मधुश्च

माधवश्च वासन्तिकावृतू, शुक्रश्च शुचिश्च ग्रैष्मावृतू'' इति वेदपुरुषोऽधीते। ''रसार्द्रहृदयः इत्यत्र आर्द्रानक्षत्रस्य सूचनम्तदित्थं ''सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः'' इति प्रकृतार्थपरैः पदैः इति रीत्या नलकर्कटकार्द्रा'' सूचिता ॥ प्रकृतपदाना-मर्थोऽधुना वर्ण्यते ॥

कविः चतुरः प्रश्नान् धत्ते। सर्वत्र वर्णत्रयपरिमितं उत्तरमालोचनीयम्। तेषां चोत्तराणां मध्यवर्णैः काव्यपुरुषस्य नामधेयं लभ्यते इति चमत्कारः ॥

''कोऽद्राक्षीन्नलभामिनीं विरहितां मातुर्भगिन्या गृहे?'' इति प्रथमः प्रश्नः. श्रीमति महाभारते वनपर्वणि नलोपाख्याने एषा कथा वर्णिता। अर्धरात्रे अरण्ये कलिपुरुषचोदितेन नलेन परित्यक्ता तद्भामिनी दमयन्ती बहुविधक्लेशानन्तरं स्वमातुर्भगिन्याः गृहं प्राप्तवती। तत्र च तया अज्ञातैव तद्गृहे ब्राह्मणानां परिचारकर्मणि नियुज्यमानाऽऽसीत्। तदवसरे अज्ञातवृत्तान्तौ स्वसुतजामातारौ अन्वेष्टुं बहून् नानादिक्षु प्रेषितवान् दमयन्तीपिता। तेषामन्यतमस्सुदेवनामा दमयन्त्याः मातुर्भगिन्याः गृहं प्राप्तः तत्र भोजने परिचरन्तीं दमयन्तीं अवबुद्धवान्। तदस्य प्रश्नस्य त्रिवर्णमुत्तरं ''सुदेव'' इति। तत्र मध्यमं अक्षरं **''दे''** इति इदं ग्राह्यम् ॥

प्रश्ने नलचरित्रसूचनं नलवदयं काव्यपुरुषोऽपि पुण्यश्लोकः, प्रतिदिनं प्रातरनुसन्धेयनामधेयः, ''संभाष्य पुण्यकृतो मनसा ध्यायेत्'' इति परममुनिभिः प्रशंसनीयविभवः, अस्य च ''कीर्तनं कलिनाशनं'' इति नलस्य कीर्तनं इव स्यादितित्यादिदर्शनार्थम् ॥

अथ द्वितीयः प्रश्नः। **''वाल्मीकिश्शुचिराततान स च किं?''** सः- सुप्रसिद्धः इत्यर्थः।'' उत तं आदेशं'' - श्रुतिच्छायानुसारी तच्छब्दप्रयोगः। महाकवीनां अग्रगण्येन पाराशर्येण महाभारतकर्त्राऽपि संपूज्यमानविभवः इत्यर्थः। पूर्वपादे सुदेवस्य दमयन्तीदर्शनमुक्तम्। तस्य बुद्धिस्थत्वात् एवं वक्ष्यते। यतः सुदेवस्य दमयन्तीदर्शनावसरे समानप्रकरणे हनूमतः सीतादर्शनावसरे सुन्दरकाण्डे वाल्मीकिप्रोक्तानेव श्लोकान् केवलं सीतावाचकपदस्थलेषु भैमीवाचकपदानि निधाय इतरत् शुकवत् सबहुमानं पठति भारतवेदवक्ता। स चैवं प्रसिद्धः भगवान् प्राचेतसः शुचिस्सन् किं आततान?। तथा च श्रीमद्रामायणं

"उपस्पृश्योदकं संयक् मुनिस्स्थित्वा कृताञ्जलिः।
प्राचीनाग्रेषु दर्भेषु धर्मेणावेक्षते गतिम्॥" इति॥

शुचिरित्यनेन कविरिति च उक्तम् भवति।" "विप्रश्शुचिः कविः" इत खलु वेदेषु असकृद्गीयते। कविः सः किं आततान?। "कवनं" इति त्रिवर्णकमुत्तरम्। अत्र मध्यमाक्षरं "व" इति इदं ग्राह्यम्।

अत्र वाल्मीकिस्मरणं तस्य काव्यपुरुषविषये इव एतत्काव्यपुरुषविषयेऽपि प्रशंसादिः नानृतं न चाऽर्थवादः

"न ते नागनृता काव्ये काचिदत्र भविष्यति।"

इत्येव स्थितिरिति दर्शनाय।

अथाधत्ते तृतीयं प्रश्नम्। पूर्वपश्नोत्थितिः एव सुदेव-दमयन्ती-दर्शनघट्ट-श्लोकानां धीःस्थत्वादित्युक्तम्। तेषाञ्च श्लोकानां भूमिः सुन्दरकाण्डम्। सुन्दरकाण्डे वाल्मीकेः कवनं अतिसुन्दरमिति अविगीतोऽयं विषयः। तदेवं तत्कवने बुद्धिस्थे सुन्दरकाण्डस्मृतिरायाता। यतः श्रीतातपादा एव स्वकीये मञ्जुरामायणे सुन्दरकाण्डं प्रत्येवं वदन्ति-

सीताऽशोकवनंभेजे रामश्शोकवनं तदा।
वाल्मीकिः कवनं तत्र सर्वचक्षुस्ततो वनम्॥

अत्र वनशब्दः वारीत्यर्थे। सीतायाः अशोकवनप्राप्तिः तेन रामस्य शोकदायी वनवासः इति तस्य शोकवनप्राप्तिः, तद्वर्णनावसरे वाल्मीकि कवने अतिशेते समान् कवीनिति तस्य कवनप्राप्तिः, तत्पठतां समेषां चक्षुषि वारि स्त्रवतीति सर्वचक्षुषां वनप्राप्तिरिति प्रतिपर्व अग्रिमाक्षरन्यूनता इति वैचित्र्यं इति यावत्॥

तदिति सुन्दरशब्दे बुद्धिमारूढे तदुपयुज्य तृतीयं इमं प्रश्नं कल्पयति कविः। "कुत्र स्थितस्सुन्दरः?" इति। सुन्दरनाम्ना प्रसिद्धो भगवान् हरिः कुत्रास्ते? इति प्रश्नः। उत्तरं त्रिवर्णात्मकं "वनाद्रौ" इति। अत्र "ना" इति मध्यमं अक्षरं ग्राह्यम्।

अत्र शुभवनगिरिनिलयहरिकथनं अस्य काव्यपुरुषस्य तादृशेषु शुभाश्रयेषु रतिं सूचयति इति सूक्ष्मविदः॥

सुन्दरार्यनामा एतत्प्रबन्धकर्तुः कवेः प्राचार्यः अधिकरणसारावली-तत्त्वसार-व्याख्यानादि-नाना-प्रबन्ध-प्रणेता श्रीमदण्णयार्यमहादेशिकानां एतदुत्सवनायक-कुलकूटस्थानां अन्तरङ्गशिष्येषु अन्यतमः इति अस्मिन् कवौ एतदुत्सवनायकस्य अन्यादृशी प्रीतिरिति तस्य आचार्यस्याऽपि सूचनं तन्त्रेण कृतमिति मर्मस्पृशः ॥

एवं सुन्दरहरौ स्मृतिमारूढवति, गोदाश्रीवत्सचिह्नमिश्राभ्यां अनुभूतं तस्य सुन्दरबाहुत्वं अनुपदमेव अधिरोहति मतिम्। गोदादेवी तस्य सुन्दरबाहुत्वं अनुभूय "अयमेव कृतजलनिधिमन्थनः। पतिताऽस्मि अस्य सौन्दर्यावर्ते। कथमुत्तरेयम्?" इति स्फुटञ्जगाद। श्रीवात्साङ्कमिश्राश्च "सुन्दरनाम्नो मन्थरमथिताब्धेः" इत्येवं-प्रकारेण सूक्तिजालेन सागरमन्थिनममुं निश्चयीकुर्वते।अतः तस्य सुन्दरस्य समुद्रमथन-मेव तुरीयप्रश्नविषयो भवति इति सङ्गतिः ॥

स च प्रश्नः। **किं तेने स दयारसार्द्रहृदयो देवार्थमंभोनिधौ?** । इति। "मथनं" इति त्र्यक्षरमुत्तरम्। अस्मात् "थ" इति वर्णं ग्राह्यम्।

एवं अमृतमथनकथासूचनात् काव्यपुरुषस्य सारग्राहित्वं वर्णितम्। "प्रज्ञाख्ये मन्थशैले ..." इत्यादि द्रष्टव्यम्। एवं **देवनाथ** शब्दः प्रश्नोत्तरमध्यवर्णघटितः। नाम एतत् नामवति उपचरन् वक्ति-यः **प्रश्नोत्तरमध्यवर्णघटितस्तस्मै नमस्कुर्महे**। इति। मध्यवर्णघटितः वाचकः शब्दः नतु वाच्यः व्यक्तिविशेषः इति आग्रहश्चेत् इष्टापत्तिरेव। "वाचकशब्दाय नमस्कुर्महे" इति अस्माकं स्थितिरिति चेत्, वाच्यविषये दण्डापूपिकया नमस्यासन्ततिप्रसरणम्॥

साक्षादेव "देवनाथं नमस्कुर्महे" इति उक्तेरपि एवं परोक्षतो निर्देशः रसवत्तरः। "परोक्षप्रिया इव हि देवाः" इति श्रुतिमार्गः। तेनैव पथा यान्तस्सर्वे विबुधाः ईदृशीं चमत्कारवाचं बहुमन्वते। अपि च अमृतकल्पस्य नाम्नः अक्षरशः कथनं सात्म्यभोगप्रदानम्। "एकैकमक्षरं" इत्यभिज्ञानश्लोकवत् सुस्वामिनोऽस्य नामधेयं तद्गुणैरेव दास्यमुपागतानां भृत्यानां अक्षरशः अनुभाव्यं भवति इति लोकवेदस्थितेः एवं वर्णनम्॥

अस्मिन् श्लोके काव्यलिङ्ग-परिकर-मुद्रालङ्काराणां संसृष्टिः ॥

॥ इति द्वितीयः श्लोकः ॥

॥अथ तृतीयः श्लोकः॥

(अवतारिका) उत्सवदेशं प्रथमेन श्लोकेन, तस्य कालं तन्नायकनामधेयञ्च द्वितीयेन वर्णितवान् कविः संप्रति तृतीयेन नायकस्य ज्ञानादि वर्णयति इति सङ्गतिः॥

वेदो यस्य वशे निजाङ्गसहितःस्वान्तान्वितो वर्तते
तत्कीर्त्यो भुवि वेदनाथ इति हि स्वामी प्रमादाज्जनैः।
उक्तोऽभूदिह देवनाथ इति किं? नैव प्रमादोऽत्र नः
वेदस्यैव सृतिर्जनैरनुसृता यत्पश्यकः कश्यपः॥

वेद इति। पूर्वश्लोके काव्यनायकस्य नामधेयगताक्षरणि प्रकाशितानि। तदेव नामधेयमादाय तद्द्वारत एव नायकस्य ज्ञानादि वर्ण्यते॥

श्रीदेवनाथाचार्याः वेद-वेदान्त-वेदाङ्गेषु अतिपरिचयवन्तः। ततः वेदाः वेदान्तानि वेदाङ्गानि च तद्वशे स्थितानि। यस्य वशे निजाङ्गसहितः स्वान्तान्वितः वेदो वर्तते सः **वेदनाथ** इति कीर्त्यः इति इदं उपपन्नम्। इममेव अर्थं "**वेदो यस्य वशे निजाङ्गसहितःस्वान्तान्वितो वर्तते तत्कीर्त्यो भुवि वेदनाथ इति हि स्वामी**" इति श्लोकयति।अत्र स्वान्तान्वितः इत्यनेन "वेदहृदयं जानीतेऽयं, वेदवचसां मर्मज्ञोसौ" इति इदं अपि उक्तम्॥

"तादृशस्य अस्य देवनाथ इति नामाऽस्ति, इदं कथं? इत्याशङ्क्य, "वेदनाथ" एव **प्रमादाज्जनैः। उक्तोऽभूदिह देवनाथ इति किं?**" इति पूर्वपक्षमुपन्यस्य, "नाऽत्र प्रमादः। वेदनाथशब्द एव देवनाथत्वेन पठ्यते।" इति सिद्धान्तं स्थापयति। एवं वेदनाथत्वे स्थिरीकृते श्रीमद्वेदमार्गप्रतिष्ठापनाचार्यत्वं उभयवेदान्ताचार्यत्वं स्थिरीकृते भवतः इति इदं बोध्यम्॥ "वेदनाथं कदं देवनाथमूचुः?" इत्यत्र उत्तरमाधत्ते। "**नैव प्रमादोऽत्र नः, वेदस्यैव सृतिर्जनैरनुसृता**" इति। तत्र वेदमार्गस्थितैः महद्भिरेव एवमस्य नामधेयं वेदशैलीं अनुसरद्भिः कृतम्। वेदे वेदनाथनाम देवनाथ इति च भवति इत्यत्र स्वपक्षसाधकं दृष्टान्तमाधत्ते। "**यत्पश्यकः कश्यपः॥**" इति। तैत्तिरीयारण्यके प्रथमे प्रश्ने "कश्यपः पश्यको भवति। यत्सर्वं परिपश्यतीति सौक्षम्यात्।" इति कश्यपशब्दनिरुक्तिः। इयमेव सृतिः परोक्षश्रुतावपि इति वक्तुं शक्यम्। यतः उपब्रह्मणरत्नभूते पुराणरत्ने भगवच्छब्दव्याख्यानावसरे भकार-गकार-वकारेभ्यः

कल्याणगुणैस्समृद्धिमुक्त्वा ''अन्'' इत्यवशिष्टमंशं ''न'' इति परिवृत्य निखिलहेय-प्रत्यनीकत्वबोधकः ''न''कारः इति वदता पराशरेणाऽपि परमर्षिणा इयमेव सृतिरनु-सृता। अतश्च वेदनाथ एव देवनाथः॥

अस्मिन् श्लोके काव्यलिङ्ग-निरुक्त्यलङ्कारयोस्संसर्गः। ''निरुक्तिर्योगतो नाम्नां अन्यार्थत्वप्रकल्पनम्।'' इति साहित्यमीमांसकाः॥

॥इति तृतीयः श्लोकः॥

॥अथ चतुर्थः श्लोकः॥

(अवतारिका) इत्थं उत्सवदेश-काल-नायक-तन्नाम-तद्वैभवादि वर्णितवान् अधुना उत्सवे समेतां परिषदं परिस्तौति तुरीयेन। श्रीमद्रामानुजवाक्यसारविदां उत्तमैः पूरिता सभेति सूचनात् श्रीस्वामिनां श्रीमद्रामानुज-सिद्धान्त-निर्धारण-सार्वभौमत्वं उक्तं भवति॥

नावल्पाकसभा कृता सुकृतिभिः श्रीदेवनाथोत्सवे
श्रीमन्नाकसभैव यत्र विबुधाः श्रीदेवनाथाग्रतः।
जीवानन्दकृतो विभान्ति सततं सोऽयं किलार्थःस्फुटः
प्रत्याहारविदां मनःस्थयतिराट्-धीरार्थसारस्पृशाम्॥

नावल्पाकसभा इति। नावल्पाकसभेयं नाकसभैवेति श्लेषोक्तिभिः चाटूक्तिभिश्च निरूपयति। नाकसभा-स्वर्गसभा तु श्रीदेवनाथस्य महेन्द्रस्य उत्सवे प्रचलति। तत्र **श्रीदेवनाथस्य** - शक्रस्य अग्रतः विबुधाः-पण्डिताः समेताः। ते च सततं **जीवानन्दकृतः**-जीवस्य चेतनस्य (आत्मनः) आनन्दकृतः **विभान्ति**। यतः ''संतोषार्थं विमृशति मुहुः सद्भिरध्यात्मविद्यां'' इति श्रीसारोक्तरीत्या श्रीभाष्यविचारतः जीवानन्दकृतः एते विबुधाः। जीवानन्दो मुक्तानुभूतिः। सा च अस्मिन् लोके श्रीभाष्यसेवा इत्येव श्रीतातपादानां सिद्धान्तः। किं श्रीतातापादानामिति?। सर्वेषां श्रीरामानुजाङ्घ्रिशरणानाम्। अस्मिन् विषये श्रीतातपादानां श्लोकः-

मुक्तानुभूतिर्हि महीतलेऽस्मिन् मुकुन्दपादाब्जमधुव्रतानाम्।
मुदां प्रवाहैर्मुहुराकुलानां मुनीन्द्ररामानुजसूक्तिसेवा॥

तदित्थमियं नावल्पाकसभा श्रीमन्नाकसभैव इति निश्चयं कुर्वति केनाऽपि चोद्यते। "कथमेतत्? सा नाकसभा। इयं तु नावल्पाकसभा।" "वल्पाक" तः भिदा वर्तते। इति। तत्र समाधत्ते तुरीयपादेन। नावल्पाकसभा इति वक्तव्ये एव नाकसभेति प्रयोगः। **नाकः** इत्ययं शब्दः **नावल्पाकवाचकः** प्रत्याहारः। व्याकरण-शास्त्रादन्यत्र किं ईदृशः प्रत्याहारः अस्ति इति चेत् ब्रूते- **सोऽयं किलार्थःस्फुटः प्रत्याहारविदां मनःस्थयतिराट् -धीरार्थसारस्पृशाम्**। इति। श्रीमद्गीतासु चतुर्थाध्याये "वीतरागे"ति दशमश्लोकभाष्ये श्रीमता भगवता भाष्यकारेण "तस्य धीराः परिजानन्ति योनिं "इति वाक्यमुदाहृत्य तत्र **धीराः- धीमतामग्रेसराः** इति व्याख्यानमपि कृतम्। अनेन धीरा इति शब्दं धीमतामग्रेसराः इति शब्दस्य प्रत्याहारं मन्यन्ते इव भान्ति यतिराजाः। तदिदं स्वपक्षसाधकं कृतं कविसार्वभौमेन।

एवमस्मिन् श्लोके काव्यलिङ्गश्लेषयोः संसृष्टिः ॥

मुमुक्षुमण्डितां सभां सुधर्मासभां वर्णयता कवीश्वरेण हीनोपमा प्रदर्शिता इति चेन्न। "इषुवद्गच्छति सवित" इतिवदयं प्रयोगः इति बोध्यम्। अथवा छान्दोगयो-पात्तप्रजापतिसभैवेयं नाकसभा। तदानीं **विबुधाः**- नित्यमुक्ताः। **जीवानन्दः** प्राचीनदुःखमपि सुखयन् भगवत्-पादारविन्द-परिचार-रस-प्रवाहः। **नाकः श्रीवैकुण्ठलोकः**। **श्रीदेवनाथः**- श्रीमन्नारायणः इत्यादि द्रष्टव्यम् ॥

॥ इति चतुर्थः श्लोकः ॥

॥ अथ पञ्चमः श्लोकः ॥

(अवतारिका) चतुर्भिः शार्दूलविक्रीडितैः शताभिषेकमहस्य वर्णना कृता। पञ्चमेन उपजातिना मङ्गलमाशास्य प्रबन्धपूरणाय यतते।

श्रीदेवनाथार्यशताभिषेके सतां निधिः श्रीशतपत्रनेत्रः।
श्रीदेवदेवी शतपत्रवासा शताधिकं मङ्गलमातनोतु ॥

(श्रीदेव इति) दिव्यदंपती मङ्गलमातनुतां इति प्रार्थनायां लोट्। **शतपत्रं**- कमलम्। **"कम्बूत्पन्नसमानलोचनयुगश्रीः"** इति आरम्भे। **"शतपत्रनेत्रः"** इत्यवसाने। अत्र कमलवाचकानां शब्दानां मध्ये शतपत्रशब्दस्य अस्मिन् अवसानश्लोके द्विवारं प्रयोगः शताभिषेकविषयत्वात् प्रबन्धस्य। काव्यनायकस्य

वैभवमपि शतैः पत्रैः वर्ण्यं इत्यपि सूच्यते। "निश्शेषं अम्बरतलं यदि पत्रिका स्यात्" इत्यस्य सगन्धः प्रयोगोऽयम्। अत्र **शतशब्दः** मानातीतवाची। शताधिकं-अपरिमितम्। अत्र प्रथमे पादे **श्रीः** द्वितीये **निधिः** इति कविनामाऽपि पादशः पदशः सूचितम्। अपि च अस्मिन् श्लोके काव्यलिङ्ग-परिकर-मुद्रा-ऽनुप्रासादीनां संसृष्टिः॥

॥इति पञ्चमः श्लोकः॥

॥अथ षष्ठः श्लोकः॥

(अवतारिका) यद्यपि पञ्चकमिति आरब्धं, तदाऽपि शताधिकश्लोकवर्णनीयत्वात् स्पृहणीयत्वाच्च काव्यनायकमहिम्नः झटिति प्रबन्धनिगमनं कर्तुं अशक्तःसन् कविः मन्दं दोग्धि प्रबन्धं शालिनीवृत्ततः-

न्याय्यान्मार्गादीषदप्यच्युतो यः
रय्या नेतुं यस्य चेतो न शक्यम्।
"अय्या" स्वामी स्वाश्रमो ब्रह्मवादी
मय्याऽऽनन्द्यो भातु सानुग्रहोऽयम्॥

॥इति श्रीमदाशुकविसार्वभौमश्रीनिधिस्वामिनां कृतिषु
श्रीशताभिषेकपञ्चकम् संपूर्णम्॥

(न्याय्यात् इति) अयं श्लोकः प्रसङ्गात् प्रथमश्लोकव्याख्यानावसरे एव व्याख्यातः। **"अय्या"**स्वामिति स्वामिनां नामधेयान्तरं सार्वजनीनम् अस्मिन श्लोके कीर्त्यते। "अलूक्षा" इति उपनिषदुपगीतवैभवशालिनां गोष्ठीभूषणमयं स्वामी इत्यनुप्रासगम्भीरं गायति कविः। किं विस्तरेण?। तस्यानुग्रह एव काङ्क्ष्यते इति निगमयति। **आनन्द्यः**- सर्वप्रकारतो नन्द्यः। ज्ञानवृद्ध-वयोवृद्ध-शीलवृत्त्वेभ्यः। ईदृशमहिमा स्वामी स्वामी **"मयि सानुग्रहो भातु"** इति पूरयति प्रबन्धम्॥

श्रीदेवनाथार्यसहस्रचन्द्रदृष्ट्युत्सवं पञ्चक आततान। मान्यः कवीनां मधुरे प्रबन्धे मनागहं भावमदर्शयं त्विति॥

॥इति पञ्चकप्रकाशिका संपूर्णा॥

***

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥श्रीनिधये वात्स्य श्रीनिवासराघवाचार्यमहादेशिकाय नमः ॥

॥ करुणात्रिवेणी ॥

तत्र संस्कृतवाङ्मयभूतम्

॥ गङ्गास्रोतः ॥

तत्र पञ्चमो विभागः

॥ ५. प्रकीर्णप्रबन्धाः ॥

॥ कथानकम्- खट्वाकलहः ॥

पञ्चदश रात्रीः स्थण्डिले सुप्तवत्याः तस्याः शूलोपद्रवः सञ्जातः । इतमित्थं भविष्यतीति विदितपूर्वमेव मे ॥

मम जननी यथाशक्ति गृहा(ऽ)गदैः चिकित्सां अकरोत्तस्याः । नूतनरीत्या सद्यः फलदाः गुलिकाः अपि अदात् ॥

दिनद्वयं अपि गतमुपरि । रात्रौ अरुणायाः श्वासवृत्तिः कष्टाऽऽसीत् । "कियानिव कालः कलहेन गच्छेत् । तदहमेव भाषणमारभेय" इति मतिं कुर्वन् आसम् ॥

एवं चिन्तयत एव द्वित्राणि दिनानि गतानि । अन्ततः "कथमस्ति शूलः कान्ते?! इति मृदु उपक्रमं अकरवम् ॥

न उत्तरमागतम् । झटिति एव तयाऽपि भाषणे प्रत्यारब्धे तस्या विशेषमहिमा कथं स्यात्? । पञ्चदश-दोषा-कलित-कलह-शान्तिर्वा कथं इयता भवेत्? ।

पुनरपि हसन् अब्रुवम् । "कथमिति आग्रहं कुरुषे । भूमौ शयनं तव अनारोग्यकरं इति ज्ञात्वाऽपि तत्रैव शेषे ।"

प्रतिमासं प्राप्तमात्रमेव वेतनं श्रीमत्तातपादपादयोः समग्रतया परिसमर्प्य, तैः आवयोः व्ययाय इति दत्तं शतद्वयं स्वीकुर्वे । तस्मात् शतद्वयात्, विना मम ज्ञानं, विंशत्, त्रिंशत् इति मासि मासि सङ्कलय्य शेवधिं स्थापितवतीयं अरुणा । एकदा यदृच्छया मदृष्टिपथं प्राप्तं इदं धनम् । स्यात् शतं रूप्यकाणाम् ॥

इयताऽपि सा न किञ्चित् उक्तवती। परिवृत्य शेतेस्म। स्वापं अभिनयन्ती स्थिता च॥

''प्रणयकलहः न शान्तः किमु?'' इति पृष्टवतः न किञ्चित् उतरं आगतम्॥

''हा! बह्वस्ति वित्तम्! कुतः एतत्?'' इति अपृच्छम्।

''तत् न्यस्यताम्। मा स्पृशतु भवान्। अहं खलु संधानं कृतवती अस्याः संपदः। मदीयं एव एतत्।'' इति सा अवदत्॥

''किमिति मम तव इति विभज्य व्यवहारं आरभसे। आवयोः इति ब्रूहि। तदेव भन्दनं स्यात्।''

''सत्यम्। अज्ञात्वा एवं संधानं अकरवम्। इदं स्वीकरोतु भवान्।'' इति तत् आदाय मे अदात् सा। नेत्रयोः प्रवाहो महान्। मुखं अन्यादृशं अभवत्॥

अहं न अगृह्णां रूप्यकाणि।'' परिहासविजल्पितं तत्। किमिति परमार्थेन गृहीतं त्वया। इदं त्वया एव सञ्चितम्। तव एव इदं अस्तु।''

''न अहं इच्छेयं एतादृशसंधानाय। न च वाञ्छामि इदम्। शतजन्मभिः अपि अस्तु।''

''हला! किं वा दुरुक्तं मया?। एतादृशानि वक्तुं अपि किं अनर्हः भर्ता?।''

''न अहं उक्तवती अनर्ह इति। भवदुक्तं अभ्युपगम्य एव भवते समर्पयामि। स्वीकरोतु भवान्।''

क्वचित् क्वचित् समयेषु कोपस्य वशं नीयामहे अवशा वयम्। कोपश्च विवृद्धो भवन् भ्रामयेच्च अस्मान्।

खट्वायाः अवारुहम्। तां हस्तेन परिमृश्य उद्धृत्य, तस्याः मुखं संमुखीकृत्य तां अपश्यम्।

''अहं हि स्वार्थपरा। विभागाय स्पृहयन्ती। किमिति मम सान्त्वने यतते भवान्?।''

''भवतु भवतु। किमिति पुरावृत्तान्येव वदसि?। गतं तु गतमेव। त्वं तु शोषिता। शरीरमधुना सामि एव पूर्वस्थितस्य ते।''

"आज्ञापयामि अहम्। त्वमेव त्वदधीनं इदं भजस्व।"

अरुणा दुःखाक्रम्यमाणा आसीत्। प्राकृतः प्राकृतायामिव तस्यां आचरन् तस्याः अहं अभाम् इति मन्ये।

"न अहं अस्मै कामये। मम संधानं अकार्यं इति मम एव स्फुरत्यधुना। भवान् भर्ता। भवतः इच्छाधीना खलु योषित् अहम्। न अर्हामि स्वातन्त्र्यम्। मदीयं इदं, मह्यं इदं, इति न किमपि मम भवितुमर्हति।"...

इति आरभ्य सुदीर्घः विवादः समचलत्।

अन्ते "न अहं गृह्णीयां इदं धनम्। मातरि देहि।" इति अब्रुवम्।

"किम् श्वश्रूतोऽपि निन्दाः श्रोतव्याः?। किम् वा सा मां मन्येत?। भवानिव पार्थक्यं इच्छन्ती इयं जघन्या इति खलु। इदं तत् भवानेव यथेष्टं भुनक्तु। अथवा अवकरकण्डे निक्षिपतु खण्डशः कृत्वा।"

मम कोपः उग्रतां आप्नोत्। रुप्यकाण्यादाय खण्डशः कृत्वा इतस्ततः प्राक्षिपम्।

तदात्वे एव आवयोः संभाषणं समाप्तिं गमितम्।

"समग्रेण अपि शरीरेण शोषिता भवेयम्। तदेव मम युज्यते।"

"मा एवं वदेः बाले!"।

"आम्। मदुपरि महान् कोपः भवताम्। येन रूप्यकाणि खण्डशः अछिनत्। प्राक्षिपच्च। को वा रूप्यकाणि छिन्द्यात्?। तानि श्रियः स्वरूपभूतानि ननु?।"

"श्रियः स्वरूपं वा सरस्वत्याः स्वरूपं वा परीतस्य मे कथं भाय्यात्। यः अहं मम अरुणामेव तदा न अजानाम्।" इति अचिरादेव कलहः शान्तिमाप्तः। परं तु अरुणा न खट्वायां शयनं ऐच्छत्।

"अत्रैव स्थण्डिले अहं शयनं कामये।"

"किमु भूयः अपि कोपः?"

"ना लज्जे तत्र शयितुम्।"

"न अवबुद्धवान्। किमिति लज्जसे?"

"वक्ष्ये। प्रथमं ईदृशं खट्वान्तरं सोपस्तरणं क्रीणातु।"

"किम् इति इयं आज्ञा?।"

"अन्येद्युः भानुवासरे मध्याह्ने चलचित्रं दिदृक्षू अगच्छाव खलु। तदा आवयोः प्रवेशपत्रं न अलभ्यत इति भवान् चलचित्रगृहात् भवतः वयस्यं कञ्चन द्रष्टुं अगमत्। अहं तु गृहान् आगाम्। झटिति अन्तः प्राविशम्। अन्तः.. किं वा कथयामि। आवयोः खट्वायां मातापितरौ सुगाढं अनिद्रीताम्। ततः प्रभृति तत्र शयने लज्जावती अहम्। मनसि कश्चन वेपथुः जायते। आवयोः पूज्यौ बृद्धौ अतीतवयस्कौ एव खट्वायां मञ्चे शयनं अर्हतः। न वै आवाम्। तथा च खट्वार्थं धनसन्धानं कृत्वा तयोः सप्रस्तरं मञ्चं उपदीकृत्य तौ भवन्तञ्च विस्मापयितुं ऐच्छम्। यदि भवति उक्त्वा इमां आशां धृतवती अहं अभविष्यम्, भवान् तानि रूप्यकाणि न खण्डशः अकरिष्यत्। अन्यययाय्येन परीतः सन् भवान् सर्वं ध्वंसितवान्।"

अरुणां परिष्वज्य अहं अवदम्। "आगामिनि नवमासे वेतने लब्धे प्रथमं मञ्चादि क्रीणामि। तयोः दास्यामि॥"

"मा एवं अकाण्डे कुर्यात् भवान्। तत् असभ्यं भवेत्। मासत्रयं सहताम्। तयोः षष्ट्यब्दपूर्तिः आगमिष्यति। तदानीं अस्मत्-पारितोषिकं इति वितरावः। तत् युक्तं भवेत्।"

हुम्। मत्कान्ता अतीव धीमती मनस्विनी च॥

***

कुमुदम् इति द्रमिडभाषायां प्रसिद्धा साप्ताहिकी पत्रिका। तस्यां ०१.०३.७९ इति दिनाङ्कितायां श्रीमतः नीलकुमार् इत्यभिख्यां वहतः "कट्टिल्शण्डै" इति लघुकथा काचन प्रकटीकृता अभवत्। तदिमां रस्यां संस्कृतभाषायां ग्रन्थकर्ता परिवर्तितवान् "खट्वाकलह" इति नाम प्रदाय। तदात्वे सुधर्मा इति प्रसिद्धायां मैसूर्तः प्रचारं भजन्त्यां संस्कृतपत्रिकायां इदं परिवर्तनं मुद्रापितञ्च।

॥ ग्रन्थकर्तुः परिचयः ॥



ग्रन्थकर्ताऽयं गतसर्वजिति (विदेशीयगणनारीत्या १९४७-तमे) संवत्सरे सिंहमासे उत्तरप्रोष्ठपदायां (०१-०९-१९४७-तममिति सूचितेदिने) तमिल्नाडुप्रदेशेश्रीकुम्भघोणनगरे श्रीमदुभयवे. विल्लूर नडादूर आशुकविसार्वभौम श्रीनिधिस्वामिनां श्रीमत्याः वञ्जुलवल्ल्याश्च सप्तमप्रजारूपेण जातः। श्रीकुम्भघोणेश्रीमदहोबिलमठ पाठशालायां आषष्ठकक्ष्यमपठत्। यौगपद्येन पितुस्सकाशात् संस्कृताध्ययनमपि करोति स्म। पश्चात् चेन्नै-महानगरे रामकृष्णामिषन् विद्यालयद्वारा पाठशालाध्ययनपूर्तिं कृत्वा तदात्वे मद्रास् विश्वविद्यालयाधीनायां मधुरै-त्यागरजर् इन्जनीयरिङ्ग् कलाशालायां बी.ई. (यन्त्रशाखा) इति उपाधिमुपलभ्य केन्द्रीयसर्वकारकार्यालये नानापदेषु ३६ संवत्सरान् कर्म कृत्वा ३१-०८-०७-तम दिने निवृत्तिं भजमान आस्ते। इदमस्य जीवनदायिनीं विद्यामधिकृत्य। अथ अध्यात्मविद्यामधिकृत्य। निजपित्रा उपनीतस्तत्सकाशे एव स्वाध्यायभूतस्य कृष्णयजुर्वेदस्य भूयांसं भागं गृहीतवान्। इतरेभ्योऽवशिष्टमिति पूर्णतया स्वशाखाध्ययनं च कृतवान्। पितुरेव द्रमिडवेदग्रहणम् कृतवान्। कुलोचितं पञ्चसंस्काराद्यपि प्राप। संप्रदायरीत्त्या ग्रन्थचतुष्टयकालक्षेपमपि पितुस्सकाशादेवाप। विशिष्टाद्वैतिनां वेदान्तद्वयेऽपि पाटववान्। प्रसिद्धमठाधिपतीनां सभासु वेदान्तविदुषां मध्ये विशिष्टाधिकारिपदे गण्यमानश्चास्ते। श्रीरङ्गं श्रीमदाण्डवन्महाशयैः शास्त्रसहितीवल्लभः इति बिरुदप्रदानपूर्वं संमानितः। परवाक्कोट्टै श्रीमदाण्डवन्स्वामिनः देशिकदर्शनचूडामणिः इति (सोकोंण्डल् इति द्रामिड्याञ्च) बिरुदमदुः। संस्कृत-द्रविड-आङ्गलभाषासु प्रवचने पटुः विरामावसरेषु भारतदेशे प्रायः सर्वेषु नगरेषु श्रीमद्रामायण भारतभागवतादीनां इतिहासपुराणानां प्रवचनं कुर्वन् आस्ते। प्राचीनपद्धत्यां वेदान्त-भगवद्गीता-भगवद्विषयरहस्यत्रयसारादि पूर्वाचार्यदिव्यसूक्तिप्रचारप्रवचनमपि तनुते। निजपितुरादेशतः भगवद्रामानुजकृतव्यवस्थानुगुणं आचार्यपुरुषसंप्रदायपरिपालनं कुर्वन् श्रीवैष्णव पञ्चसंस्कार दीक्षादिप्रदानानुष्ठानमप्यातनुते। संस्कृतद्रविडभाषयोः कवने दक्षः बहून् श्लोकान् गाथाश्च रचितवान्। सरलसरण्यां नानासञ्चिकासु भाषात्रयेऽपि लेखनद्वारा संप्रदायसेवां सन्तन्वन् आस्ते, यत्र द्रमिडभाषायां श्रीरङ्गनाथपादुकायां परमैकान्तिनां स्वस्तिवाचनं, आङ्गलभाषायां "वाक्" पत्रिकायां विष्णुसहस्रनामकथावलिश्च प्रतिमासं अनुस्यूतरीत्या प्रकाश्यमाने प्रसिद्धे। नानाकृतीः रचितवतोऽस्य षष्टिपूर्तिमधि तासां कांश्चन भागान् करुणात्रिवेणीति नाम्नि प्रकाशं नीतवन्तो रसिकाः। तत्राऽयं संस्कृतकृतिभिः क्लृप्तोभागोगङ्गायते॥

Printed by Versatile Prints and Packs, Chennai-47. Mobile: 9444812655